सरस्वतीभवन-ग्रन्थमाला

[१२५]

कात्यायनीयशुक्लयजुःप्रातिशाख्यस्य

[illegible] प्रणीता

ज्योत्स्नावृत्तिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

सरस्वतीभवन-ग्रन्थमाला

[१२५]

कात्यायनीयशुक्लयजुःप्रातिशाख्यस्य

श्रीरामशर्मणा प्रणीता

ज्योत्स्नावृत्तिः

(समीक्षात्मकसंस्करणे विशदभूमिकापरिशिष्टटिप्पण्यादिभिर्विभूषिता)

भूमिकालेखकः, सम्पादकः, संशोधकश्च

डॉ० युगलकिशोरमिश्रः

आचार्योऽध्यक्षश्च

वेदविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणस्याम्

२०४६ तमे वैक्रमाब्दे १९११ तमे शकाब्दे १९८९ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसंधानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी–२२१००२

□

प्राप्तिस्थानम्—
विक्रयविभागः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी–२२१००२

□

प्रथमं संस्करणम्, १००० प्रतिरूपाणि

मूल्यम्— ४८.०० रूप्यकाणि

□

मुद्रकः—
रत्ना प्रिंटिंग वर्क्स
बी २१/४२ ए, कमच्छा
वाराणसी–२२१००२

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 125]

Commentary on Śukla-yajurveda Prātiśākhya

of Kātyāyana

JYOTSNĀ-VṚTTI

By

ŚRIRĀM ŚARMĀ

[Critically Edited with an elaborate Introduction,

Notes and Appendices]

EDITED BY

DR. YUGAL KIŚORE MIŚRA

Professor & Head

Department of Vedic Studies

Sampurnanand Sanskrit University

VARANASI

1989

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harishchandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi—221002.

□

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi—221002.

□

First Edition, 1000 Copies
Price Rs. .00

□

Printed by—
Ratna Printing Works
B 21/42 A, Kamachha
Varanasi—221001.

समर्पणम्

(१)

वेदाम्भोनिधिपारगो निजयशोराशिप्रकाशीकृत-
स्तातो मे समभूत्सतामभिमतो गोपालचन्द्राभिधः ।
तत्पुण्यस्मरणप्रसङ्गकलितं तत्पादयोरर्पितं
ज्योत्स्नाधौतमुपायनं विजयतां श्रीप्रातिशाख्याभिधम् ।।

(२)

शुक्लयजुःश्रुतिसरणिव्याकृतये प्रातिशाख्यमिदम् ।
गुरुपदपङ्कजमिलितं ललितमिलिन्दायतामनिशम् ।।

पुरोवाक्

परमेशितुः श्रीविश्वेशकृपया वेदपुरुषानुग्रहेण च सम्पादितं ज्योत्स्नावृत्तिसमलङ्कृतमिदं शुक्लयजुःप्रातिशाख्यं नाम। तदेतत् शास्त्रसुधारसिकानां ज्ञानैकव्रतिनां विदुषां पुर उपस्थापयन्नहमानन्दसन्दोहमनुभवामि।

विदितचरमेवैतन्मनीषिणां यच्चतुर्षु वेदेषु यजुर्वेदस्य बहुजनसमादृतत्वाद्, यज्ञेषु आध्वर्यवस्य प्राधान्याच्चाभ्यर्हितत्वं प्रसिद्धम्। तत्रापि "कलौ माध्यन्दिनी शाखा" इतिवचनानुरोधेन शुक्लयजुषो माहात्म्यं सर्वानतिशेते। शुक्लयजुर्वेदस्य वर्णोच्चारणे उदात्तादिस्वरधर्माणां हस्तेन प्रदर्शने च किमप्यपूर्वमेव वैशिष्ट्यं दृश्यते, यस्य भाषावैज्ञानिकानुशीलनेन मन्ये नूत्नानि वातायनानि समुद्घाटितानि भवितारः। भगवतः कात्यायनविरचितस्यास्य प्रातिशाख्यस्य श्रीरामशर्माचार्यविरचितया ज्योत्स्नाख्यविवृत्या सह इदम्प्रथमतया पाठभेदादिप्रदर्शनपूर्वकं समीक्षात्मकं प्रकाशनं प्रस्तूयते। अत्र प्रकाशनेऽस्माभिः संयोजितः शास्त्रपरिचायनपरो भूमिकाभागः, सम्प्रदायप्रबोधिनीशिक्षादिसम्बद्धविषयपोषकः परिशिष्टभागश्चेत्युभयं जिज्ञासूनामुपकारायालं स्यादितिविश्वसिमि। सेयं ज्योत्स्नाविवृतिः क्रमबद्धपदार्थप्रतिपादनपरा, प्रयोगप्रक्रियानुवर्तनमञ्जुला, प्रसन्नपदगभीरा, नितान्तं हृद्या, अन्वर्था च विद्यते। प्रातिशाख्यवाङ्मयेऽनुपमेया, सोदाहरणा साष्टविकृतिलक्षणा सव्याख्यप्रतिज्ञासूत्रञ्च स्वाङ्के निदधती वेदविद्याकान्तारचारिणो विद्वज्जनान् भृशमावर्जयति। मन्ये ग्रन्थमणेः प्रकाशनस्यास्माकीनोऽयं यत्नः विबुधां मनस्तोषाय कल्पेत।

कार्येऽस्मिन्नहं येषां हार्दिकेन शुभाशिषा प्रेरणया निर्देशेन च संलग्नोऽभवम्, सर्वप्रथमं तेषु वाराणसेय-संस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षचराणां महामहिमोपाध्यायानामाहिताग्नीनां श्री पं० भगवत्प्रसादमिश्रपितामहपादानाम्, वेदविद्याविद्योतितान्तःकरणानां प्रत्यग्रधिषणानां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वेदविभागाध्यक्षचराणां विद्वत्तिलक–डॉ०श्रीगोपालचन्द्रमिश्रतातपादानामुपकारभारं श्रद्धायुक्तेन मनसा स्मरामि। येषां कृपाकटाक्षं विना सर्वथा दुःशकमेवासीदिदं कार्यम्। वाचोऽभिव्यञ्जने किमपि कर्त्तुमनीशोऽहं तान् प्रति सश्रद्धं प्रणतिततीः समर्प्यात्मानं धन्यं मन्ये।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरैः करुणावरुणालयैः विद्वत्तल्लजैः डॉ०श्रीगौरीनाथशास्त्रिमहोदयैः विश्वविद्यालयप्रकाशनयोजनायां ग्रन्थममुं स्वीकृत्य साशीर्वादं भृशमुपकृत इति महोपकारं स्मरन् पुनरपि तेषामाशीरांशि कामये।

विद्वद्वरेण्यैः विश्वभारतीपुरस्कारेण सम्मानितैः 'पद्मभूषण' पं० पी० एन० पट्टाभिरामशास्त्रिवर्यैः परमया कृपया ग्रन्थस्य कृते शुभसम्मतिलेखनेनाधमर्णीकृतोऽयं

जन इति तेभ्यः सप्रणति कृतज्ञतां ज्ञापये। अथ च वर्तमानकुलपतिमहेच्छैः विद्वन्-मूर्धन्यैः प्रो० वि० वेङ्कटाचलम्वर्यैःमहता स्नेहेन शिवसङ्कल्पोऽत्र ग्रन्थे समारचितः, प्रकाशनादिव्यवस्थासौकर्यपन्थाश्च प्रशस्तीकृत इति तेषां कार्तज्ञ्यं प्रकाशयामि।

प्रसङ्गेऽस्मिन् ममानुजं डॉ० श्रीकिशोरमिश्रं शिष्यवर्यं श्रीओमप्रकाशपाण्डेयञ्च हार्दिकैः शुभाशीर्वचोभिर्योजयामि, याभ्यामनेकविधसहयोगप्रदानेन कार्यमिदं सुसम्पन्नं व्यधायि।

मुद्रितेऽस्मिन्ग्रन्थे बहवो मुद्रणदोषाः स्वरचिन्हादिदोषाश्च शीसकाक्षरयोजकानां पारवश्येन यन्त्रपारवश्येन च विद्यमानाः सन्ति। सर्वथैव निर्दोषं मुद्रणं कारयितुं वाञ्छन्नपि तन्नापारयम्। अतस्तन्मुद्रणादिदोषान् क्षन्तुं मानवसुलभानन्याँश्चापि वर्तमानांस्त्रुटीनविगणय्य ग्रन्थममुं द्रष्टुं सुधियो विनिवेद्यन्त इति।

ग्रन्थस्यास्य प्रकाशनव्यवस्थायाः सर्वोऽपि चिन्ताभारः शीघ्रमुद्रणाय कार्य-सञ्चारश्च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनाधिकारिभिः डॉ० हरिश्चन्द्रमणि-त्रिपाठिवर्यैः साधु निरूढ इति तान् धन्यवादकदम्बैरभिनन्दयामि। अत्र प्रकाशने येषां ग्रन्थानां पाण्डुपुस्तकानां लेखादीनाञ्चोपयोगो विहितस्तेषां ग्रन्थकृतो लेखकाः सङ्ग्राहकाः प्रकाशकाः समुपलम्भसहयोगिनश्च महोपकारस्निग्धैः साधुवादैरस्माभिः संविभूष्यन्ते।

युगलकिशोरमिश्रः

शिवसंकल्पः

अथेदमुपह्रियते पाठकविदुषां करकमलयोः शुक्लयजुर्वेदप्रतिशाख्यम् अस्मद्विश्वविद्यालयस्य वेदविभागाध्यक्षैः पण्डितश्रीयुगलकिशोरमिश्रैः सम्पादितम्। यद्यपि शुक्लयजुर्वेदप्रतिशाख्यमिदं प्रकाशितपूर्वमेव वाराणसीत उवटाचार्यभाष्यसंवलितम्; तथापि प्रकृतसंस्करणस्यायमुत्कर्षो यदस्य प्रातिशाख्यस्य सर्वथा नूतना 'ज्योत्स्ना'—भिधा व्याख्या तत्प्रथममिह प्रकाशपदवीमुपनीयते। इयं च ज्योत्स्नाभिधाना व्याख्या न केवलम् अप्रकाशितपूर्वा; किन्तु विद्वन्मण्डलेष्वपि सर्वथाऽविदितपूर्वैव। भारते भारताद्बहिश्च वैदिकसाहित्यविषयकं प्रकाशितमप्रकाशितं ग्रन्थजातं निबन्धजातं च कृत्स्नं क्रोडीकृत्य फ्रांसदेशाभिजनेन लुई-रेनो-इत्याख्येन विदुषा प्रकाशितायाम् 'बिब्लियोग्राफी-वैदिक'-सूच्याम्, अथ च भारतीयविद्वद्धौरेयेण डॉ० रामचन्द्रनारायणदाण्डेकरविदुषा प्रकाशितायां बृहद्ग्रन्थसूचीत्रय्यां वाऽस्या 'ज्योत्स्ना'-टीकाया नास्ति कोऽप्युल्लेखः, इतीदमेव महत्प्रमाणं ग्रन्थस्यास्यापूर्वतायाम्। इत्थमन्यत्र क्वापि दुर्लभेयं ज्योत्स्नाटीका आस्माकीनविश्वविद्यालयस्य विख्याते सरस्वतीभवनमातृकाकोशे समुपलब्धा संस्करणेऽस्मिन् प्रकाश्यते इतीयदेव पर्याप्तं नः परितोषभूम्नः।

सरस्वतीभवनग्रन्थागारे सुरक्षितानां खल्वपूर्वाणां हस्तलिखितग्रन्थानां प्रकाशनं विधेयमिति यः संकल्पोऽस्य विश्वविद्यालयस्य, तस्यैवायं परिणामो यदयं ग्रन्थः सम्प्रति प्राकाश्यमुपनीयते। अस्या ज्योत्स्नाविवृतेर्ये असाधारणा विशेषाः, ते सम्पादकेन साधु स्पष्टीकृता स्वभूमिकायाम्। उवटादिप्रणीतेषु सत्स्वपि टीकान्तरेषु विवृतिरियं नूतना कामं कल्पिष्यते महते प्रयोजनायेति विश्वसिमः।

ग्रन्थस्यास्य सम्पादकैराचार्यश्रीयुगलकिशोरमिश्रैः संस्करणस्यास्य सज्जीकरणे सर्वतोदृष्ट्या महदवहितमिति ग्रन्थशरीरविलोकनेन तद्भूमिकावलोकनेन च स्पष्टं भवेत्। विशेषतश्च स्वभूमिकायां न केवलमेतद्ग्रन्थकारादिसम्बद्धविवरणसंयोजनेन उपकृताः पाठकाः; किन्तु सामान्यरूपेण प्रातिशाख्याभिधां बिभ्रतः सर्वान् ग्रन्थान्, तट्टीकाश्च बह्वीरवलम्ब्य प्रातिशाख्यशास्त्रस्वरूपं, तत्प्रतिपाद्यं, तत्प्रयोजनं, तत्पदव्युत्पादनं, तत्कालविषय आधुनिकानां विदुषां मतवैविध्यम्, एतच्छास्त्रान्तःपातिनां ग्रन्थानां पौर्वापर्यम्, प्रातिशाख्यविषये विद्वद्गोष्ठीषु प्रचलतां केषाञ्चिद् भ्रमाणां परिमार्जनम्, प्रातिशाख्यानां व्याकरणशास्त्रेण सम्बन्धः, तेषां वेदाङ्गभूतायां शिक्षायामन्तर्भावानन्तर्भावपरिप्रश्नः, इतीदृशा बहवो विषया बहुप्रमाणोपन्यासपुरस्सरं साधु विमृष्टाः।

इदं च महद्वैशिष्ट्यमस्या भूमिकाया यदस्यां श्रोत्रियवंशजैर्विद्वद्वरैरेकतो यत्र वैदिकशास्त्रसम्बद्धेषु ग्रन्थेषु परिनिष्ठितं पाण्डित्यं प्रमाणीकृतम्, तत्रापरत आधुनिक-पाश्चात्यपौरस्त्यविद्वत्प्रणीते साहित्येऽपि नदीष्णता प्रादर्शीति स्वयं विदाङ्कुर्वन्तु पाठकाः।

प्रातःस्मरणीयैः सुगृहीतनामधेयैः श्रीगौरीनाथशास्त्रिपादैः श्रोत्रियावतंसैः प्राणपणैरपि श्रौतविद्यारक्षणबद्धपरिकरैः पण्डितश्रीपट्टाभिरामशास्त्रिभिरेतद्ग्रन्थप्रकाशनविषये मङ्गलाशंसनं विधाय ग्रन्थसम्पादको विश्वविद्यालयश्च अनुग्रहपात्रीकृताविति यत्सत्यं धन्यं नः कुलं सर्वम् ।

'सरस्वतीश्रुतिमहती महीयताम्' इति प्रार्थयमानो ग्रन्थरत्नमिदं प्रस्तौमि सुधीसहृदयशयकुशेशयेषु ।

काश्याम्,
श्रीरामनवम्याम्
२०४६ वैक्रमाब्दे

वि० वेङ्कटाचलम्
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी ।

FOREWORD

It pleases me to write this foreword to a hitherto unpublished commentary on Kātyāyana's Prātiśakhya on white-Yajurveda. To our vedic scholars the commentaries of Uvvata and Anantadeva are wel-known. But the present text, known as 'Jyotsna' is yet another commentary which is dated samvat 1737.

The special feature of this work is that it is written on the pattern of Bhattoji's Sidhanta Kaumudi, in which sutras are explained not in the order in which they are found in the Astadhyayi of Panini. The present commentary explains the original text according to Prakriya and Prakarana and this facilitates the understanding of the new entrants with the subject.

Prof. Yugal Kishor Mishra inherits the tradition of a section of the vedic scholars of Varanasi. His grand-father the late Bhagwat Prasad Mishra and his father the late Prof. Gopal Chandra Mishra were reputed teachers of Veda at Sampurnanand Sanskrit University of Varanasi and it is gratifying that he himself is priviledged to carry on the traditions, being Professor of Vedic studies in present times.

In the introduction to the present edition Prof. Mishra has covered a number of important issues. In his opinion Katyayana, the vedic scholar is not identical with Katyayana, the grammarian. Prof. Mishra evinces a first an acquaintance with the intricate issues and their solutions and as such his observations deserve careful study and consideration.

I hope the present edition will be welcomed by scholars working in the field of vedic study.

DR. GAURI NATH SHASTRI
EX. VICE-CHANCELLOR
Sampurnananda Sanskrit University
VARANASI-2

शुभाशंसनम्

भारतमातुः प्राणा वेदाः। मातुः प्राणानां रक्षणाय चिरन्तनास्सततमुद्यता अभवन्। तद्रक्षणाय प्रथम उपायोऽध्ययनम्। अध्ययनञ्च गुरुमुखोच्चारणानूच्चारणम्। यामानुपूर्वीमवलम्ब्य यथोच्चारयति तथैवाऽन्तेवासी अनूच्चारयेत् इति प्रकारो वेदाध्ययनस्य। अन्तेवासिनामुच्चारणं गुरूच्चारणसापेक्षं भवति। उच्चारणसौष्ठवं तदैव निश्चितं भवति यदा गुरूच्चारितानुपूर्वीसदृशानुपूर्वीं शिष्य उच्चारयेत्। अतश्शिष्योच्चारणे गुरूच्चारणसापेक्षताऽस्ति। गुरूच्चारणमपि स्वगुरूच्चारणसापेक्षमेवासीत्,तस्यापि गुरोः स्वगुरूच्चारणसापेक्षतैवेति पूर्व-पूर्वगुरूच्चारणसापेक्षोच्चारणमेव शिष्येषु सिध्यति। अयं प्रकारः पौरुषेयेषु काव्येषु पद्येषु वाक्येषु वा नानुभूयते। यथाऽऽनुपूर्व्या कवयति कविः तत्सदृशानुपूर्वीनिरपेक्ष एव। कविनिर्मितामानुपूर्वीं परिवर्त्योच्चारयितारोऽपि दृश्यन्ते। अतस्सापेक्षोच्चारणविषयत्वं यत्र तत्रापौरुषेयत्वम्, यत्र च निरपेक्षोच्चारणविषयत्वं तत्र पौरुषेयत्वमिति व्यवहारस्सङ्गतः। वेदः पौरुषेय इति साधनं न सुकरम्।

'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥'

—इति मन्त्रं कश्चन रचयामासेत्यङ्गीकृत्य विचारयामः। अग्निर्यज्ञसम्बन्धी देवः, स च होता ऋत्विक्, स सर्वान् देवानाह्वयति, अतिशयेन स रत्नानि धारयति, महानाढ्यस्तमहं स्तौमि इति खल्वस्य मन्त्रस्यार्थः। इममर्थं रचयिता कथमुपलब्धवान्? कस्मादुपलब्धवान्? देवानां पौरोहित्यं कुर्वन्तमग्निं कदा दृष्टवान्? 'ईडे' इत्यत्र डकारस्य लकारं कथं प्रयुक्तवान्? अग्निः कस्मिन् कोशागारे रत्नानि धारयति? इत्यादीनां शतशः प्रश्नानामुत्तरं वक्तव्यं स्याद्रचयित्रा। 'प्रजापतिर्वरुणायाश्वमनयत्, स स्वां देवतामार्च्छत्, स पर्यदीर्यत, स वारुणं चतुष्कपालमपश्यत्, तन्निरवपत्, स वरुणपाशादमुच्यत, यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान् निर्वपेत्'—इति कश्चन वेदसन्दर्भः। अत्राश्वदाता प्रजापतिः, प्रतिग्रहीता च वरुणः। अनन्तरं प्रयुक्तास्तच्छब्दाः प्रजापतिं परामृशन्ति। अन्ते च प्रतिग्रहीत्रा वारुणीष्टिः कर्त्तव्येत्यर्थः प्रतीयते। व्याहृतमिममर्थं रचयिता कथमुपलब्धवान्? वरुणरोगेण ग्रस्तः प्रजापतिः, वरुणदेवताकेष्ट्यनुष्ठानेन प्रजापतिः रोगान्मुक्तः, प्रतिग्रहीत्रा वरुणेनेष्टिः कर्तव्येति विधिर्वदति। किमयं न व्याहृतार्थः। एतादृशमर्थं कः प्रेक्षावान् लिखेत्? एवं सामवेदे 'अग्ने' इत्यस्योच्चारणम् 'अग्नाई' इति भवति। अत्रायीभावः कथमागतः? इत्येवमादयः प्रश्ना न केवलं दुरुत्तराः किन्त्वसमाधेयाः। अतो गुरुमुखोच्चारणानूच्चारणव्यापारादृते नान्यः कश्चन वेदाधिगमायस्ति।

एवं बहुतिथे काले गच्छति चिरन्तनाध्ययनपरिपाट्यां शैथिल्यं किञ्चिदिव लोकानामनुभवन्तो महर्षयः वेदरक्षायै यास्क-कात्यायना-पस्तम्ब-पाणिनि-वसिष्ठ-व्यास-प्रभृतयः निरुक्त-प्रातिशाख्य-व्याकरण-शिक्षाग्रन्थान् प्रवर्तयाम्बभूवुः। इमे ग्रन्थास्सत्यमेव वेददुर्गं प्रवेष्टुं परिखा-प्राकाराधाररूपाः। परिखां प्राकारमाधारञ्चोल्लङ्घ्यैव वेददुर्गद्वारं प्रवेष्टुमर्हन्ति लोकाः। प्रतिशाखं प्रातिशाख्यं भिन्नम्, शिक्षाग्रन्थाश्चभिन्नाः। इमे वेदलक्षणग्रन्थाः कथ्यन्ते। लक्ष्यानुसारेण लक्षणानि प्रवर्तन्त इति नियमः। लक्ष्यैकचक्षुषः खलु महर्षयः। वेदगतं लक्ष्यं पर्यवेक्ष्य तल्लक्षणं कृतं महर्षिभिः। तत्र शिक्षा-प्रातिशाख्यग्रन्थाः प्राधान्येन प्रथममुच्चारणं शिक्षयन्ति। उच्चारणावसरे प्रतिवर्णं स्थान-प्रयत्न-स्वर-कालादयो नियताः। इमान् नियमान् अधिगत्य वयं वेदमुच्चारयितुं न प्रभवामः। उच्चारणन्तु गुरुमुखोच्चारणानूच्चारणविधयैवाधिगन्तव्यम्। वर्णयोर्वर्णानां वाऽन्तराले कालो मात्राभेदेन नियतः। स च शिक्षाप्रातिशाख्यार्थाधिगममात्रेण न सिध्यति। तत्र गुरुमुखोच्चारणमेव शरणीकर्तव्यम्।

तत्र शिक्षा—प्रातिशाख्यग्रन्था विकृतिपाठक्रमे महोपकारकाः। पदेष्वनुलोमेन प्रतिलोमेन चोच्चार्यमाणेषु विशेषेण केचन नियमा उपदिश्यन्ते। अनुलोमेन प्रतिलोमेन च पाठेऽभ्यस्यमाने पूर्वोत्तरभावेन पदानां यः क्रमः स सुदृढो भवति। प्रक्षिप्तमिदं पदमिति कथनस्य कदापि नावसरस्स्यात्। एवं स्वराणां वैपरीत्यं न सम्पादितं स्यात्। एवं वेदरक्षणोपायानां प्रतिपादकाः शिक्षाप्रातिशाख्यग्रन्थाः। तत्र कात्यायनमहर्षिप्रणीतं शुक्लयजुर्माध्यन्दिनशाखामवलम्ब्य प्रवृत्तं प्रातिशाख्यम्। प्रकाशितपूर्वः स ग्रन्थः। सूत्राणां यः क्रमस्तमेवालम्ब्य प्रकाशितः। वेदाचार्य डा० युगलकिशोरमिश्रसम्पादितं वृत्तिसहितं प्रातिशाख्यमवालोकयम्। तत्र मिश्रमहोदयेन किञ्चिद्वैलक्षण्यं सम्पादितमिति प्रसीदामि। प्रक्रियाक्रममवलम्ब्य ग्रन्थोऽयं सम्पादितः। यथा भट्टोजीदीक्षितस्सूत्रक्रमं परित्यज्य प्रक्रियाक्रमेण सूत्राणि योजयति सिद्धान्तकौमुद्यां, तथा डा० मिश्रमहोदयः प्रक्रियाक्रमेण सूत्राणां क्रमं स्वीकृत्य निर्मितं ग्रन्थमिमं सम्पादितवान्, येनाधुनिकच्छात्राणामध्ययने लाघवं भवेत्। लक्ष्याणामाकरस्थानानि पाठभेदांश्च निर्दिश्य ग्रन्थोऽयं सम्पादित इति मनो मे हरति। विद्याकुलशीलावदातः पौरस्त्यपाश्चात्त्योभयविधविचारचर्चानिष्णातः शास्त्रसेवैकव्रती वैदिकग्रन्थप्रणयनप्रकाशनसुकृती संस्कृताचारनिष्ठो वाङ्मयावगाहनान्वेषणादिगुणगणगरिष्ठो वेदविद्वरिष्ठो वाराणसेयसंस्कृतविश्वविद्यालयीयवेदविभागाध्यक्षपदावाप्तप्रतिष्ठो वेदाचार्यादिविविधोपाधिविशिष्टः श्रीमान् युगलकिशोरमिश्रमहोदयो महता श्रमेणाध्यवसायतपसा चापूर्वप्रकाशितं ग्रन्थममुं बहुविधसम्पादनवैशिष्ट्यसंवलितं सुधीजनोपकाराय प्रस्तौतीति भूयो भूयो धन्यवादार्हः। एवमादीनां ग्रन्थानां सम्पादनकार्यमाचरन् पण्डितवरः संस्कृतविश्वविद्यालयस्य गौरवं वर्द्धयतु स्वयञ्च प्रतिष्ठां लभतामिति पार्वतीपरमेश्वरं स्तौमि।

वाराणसी
३-४-१९८८

पट्टाभिरामशास्त्री
'पद्मभूषणम्'

विषयानुक्रमणिका

वर्णोच्चारणप्रकरणम्

विशेषप्रकरणम्

भूमिका

वैदिकवाङ्मये प्रातिशाख्यशास्त्रस्य समस्ति विशिष्टं स्थानम्। शास्त्रमिदं व्याकरणस्य शिक्षायाश्च पूरकमुपाङ्गं विद्यते। अत्र ते संशयाः सविशेषं विवेचिताः ये लौकिकव्याकरणज्ञातॄणां व्यामोहमुत्पादयन्ति। अत्रेदमवधेयम्भवति यत् प्रतिवेदम् उच्चारणशैल्याः किमपि वैशिष्ट्यं विद्यते, अतश्च तासां कृते विशेषनियमाः प्रतिपादिताः सन्ति। उच्चारणशैल्याः विभिन्नतायाः मूलस्रोतः ध्वनयः, ध्वनीनाञ्च मूलस्रोतः स्थानकरणप्रयत्नाः सन्ति। एषां पारस्परिकेण सूक्ष्मसंयोजनेन संघर्षतया च ध्वनिः वर्णत्वमापद्यते। वर्णेषु बाह्याभ्यन्तरपरिस्थितिवशात् विभिन्नवर्गाणां निष्पत्तिः भवति। वर्गाक्षराणां पारस्परिकसन्निकर्षतया ध्वनिपरिवर्त्तनं वर्णपरिवर्त्तनं वा। निसर्गसिद्धस्यास्य ध्वनिविज्ञानस्य सन्धिविज्ञानस्य च यादृग् विश्लेषणं प्रातिशाख्यग्रन्थेषु समुपलभ्यते तादृगन्यत्र दुर्लभम्। किञ्च ध्वन्यभिव्यक्तेः उदात्तानुदात्तस्वरितविषयात्मिका पद्धतिः स्वतन्त्रतया विराजते, यस्याः व्यवहारः केवलमद्यत्वे वेदोच्चारणेष्वेव दृश्यते। अत्र वैषम्यं शैथिल्यं वा न भवेदेतदर्थं प्रातिशाख्येषु सूक्ष्मेक्षिकया बहु विवेचितम्। अतएव अनादिसिद्धपरम्परयानुस्यूतानां वेदानाम्मध्ये वर्णोच्चारणे स्वरधर्मविषये किञ्चिन्मात्रमपि पाठान्तरं नास्ति। तस्मात् प्रातिशाख्यानामनुशीलनं भारतीयवाङ्मयस्य महदुपकाराय कल्पते।

विषय-वस्तुदृष्ट्याऽपि प्रातिशाख्यग्रन्थानामपूर्वं किञ्चिद्वैशिष्ट्यमनुभूयते। क्रमपाठ-क्रमहेतु-पारायणविध्यादि कतिपये विषया एतादृशाः प्रतिपादिताः सन्ति येषामन्यत्रोपलब्धिर्नं दृश्यते। न केवलमेतावदेव अपितु वैदिकमन्त्राणां स्वरज्ञानविषये पदार्थज्ञाने च प्रातिशाख्यग्रन्थानां महत्त्वपूर्णं स्थानं विद्यते। तदत्र प्रातिशाख्यविषयकं किमपि विचारचिन्तनं चर्च्यते।

प्रातिशाख्यशास्त्रस्य समुद्भवः

पुरा वेदानां कण्ठस्थधारणपरम्परा न केवलम् अतीव सुदृढाऽऽसीत् अपितु स्वाधीतवेदग्रन्थस्य कण्ठस्थपारायणधारा ब्रह्मयज्ञरूपेण नियमिततया प्रवर्तिताऽऽसीत्।[1] परवर्तिनि काले आश्रमव्यवस्थायाः शैथिल्यात् शास्त्रोक्तनियमपालने प्रमादवशात् मानवजीवनस्य भौतिकपदार्थोन्मुखतया च वेदग्रन्थानां संरक्षणे तदभ्यासे च कश्चन ह्रासक्रमः प्रादुर्बभूव। आचार्यास्तु वैदिकमन्त्राणामुच्चारणे लेशमात्रमपि विपर्यासो माभूदिति धिया वर्ण-पद-सन्धि-स्वर-मात्रादि विषयकाणां विशिष्टनियमानां, पाठसुरक्षार्थं ग्रन्थरूपेण लेखनमावश्यकमेवेति मेनिरे। अतश्च प्रतिचरणं तदन्तर्गतशाखानां च कृते तत्तत्सम्प्रदायाधिकृताः मान्याचार्यवर्याः विभिन्नप्रातिशाख्यग्रन्थान् रचयामासुः।

---

१. 'अहरहः स्वाध्यायमधीयीत' श० ब्रा० ११।५।६।३

प्रातिशाख्यसंज्ञायाः प्रवृत्तिनिमित्तम्

वाजसनेयिप्रातिशाख्यस्य भाष्यकारः अनन्तदेवः प्रातिशाख्यपदमेवं निर्वक्ति-"शाखायां शाखायां प्रति प्रतिशाखम् । प्रतिशाखं भवमिति प्रातिशाख्यम् ।"[1] व्युत्पत्ति-मिमामाधारीकृत्य कतिपये आधुनिकाः विद्वांसः यावत्यः वेदशाखाः आसन् तावत्संख्याकाः प्रातिशाख्यग्रन्था अप्यासन्निति संभावयन्ति ।[2]

यास्काचार्यस्य—"पदप्रकृतीनि सर्वचरणानि पार्षदानि"[3] इत्युल्लेखेन प्रतिभाति यत् प्रातिशाख्यग्रन्थानां प्रवृत्तिः वेदचरणानाधारीकृत्य वर्त्तते, न तु वेदशाखाः । इदमत्रावधेयं यत् शाखा-चरणशब्दौ पर्यायवाचिनौ न स्तः । चरणपदं शाखासमूह-वाचकमस्ति । चरणस्यैवावान्तरो विभागः शाखेति नाम्ना व्यवह्रियते । तथ्यमिदं द्वादशशताब्द्याः भोजवर्ममहीपतेः ताम्रलेखेनापि सुपुष्टं भवति । लेखस्त्वित्थम्—"**जमदग्निप्रवराय वाजसनेयचरणाय यजुर्वेदकण्वशाखाध्यायिने**"[4] इति । प्रातिशाख्य-भाष्यकर्त्रा अनन्तदेवेनापि एकत्र संकेतितं यत् काण्वादिपञ्चदशशाखासु एकमेव प्रातिशाख्यमिति[5] । काण्वादिपञ्चदशशाखावाङ्मयं वाजसनेयचरणान्तर्गतमेवेति पूर्वोद्धृतताम्रपत्रलेखेन सुस्पष्टं प्रतीयते । भट्टकुमारिलवर्येणापि तन्त्रवार्तिकग्रन्थे प्रातिशाख्यग्रन्थानां चरणानुसारिणी प्रवृत्तिरेव संकेतिता वर्तते ।[6] तैत्तिरीयप्रातिशाख्यस्य भाष्यकारेण गोपालयज्वमहोदयेन एकवेदीयप्रातिशाख्यस्य तद्वेदीयानेकशाखोपरि साधारणतया उपपत्तिः स्वीकृता । यथा—ऋग्वेदप्रातिशाख्यस्य सम्बन्धः ऋग्वेद-गताभ्यां शाकल-बाष्कलशाखाभ्यां सह वर्तते । किञ्च गोपालयज्वमहोदयानामभिमत-मस्ति यत्—तैत्तिरीयप्रातिशाख्यग्रन्थे यान्युद्धृतानि उदाहरणानि तैत्तिरीयसंहितायां नोपलभ्यन्ते, तेषां सम्बन्धः नूनं ताभिः वेदशाखाभिः वर्तते, याः शाखाः साम्प्रतं नोपलभ्यन्ते ।[7]

---

१. वा० प्रा० १।१ सूत्रे अनन्तदेवः ।

२. डा० सूर्यकान्तः ऋ० तं० पृ० २, अ० प्रा० पृ० ३० ।

३. निरुक्तम्—१ ।

४. Inscriptions of Bengal, Volume III published by the Varendra Research Society, Rajashahi, 1929. p. 21.

५. 'तस्मात्सिद्धं काण्वादि पञ्चदशशाखासु एकमेव प्रातिशाख्यमिति ।' वा० प्रा० १।१, अनन्तः ।
'सूत्रकारस्य बहुशाखोपरि तन्त्रेण प्रवृत्तत्वात्' वा प्रा. १।१२२ अनन्तः ।

६. 'धर्मशास्त्राणां गृह्यग्रन्थानाञ्च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठव्यवस्थोप-लभ्यते ।' तं० वा० ५।१।३ ।

७. वीत्युपबन्धस्य व्यावर्त्यं शाखान्तरे । नन्वेवमनेकशाखाविषयत्वे प्रातिशाख्यमिति ग्रन्थस्य आख्या विरुद्ध्यते । नैतदस्ति । द्वि-त्रिशाखाविषयत्वेऽपि तदसाधारणतया उपपत्तेः । तथा बह्वृचानां शाकलबाष्कलात्मकशाखाद्वयविषयं प्रातिशाख्यं प्रसिद्धम् । एवमुत्तरत्रापि द्रष्टव्यम् ।

कतिपये आधुनिकाः विद्वांसोऽपि मन्यन्ते यत् एकस्य प्रातिशाख्यग्रन्थस्य सम्बन्धः नैकाभिर्वेदशाखाभिः सह वर्तते ।[१] प्रातिशाख्यपदं चरणवाचीति मन्वानो युधिष्ठिरमीमांसकमहोदयः प्रातिशाख्यपदमेवं निर्वक्ति—"शाखां शाखां प्रति प्रतिशाखम् । प्रतिशाखेषु भवं प्रातिशाख्यम्" ।[२]

यदि प्रत्येकशाखामवलम्ब्य प्रातिशाख्यशास्त्रस्य प्रवृत्तिनिमित्तं स्वीक्रियते चेत् भगवत्पतञ्जलिद्वारा ज्ञापिताभ्यः ११३१ शाखाभ्यः तावत्संख्याकाः प्रातिशाख्यग्रन्थाः स्वीकरणीयाः स्युः । वेदशाखानुपलब्धिदृशा, यवनशासनकाले भारतीयवाङ्मयविनष्टिदृशा वा प्रातिशाख्यग्रन्थानामप्यनुपलब्धिः कल्पनीयेति चेत्, न । संहिता—ब्राह्मण—सूत्रग्रन्थानामिव शाखान्तरीयाणां द्वित्राणां प्रातिशाख्यग्रन्थानामदर्शनात् अन्येषु ग्रन्थेषु संकेताभावाच्च ।

ननु प्रतिशाखानुसारं प्रातिशाख्यग्रन्थानुपलब्धित्वे अनन्तदेव-गोपालयज्वप्रभृत्याचार्याणां प्रातिशाख्यपदव्युत्पत्तिः कथं संगच्छत इत्याशङ्कायामुच्यते—

पाणिनीयसूत्रानुसारं 'प्रति' इति पदस्य लक्षणे, इत्थंभूताख्याने, भागे, वीप्सायाञ्च प्रयोगव्यवस्था वर्त्तते ।[३] तत्र वोप्सार्थस्वीकारे प्रत्येकशाखामुद्दिश्य प्रातिशाख्यग्रन्थप्रवृत्तिप्रसङ्गः समुदेति । यदि लक्षणार्थे प्रतीति पदस्य प्रयोगः स्वीक्रियते चेत् प्रत्येकशाखामुद्दिश्य प्रातिशाख्यकल्पनायाः अवसरो नास्ति ।

"प्रतिवृक्षं विद्योतते विद्युत्" इत्याद्युदाहरणेषु यथा विद्युदेकत्वेऽपि तस्याः सम्बन्धः प्रतिवृक्षमस्ति तथैव एकस्य प्रातिशाख्यग्रन्थस्य स्वचरणान्तर्गतानेकशाखाभिः सह सम्बन्धवचनं सुकरम् । तत्त्वबोधिनीकारास्तु अमुमेव लक्ष्यलक्षणभावरूपेण प्रतिपादयन्ति ।[४]

परिमुखादिगणपठितप्रतिशाखशब्दात् भवार्थे प्रत्यये कृते प्रातिशाख्यपदस्य सिद्धिर्भवति ।

प्रातिशाख्यग्रन्थानां कालविचारः

भारतीयाचार्याणां स्वीयैतिह्यलेखने प्रवृत्तिर्नासीत् । ग्रन्थकाराणां लक्ष्यं केवलं ज्ञानवृद्धिरासीत् । आत्मख्यापने ते औदासीन्यं भजन्ते स्म । अतएव प्रायशः भारतीय-

---

१. S. Varma : Critical studies in the phonetic observation of Indian Grammarians. p. 12.
बलदेव उपाध्याय : वैदिक साहित्य और संस्कृति पृ० २९९ ।

२. द्र० संस्कृत व्याकरण शास्त्र का इतिहास, भाग—२, पृ० २८५-८६ ।

३. 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (पा० १।४।९०) ।

४. 'लक्षणे वृक्षं प्रति विद्योतते विद्युत्' (सि० कौ० १।४।९०) ।
'वृक्षसम्बन्धिविद्योतनमर्थः, सम्बन्धश्च लक्ष्यलक्षणभाव इति प्रत्यादयो द्योतयन्ति' (त० बो० १।४।९०) ।

ग्रन्थकाराः स्वविषये कालविषये च किमपि न लिलिखुः। प्रातिशाख्यग्रन्थकृद्भिरपि स्वविषये किमपि न संकेतितम्। तैत्तिरीयप्रातिशाख्यकर्तुर्नाम एव इदानीं यावत् न ज्ञातमस्ति। येषां नामानि उपलभ्यन्ते तेषां विषयेऽपि सन्देह एव जायते यत् ते प्रातिशाख्यग्रन्थस्य कर्त्तारः सन्ति उत वा उपदेशका इति। अतः प्रातिशाख्यग्रन्थकाल-विषये नास्ति किमपि सुनिश्चितं मतम्।

बहुभिः पाश्चात्यैर्विद्वद्भिः भारतीयमनीषिभिश्च कालनिर्धारणविषये बहुप्रयतित-मथापि मतभेदाः सन्ति। विचारचर्चायाः आधारभूतं तथ्यमिदमस्ति यत् प्रातिशाख्य-ग्रन्थानां रचना पाणिनिकालात् पूर्वं जाता उत वा पश्चात्। प्रश्नस्यास्य समाधाने विचारकैः प्रातिशाख्येषु पाणिनिकृताष्टाध्यायीग्रन्थे च प्रयुक्तानां पारिभाषिकपदानां, ग्रन्थरचनाशैल्याः, तत्र तत्रोल्लिखिताचार्यनाम्नां च तुलनात्मकमध्ययनं सम्पादितम्। लाइबिज—मैक्समूलर—वेबर—राथप्रभृतयो विद्वांसः प्रातिशाख्यानां रचनाकालः पाणिनिकालात् प्राक् मन्यन्ते। परं गोल्डस्टकरमहोदयस्याभिमतं वर्तते यत् समेऽपि प्रातिशाख्यग्रन्थाः पाणिनिकालादर्वाचीनाः सन्ति। पाणिनिमहोदयस्य कालः ५०० ई० पू० ऐतिहासिकैः सामान्यतः स्वीक्रियते।

पाणिनिकृताष्टाध्यायीग्रन्थेन सह प्रातिशाख्यसूत्रतुलनाधारेण केषाञ्चन विचारकाणामभिमतं वर्तते यत् ऋग्वेदप्रातिशाख्यम्, वाजसनेयिप्रातिशाख्यम्, तैत्तिरीय-प्रातिशाख्यम्, चतुराध्यायिका, ऋकतन्त्रमित्येते ग्रन्थाः पाणिनिपूर्वकालिकाः सन्ति। अथर्ववेदप्रातिशाख्यं तु निश्शंकं पाणिनिमहोदयस्याविर्भावादनन्तरं विरचितमस्ति। एवं च सति अथर्ववेदप्रातिशाख्यं विहाय सर्वेषां प्रातिशाख्यग्रन्थानां कालस्य अर्वाक्तना सीमा पाणिनिमहोदयस्याविर्भावकालो वर्तते।[1] प्रातिशाख्यग्रन्थरचनायाः उच्चतमा सीमा यास्काचार्यस्य कालो विद्यते, यतोहि ऋग्वेदप्रातिशाख्ये (१७/४२) यास्काचार्यस्य नामोल्लेखः वर्त्तते। एतेनेदं ज्ञायते यत् ऋग्वेदप्रातिशाख्यस्य रचना यास्काविर्भाव-कालादनन्तरं जाता। प्रायशो विद्वांसः यास्काचार्यस्य कालं ७०० ई० पू० मन्यन्ते। श्रीयुधिष्ठिरमीमांसकमहोदयस्तु पार्षद-(= प्रातिशाख्य-) ग्रन्थानां प्रवचनकालं विक्रमतः त्रिसहस्रवर्षपूर्वमपिसम्भावयति।[2]

प्रातिशाख्यशास्त्रस्य पर्यायवाचिसंज्ञाः

प्रातिशाख्यशास्त्रस्य कृते पार्षदानि, पारिषदसूत्रम् इति पदस्य वा व्यवहारः दृश्यते। निरुक्तकृता यास्केन प्रातिशाख्यशास्त्रस्य कृते पार्षदमिति संज्ञायाः व्यवहारः कृतः। ऋग्वेदप्रातिशाख्यस्य प्रत्यध्यायान्तपुष्पिकायां भाष्यकृता उवटेन पार्षदमिति संज्ञाया एव प्रयोगः कृतः। वर्गद्वयवृत्तिकारेण विष्णुमित्रेणापि पार्षदमिति संज्ञाया एव व्यवहारः कृतः। पर्षत्, परिषच्चेत्येतौ समानार्थकौ शब्दौ स्तः। उभयोरपि लोक-

---

१. द्र० डा० रामगोपाल : वैदिक व्याकरण पृ० ७।
   डा० सूर्यकान्त : अथर्वप्रातिशाख्यम् पृ० ६४।

२. द्र० संस्कृत व्याकरणशास्त्र का इतिहास, भाग : २ पृ० २९०।

प्रसिद्धोऽर्थः 'सभा' 'गोष्ठी' वेति। प्राक्तनकाले एतादृश्यः परिषदः संगठिता आसन् यासु ध्वनिविज्ञानव्याकरणादि विषयकाः विचाराः नियमेन चर्च्यन्तेस्म। अत्र समानचरणाः विभिन्नशाखाध्येतारः सम्मिलिताः सन्तः विचारयन्ति स्म। एवमादि परिषत्सम्बद्धतया प्रातिशाख्यानि 'पार्षदानि' 'पारिषदसूत्रं' वेत्याख्यां भजन्ते। निरुक्तभाष्यकर्त्रा दुर्गेण पार्षदपदविषये उक्तम्—'स्वचरणपरिषदेव यैः प्रतिशाखानियतमेव पदावग्रहप्रगृह्य-क्रमसंहिता-स्वरलक्षणमुच्यते तानीमानि पार्षदानि प्रातिशाख्यानीत्यर्थः।'[1]

प्रातिशाख्यग्रन्थानां संख्या

कति प्रातिशाख्यग्रन्थाः आसन्नित्यस्मिन् विषयेऽप्यस्ति विचारभेदः। कतिपये ग्रन्थाः एतादृशाः सन्ति येषां गणना केचित् प्रातिशाख्ये कुर्वते, केचित्तु न। समुपलब्धग्रन्थेषु पञ्चप्रातिशाख्यग्रन्थाः सविशेषं महत्त्वं धारयन्ति। ते च सन्ति—

(१) ऋग्वेदप्रातिशाख्यम् (ऋग्वेदस्य)।

(२) तैत्तिरीयप्रातिशाख्यम् (कृष्णयजुर्वेदस्य)।

(३) वाजसनेयप्रातिशाख्यम् (शुक्लयजुर्वेदस्य)।

(४) चतुरध्यायिका (अथर्ववेदस्य)।

(५) अथर्वप्रातिशाख्यञ्च (अथर्वस्यैव)।

तत्र प्रथमस्य सम्बन्धः ऋग्वेदेन सह, द्वितीयस्य कृष्णयजुर्वेदेन, तृतीयस्य शुक्लयजुर्वेदेन, चतुर्थपञ्चमयोः सम्बन्धः अथर्ववेदेन सह वर्तते। सामसम्बद्धाः ऋक्तन्त्र-सामतन्त्र-अक्षरतन्त्र—पुष्पसूत्रञ्चेति चत्वारः प्रातिशाख्यग्रन्थाः सन्तीति पं० ए.एम. रामनाथदीक्षितमहोदया अभिप्रयन्ति।[2] पं० युधिष्ठिरमीमांसकमहोदयेन सूचीपत्राधारेण प्रकीर्णलेखसंकेताधारेण च बाष्कलप्रातिशाख्य—शांखायनप्रातिशाख्य-चारायणीयप्रातिशाख्यग्रन्थानामुपलब्धिसंभावना कृता।[3] मैत्रायणीयचरणस्य कश्चित् प्रातिशाख्यग्रन्थः आसीदिति सातवलेकरसम्पादितमैत्रायणीयसंहितायाः प्रस्तावनायां श्रीधरअण्णाशास्त्रीवारे महोदयाः संभावयन्ति।

प्रातिशाख्यानामङ्गत्वविचारः

प्रातिशाख्यशास्त्रस्य वैदिकवाङ्मये समस्ति महत्त्वपूर्णं स्थानम्। परं प्रातिशाख्यशास्त्रस्याङ्गत्वविषये मतभेदाः समुपलभ्यन्ते। पाणिनीयशिक्षाप्रतिपादितेषु षडङ्गेषु प्रातिशाख्यशास्त्रस्य समावेशो नास्ति।[4] वेदानामध्ययनाध्यापने तत्संरक्षणे च

---

१. नि० १।१७ दुर्गवृत्तिः।

२. 'सन्ति सामवेदे चत्वारि प्रातिशाख्यानि—ऋक्तन्त्रम्, सामतन्त्रम्, अक्षरतन्त्रम्, पुष्पसूत्रञ्चेति'। (सामतन्त्रभूमिका पृ० ३)।

३. संस्कृत व्याकरणशास्त्र का इतिहास, भाग—२ पृ० २८४।

४. द्र० पा० शि० ४१-४२।
'शिक्षा कल्पोव्याकरण निरुक्तं छन्दोज्योतिषमिति षडङ्गानि'। च०व्यू० २ खं०।

महदुपकृतवतां प्रातिशाख्यग्रन्थानां षडङ्गानन्तर्गतत्वं वैचित्र्यमावहति। कैश्चित्तु प्रातिशाख्यशास्त्रमुपाङ्गतया परिगृह्यते।[१] आधुनिकास्तु विचारकाः विषयेऽस्मिन्नौदासीन्यं भजमानाः—शास्त्रस्यास्य भूयान् सम्बन्धः शिक्षाशास्त्रेण सह वर्तत—इति प्रतिपादयन्ति।[२] तेषामभिमतं विद्यते यत् शिक्षाशास्त्रप्रतिपाद्याः विषयाः तैत्तिरीयशिक्षाध्यायोक्ताः प्रातिशाख्यग्रन्थेषु विवेचिताः सन्ति। ते च षट् यथा[३]—

वर्णः—उच्चारणीयाः अकारादिस्वराः व्यञ्जनानि च।
स्वरः—अकारादिस्वरवर्णधर्मा उदात्तादयः स्वराः।
मात्रा—उच्चारणकालः तदनुगता संज्ञा च।
बलम्—उच्चारणापेक्षितबाह्याभ्यन्तरप्रयत्नौ।
साम—अक्षराणां द्रुतादिवृत्तयः उत वा साम्येनोच्चारणम्।
सन्तानम्—प्रयोगे अध्ययनकाले वा समपेक्षितसन्धयः।

एते शिक्षाप्रतिपाद्यविषयाः प्रातिशाख्यग्रन्थेषु संगता भवन्तीत्येतस्मात्कारणात्प्रातिशाख्यशास्त्रं शिक्षान्तर्गतमिति विचारकाणामभिमतम्।

अत्र केचिदेवमाशेरते—

(क) प्रातिशाख्यानि वैदिकसंहितागतानि ऋक्पदान्याधारीकृत्य स्वविधानं प्रतिपादयन्ति। अतएव निरुक्तग्रन्थेऽप्यभिहितम्—"पदप्रकृतीनि सर्वचरणानां पार्षदानीति।"[४] शिक्षाग्रन्थेषु पदान्याधारीकृत्य नानुशासनं विद्यते, अपितु शास्त्रीयवर्णानां उदात्तादिस्वरधर्माणां तदीयोच्चारणपरम्परासम्बद्धान्यनुशासनानि मुख्यरूपेण निरूपितानि सन्ति।

(ख) आचार्यवर्यो दुर्गः प्रातिशाख्यशास्त्रस्य मुख्य प्रतिपाद्यविषये वक्ति यत्—पदज्ञापनं, पदेषु अवग्रहविधानम्, प्रगृह्या-प्रगृह्यविचारः, क्रमपाठचिन्तनम्, पदपाठस्यसंहितापाठनिष्पादनम्,—इत्येवमादयो विषयाः मुख्यतया सन्ति।[५] शिक्षाग्रन्थेषु एतेषां विषयाणां समावेशो नास्ति, न चैतद्विषयकं किञ्चिदुपलभ्यते च।

---

१. 'प्रतिपदं चानुपदं छन्दोभाषासमन्वितम्।
मीमांसा न्यायतर्कश्च उपाङ्गानि विदुर्बुधाः'॥ तै० प्रा० पृ० ५२९।
छन्दोभाषा = प्रातिशाख्यम्।

२. "ततः प्रातिशाख्यं शिक्षाभवितुमर्हतीति निश्चिनोमि।" पं० ए० एम० रामनाथदीक्षितः, सामतन्त्रम् भूमिका पृ० २।

३. 'शीक्षां व्याख्यास्यामः। वर्णः, स्वरः, मात्रा, बलं, साम, सन्तानः। इत्युक्तः शीक्षाध्यायः। तै० उ० १।२।

४. नि० १।१७।

५. "पार्षदानि स्वचरणपर्षद्येव यैः प्रतिशाखानियतमेव पद-अवग्रह-प्रगृह्य-अप्रगृह्य-क्रमसंहितास्वरलक्षणमुच्यते तानीमानि पार्षदानि प्रातिशाख्यानीत्यर्थः"। नि० १।१७ दुर्गः।

(ग) शिक्षाशास्त्रात् पृथक्तया प्रातिशाख्यशास्त्रं स्वतन्त्रप्रस्थानतया विराजते । एतदुपोद्बलकं भाष्यकर्तुः उवटस्येदं कथनं महत्त्वपूर्णमस्ति—

"वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य । शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते ।"[1]

(घ) तैत्तिरीयप्रातिशाख्यस्य भाष्यकारः गोपालयज्वमहोदयः प्रातिशाख्यं स्वतन्त्रशास्त्रं मन्वानः इदं शिक्षाव्याकरणयोः विवरणात्मकग्रन्थरूपं स्वीचक्रे ।[2]

(ङ) ननु शास्त्रद्वयस्य विवरणात्मकत्वात् प्रातिशाख्यशास्त्रेण कस्याप्येकस्य शास्त्रस्यान्तर्गतेन भाव्यमिति चेत्, मैवम् । पदार्थद्वयसम्मिश्रणेन विजातीयगुणधर्मानुगतस्य कस्य चनापूर्वस्य स्वतन्त्रसिद्धस्य विशिष्टपदार्थस्य जन्यमानत्वात् । यथा वाजसनेयिप्रातिशाख्ये स्वतन्त्रसत्तायुक्तस्य स्वरितस्वरस्य निष्पत्तिप्रसङ्गे उवटाचार्यो निरूपयति— "यथा त्रपुताम्रयोः संयोगे धात्वन्तरस्य कांस्यस्योत्पत्तिः यथा वा गुडदध्नोरेकीभावे मार्जिकोत्पत्तिः, एवमुदात्तानुदात्तसंयोगे स्वरितोत्पत्तिः" । उदाहरणेनानेन यथाऽऽचार्येण स्वरितस्वरस्य पृथक् सत्ता स्थिरीकृता,[3] एवमेव शास्त्रद्वयस्य विवरणात्मकत्वेऽपि प्रातिशाख्यानि स्वतन्त्रशास्त्रतया स्वीकरणीयानि ।

(च) किञ्च तैत्तिरीयशिक्षाध्याये शिक्षायाः सामान्यप्रतिपाद्यविषयाः वर्णिताः सन्ति ।[4] शिक्षाग्रन्थलक्षणपर्यालोचनेनेदं स्पष्टं भवति यत् शिक्षाशास्त्रेषु वर्णस्वराद्युच्चारणविषयकाः मौलिकनिर्देशाः विचाराश्च सन्ति ।[5] परं प्रातिशाख्यानां मुख्यं प्रतिपाद्यं भिन्नमस्ति । तत्र पदपाठेन संहितापाठस्य निष्पादनम्, सांहितिकसन्धीनामुदात्तादिस्वरधर्माणाञ्च विवेचनम्, क्रमपाठनिरूपणमित्येवमादयो विषयाः सन्ति । अतश्च एकत्र शिक्षाशास्त्रं वेदोच्चारणपरम्परायाः प्रज्ञापकमङ्गमस्ति अपरत्र प्रातिशाख्यं वैदिकपदस्वरूपबोधकं तद्व्याख्यापादकं तद्विवेचकं च शास्त्रमस्ति ।

(छ) यद्यपि शिक्षायाः प्रतिपाद्यविषयः सन्तानम् (संस्कारः) अपि वर्तते, परं विषयस्यास्य सर्वाङ्गतया विवरणं कस्मिन्नपि शिक्षाग्रन्थे नास्ति । एतद्विपरीततया सन्तानविषयकः समग्रोपदेशः व्याकरणशास्त्रे वर्णितोऽस्ति । अतएव सायणाचार्यैः

---

१. वा० प्रा० १।१६९ उवटभाष्यम् ।

२. 'शिक्षाव्याकरणानां यदयं विवरणात्मकः ।
ग्रन्थस्ततोऽत्र नातीव शब्दसंकोच इष्यते' ।। तै० प्रा० १।२१ भाष्ये ।

३. वा० प्रा० १।१२६ उ० भा० ।

४. तै० उ० १।२ ।

५. 'वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा' । ऋ० भा० भू० पृ० ४९ ।
'शिक्षा स्वरवर्णोच्चारणं शास्त्रम् । शिक्षाणां यथोदितस्वरं वर्णोच्चारणम्' ।
शि० सं० पृ० ३८५ ।
द्र० आचार्य दुर्गवृत्तिः नि० पृ० २ ।

सन्तानविषये—"एतच्च व्याकरणेऽभिहितत्वात् शिक्षायामुपेक्षितम्" इत्यभिहितम्[१]। एतेन स्पष्टं भवति यत् शिक्षाप्रतिपाद्याः षड् विषयाः सर्वाङ्गीणतया शिक्षाग्रन्थेषु न सन्ति। एते विषयाः यदि प्रातिशाख्यादिषु निरूपिताः प्राप्यन्ते चेत् ते अवश्यं ग्राह्या भवन्ति एवञ्च तेषां प्रतिपादकग्रन्थाः स्वतन्त्रशास्त्रतया मन्तव्याः भवन्ति, न तु शिक्षाङ्गतया। अतश्च प्रातिशाख्यं स्वतन्त्रशास्त्रं सिद्ध्यति, यन्न शिक्षाङ्गमपितु स्वतन्त्रतया उपाङ्गमस्ति।

प्रातिशाख्यानां प्रयोजनम्

वेदोच्चारणपरम्परायाः संरक्षणं तद्गतवैशिष्ट्यञ्च कथं सुरक्षितं भवेत् इत्यासीत् काचिच्चिन्ता तदानीन्तनाचार्यवर्याणाम्। एतत्परिहारार्थं आचार्यवर्यैः प्रातिशाख्य-शास्त्रं प्रवर्त्तितम्। अतएव उवटाचार्येण स्वकीयभाष्यप्रारम्भे प्रातिशाख्यप्रयोजनमनु-लक्ष्योक्तम्—

"जपादौ नाधिकारोऽस्ति सम्यक् पाठमजानतः।
प्रातिशाख्यमतो ज्ञेयम् सम्यक्पाठस्य सिद्धये" ॥[२]

तात्पर्यमिदं वर्तते यद् वेदानां सम्यक्पाठसिद्धिः प्रातिशाख्यमन्तरा न भवितु-मर्हति। अस्माद्धेतोः सम्यक्पाठसिद्धिः प्रातिशाख्यशास्त्रस्य परमं प्रयोजनम् अस्ति। प्रातिशाख्यकारेण भगवता कात्यायनेनापि सूत्रे कथितं यद्, वर्णानां ये दोषाः तेषां विवेकार्थं प्रातिशाख्यशास्त्रमध्येतव्यम्।[३] यावता पदानां साधुस्वरूपं तदुच्चारणया-थार्थ्यञ्च परिज्ञातं न भवति तावता शुद्धप्रयोगः कर्तुं न पार्यते। प्रातिशाख्यशास्त्रेण वैदिकपदानां वर्णानाञ्च साधुस्वरूपज्ञानं भवति, तज्ज्ञानेन च दोषाणां पृथक्करणं सम्भवति। अतश्च वैदिकपदानां वर्णानाञ्च शुद्धस्वरूपरक्षा प्रातिशाख्यस्य प्रथमं प्रयोजनमस्ति। वैदिकाभरणकारस्तु-गुरुत्व-लघुता-साम्यमिति प्रयोजनानि मनुते।[४] तैत्तिरीयप्रतिशाख्यग्रन्थे वर्णितमस्ति यत् वेदाध्यायिभिः गुरुत्व-लघुता-साम्य-ह्रस्व-दीर्घ-प्लुत-लोपागम-विकार-प्रकृतिभाव-विक्रम-क्रम-स्वरितोदात्त-श्वास-नादाङ्गादीनि प्रत्येतव्यानि।[५] अपरत्र च तैतिरीयप्रतिशाख्ये उक्तम्—यः पदपाठक्रमपाठयोर्भेदं

---

१. 'सन्तानः संहिता। वायवायाहि (ऋ० १।२।१) इत्यत्रावादेशः, इन्द्राग्नी आगतम् (ऋ० ३।१२।१) इत्यत्र प्रकृतिभावः, इत्यादि। एतच्च व्याकरणेऽभिहितत्वात् शिक्षायामुपेक्षितम्'। ऋ० भा० भू० पृ० ५०।

२. वा० प्रा० १।१ प्रारम्भिकश्लोकः।

३. 'वर्णदोषविवेकार्थम्'। वा० प्रा० १।२६।

४. 'अथ किमर्थं प्रतिशाख्यं नाम लक्षणं प्रणीयते? तदुच्यते—गुरुत्वं लघुता साम्य-मित्यादि सर्वं तु विज्ञेयं इति वक्ष्यति। तै० प्रा० १।१ भाष्यम्।

५. 'गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च।
लोपागमविकारांश्च प्रकृतिविक्रमः क्रमः।
स्वरितोदात्तनीचत्वं श्वासोनादोऽङ्गमेव च।
एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता ॥ तै० प्रा० २४।५।

जानाति यश्च स्वरमात्राविभागज्ञः स आचार्यत्वं प्राप्नोति।[1] एभिर्विधानैरिदं ज्ञातं भवति यदाचार्यत्वं गुरुत्वलघुतादिज्ञानसापेक्षम्। एतेषां ज्ञानं प्रातिशाख्यशास्त्रेण भवति। यद्यपि गुरुत्वादिविषयाणां प्रतिपादनं शिक्षाव्याकरणादि ग्रन्थेष्वपि विद्यते तथापि विप्रकीर्णत्वात्, विषयविभागज्ञानाभावात्, प्रतिशाखं विशेषनिरूपणाभावाच्च तत्र गुरुत्वादिविषयाणां सुगमावबोधो न भवति। परं प्रातिशाख्यग्रन्थेषु तु समेषामेतेषां विषयाणां सुसम्बद्धक्रमेण प्रतिशाखमनुलक्ष्यप्रतिपादनात् सारल्येन बोधः भवति। अतश्च प्रतिवेदशाखाविशेषस्वरूपपरिज्ञानार्थं प्रातिशाख्यग्रन्थाः निर्मिताऽभूवन्। ऋग्वेदप्रातिशाख्यभाष्यारम्भे उवटाचार्येण प्रयोजनं प्रतिपादयता समुक्तम्—

शिक्षाच्छन्दोव्याकरणैः सामान्येनोक्तलक्षणम्।
तदेवमिह शाखायामिति शास्त्रप्रयोजनम्॥[2]

प्रातिशाख्यशास्त्रस्य प्रतिपाद्यम्

प्रातिशाख्यग्रन्थानां सम्बन्धः मुख्यतया वेदचरणान्तर्गतशाखाविशेषैः सह वर्तते। अतः स्व-स्व शाखाविहितसंहिता-पदक्रमादिपाठानां संरक्षणं प्रातिशाख्यानां मुख्यं लक्ष्यमस्ति। प्रातिशाख्यग्रन्थेषु वैदिकसन्धीनां विस्तृतं विवेचनम्, पदपाठनियमाः, क्रमपाठस्वरूपम, क्रमहेतवः, अवग्रहविधानम्—इत्येवमादयो विषयाः प्रतिपादिताः सन्ति, येषां विवरणमन्यत्र दुर्लभमेव। एतदतिरिक्तं वर्णानां स्थानकरणे वर्णोत्पत्तिविचारः, उदात्तादिस्वरधर्माणां सामान्यनियमाः, विशिष्टपदेषु स्वरविधानम, विशिष्टपदेषु दीर्घत्वविधानम, दीर्घपदेषु ह्रस्वविधानम्, नतिसन्धयः, विसर्जनीयविकारादीनां च सुविशदं वर्णनमस्ति। पदपाठात् संहितापाठनिर्माणम्, क्रमपाठनियमाः, अवग्रहस्थलानि, परिग्रहप्रकारः, वेदाध्ययनविधिः इति विषयाणां सुसम्बद्धं वैज्ञानिकदृशा च निरुपणं विहितमस्ति। एवं प्रातिशाख्यग्रन्थाः शिक्षाविहितानां व्याकरणविहितानां च गूढ़विषयाणां गहनमध्ययनं प्रस्तुवन्ति यत्खलु दुर्लभमन्यत्र। वैदिकग्रन्थानाम् अर्थज्ञानाय यथा निरुक्तशास्त्रमुपकारकमस्ति तथैव वेदमन्त्राणां बाह्यस्वरूपपरिज्ञानार्थं प्रातिशाख्यानि महदुपकुर्वन्तीति स्फुटम्।[3]

प्रातिशाख्यानां पौर्वापर्यविचारः

अत्र विषये विदुषां बहवो मतभेदाः सन्ति। प्रायशः सर्वैरपि विद्वद्भिः ऋग्वेदप्रातिशाख्यस्य प्रातिशाख्यान्तराण्यपेक्ष्य प्राचीनत्वं प्रामाणिकत्वञ्च स्वीक्रियते।

---

१. पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसम्पदम्॥ तै० प्रा० २४।६।

२. ऋ० प्रा० १।१ भाष्यारम्भे उवटाचार्यः।

३. 'वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य। शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते। अतएव हेतोः शिष्याणामेतच्छास्त्रश्राविणां वृद्धिर्भवति'। वा० प्रा० १।१९६ भाष्ये।

ऋक्प्रातिशाख्यानन्तरं तैत्तिरीयप्रतिशाख्यस्य स्थानं समङ्गीकृतं मनीषिभिः। डा० सिद्धेश्वरवर्ममहोदयानुसारं 'तैत्तिरीयप्रातिशाख्यस्य' कतिपये अंशाः प्राचीनतराः तथा कतिपये अर्वाचीनाः सन्ति। 'वाजसनेयप्रतिशाख्यम्' चतुरध्यायिकाग्रन्थात् प्राक्तनमस्तीति केचिदभिप्रयन्ति। अन्ये तु 'चतुरध्यायिकां' प्राचीनतरां मन्यन्ते। डा० सिद्धेश्वरवर्ममहोदयानामभिमतं विद्यते यत् वाजसनेयिप्रातिशाख्यस्य ४।१२० सूत्रे शौनकाचार्यस्य मतमुद्धृतमस्ति यत् खलु शौनकीयचतुरध्यायिकाग्रन्थसूत्रेण सह साम्यं धत्ते।[1] अतश्च तैः वाजसनेयिप्रतिशाख्यस्य चतुरध्यायिकातः अन्वग्भावित्वं स्वीकृतम्।[2] परं मैक्समूलर-बेबर गोल्डस्टकर-प्रभृतयो विद्वांसः वाजसनेयिप्रातिशाख्यं चतुरध्यायिकातः प्राक्तनमितिसाधितम्। विद्वद्वरेण्यानां डा० गोपालचन्द्रमिश्र महोदयानां मतन्तु विद्यते यद् वाजसनेयप्रातिशाख्यस्य आन्तरसाक्ष्याधारेणास्य प्राग्भावित्वं सर्वथा सुशकम्। तद्यथा—

(i) वाजसनेयप्रातिशाख्यस्य सूत्रविश्लेषणाधारेणास्य ग्रन्थस्य प्राचीनतरत्वं सिद्धयति। यतोहि भाष्यकारोव्वटाचार्याणां पुरतः सूत्रसंख्या विषये तदानुपूर्वीविषये चासीत् कश्चन विवादसंरम्भः। एतस्मादेवकारणाद् भाष्यकारैः क्वचिदुक्तम्—'एके एतत्सूत्रं पठन्ति सोऽपपाठः[3]", क्वचिच्च लिखितम्—'इदं सूत्रं केचिन्न पठन्ति व्यर्थंत्वात् इति'।[4] अन्यत्र स्थलेषु भाष्यकारः अनन्तभट्टः कतिपयनवीनसूत्राणां पाठं योजयति अथ च तान्यधिकृत्य भाषतेऽपि।[5] एतेनेदं प्रतीयते यद् ग्रन्थस्य प्राचीनत्वात् भाष्यकाराणां समक्षं सूत्रपाठसंख्याविषये तदीयानुपूर्वीविषये च नासीत् कश्चनाधारः।

(ii) वाजसनेयप्रातिशाख्यग्रन्थस्योपसंहारे इदं लिखितमुपलभ्यते—"इत्याह स्वर-संस्कार-प्रतिष्ठापयिता भगवान् कात्यायनः"[6]। अस्मिन् वाक्ये भगवानिति विशेषणेन साकं स्वर-संस्कारप्रतिष्ठापयितृरूपेण आचार्यवर्यस्य कात्यायनस्य स्मरणं विद्यते। अपरत्र ऋक्प्रातिशाख्यग्रन्थस्योपसंहारे भाष्यकारः उवटाचार्यः एवं लिखति— "इत्याह भगवाञ्छौनकः।" अत्रेदं ध्यातव्यमस्ति यद् उवटाचार्यः वाजसनेयिप्रातिशाख्यप्रणेतारं सूत्रकारं कात्यायनं स्वर-संस्कारप्रतिष्ठापयितृविशेषणेन स्मरति। येन भाष्यकारस्य कश्चनविशिष्टः श्रद्धाभावः आचार्यं प्रति ध्वन्यते। स एव उवटाचार्यः ऋक् प्रातिशाख्यकर्तारं शौनकं केवलं भगवानितिपदेन बोधयति, न तु स्वर-संस्कारप्रतिष्ठा-

---

१. 'असस्थाने मुदि द्वितीयं शौनकस्य'। वा० प्रा० ४।१२०
'द्वितीयाः शषसेषु'। च० अ० २।६।

२. द्र० S. Varma : Critical studies in the phonetic observation of Indian Grammarians, p. 26.

३. वा० प्रा० ४।१२७ उवटभाष्ये।

४. वा० प्रा० ४।६० उवटभाष्ये।

५. वा० प्रा० ४।३३ (मद्रासंस्करणम्)।

६. वाजसनेयप्रातिशाख्यस्य मुद्रितसंस्करणेषु इदम् अष्टमाध्यायस्य उपान्त्यं सूत्रमस्ति। संभवतः इदं वाक्यं कालान्तरे योजितम् भवेत्।

पयितृरूपेण। अतः वाजसनेयप्रातिशाख्यस्य प्राचीनतरत्वं न सर्वथा निर्मूलमपि तु अनुसन्धानसापेक्षमस्ति।

सामवेदीयकौथुमशाखयासम्बद्धस्य ऋक्तन्त्राभिधेयस्य ग्रन्थस्य कृते बर्नेल-महोदयानामभिमतं विद्यते यदयं पाणिनेः पश्चात्कालिको विद्यते। परं डा० सूर्यकान्त-महोदयेन पुष्टप्रमाणैः ऋक्तन्त्रस्य पाणिनिपूर्वभावित्वं संसाधितम्।[1] अथर्ववेदप्राति-शाख्यं पाणिनितः पश्चात्कालिको रचना विद्यते।[2] अतः ग्रन्थोऽयं समस्तेषु प्राति-शाख्येषु अर्वाचीनो विद्यते।

वाजसनेयिप्रातिशाख्यम्

शुक्लयजुर्वेदसम्बद्धं वाजसनेयिप्रातिशाख्यं आचार्यवर्यस्य कात्यायनस्य कृति-र्विद्यते। ग्रन्थोऽयं परिमाणदृष्ट्या ऋक्प्रातिशाख्यतः लघीयान् अन्यप्रातिशाख्यग्रन्था-पेक्षया च ज्यायान् वर्तते। अष्टमाध्यायगतानि कानिचन सूत्राणि विहाय सम्पूर्णो ग्रन्थः सूत्रशैल्यामुपनिबद्धः। अष्टमाध्याये षट्सूत्राणि अनुष्टुप्छन्दसा प्रोक्तानि। अष्टा-ध्यायेषु विभक्तोऽयं ग्रन्थो विद्यते। समुपलब्धेषु संस्करणेषु सूत्रसंख्यायां सारूप्यं नास्ति। तत्रापि अष्टमाध्याये सूत्रव्यवस्था संख्या च नितान्तां अव्यवस्थितिं भजेते। अतः प्रतिशाख्यस्य कृत्स्नसूत्रसंख्यायाः निम्नतमा सीमा ७२५, उच्चतमा च सीमा ७४० विद्यते। अस्य प्रातिशाख्यस्य सूत्रपाठो विवादग्रस्तो विद्यते। यतो हि भाष्यकारः उवटः अनेकेषु स्थलेषु सूत्राणामपपाठतां[3] किंवा वैयर्थ्यतां[4] प्रकटयति। एवञ्च मुद्रितसंस्करणानां सूत्रपाठस्य तुलनात्मकेनाध्ययनेन इदं प्राप्तं भवति यत् सूत्रेषु अनेकपाठभेदा अपि विद्यन्ते।[5]

वैषयिकवस्तुदृष्ट्या वाजसनेयिप्रातिशाख्यं महत्त्वपूर्णमस्ति, परं विषयाणामनु-क्रमव्यवस्था ऋक्प्रातिशाख्यवत् सुप्रसन्ना नास्ति। अष्टाध्यायेषु प्रतिपादिताः मुख्याः विषयाः एवं सन्ति—

अध्यायसंख्या	**विषयाः**
प्रथमः	शब्दोत्पत्तिचिन्तनम्, वेदाध्ययनविधिः, संज्ञाःपरिभाषाश्च, वर्णानामुच्चारणस्थानानि, करणानि, पूर्वाङ्गपराङ्गचिन्ता।
द्वितीयः	स्वरसम्बन्धिनियमाः।
तृतीयः	सन्धिनियमाः।

१. ऋक्तन्त्रम्, पृ० ४०।
२. Atharva Pratisakhya : p. 64.
३. वा० प्रा० ४।१२०, १२७।
४. वा० प्रा० ४।६०।
५. यथा—वा० प्रा० १।८, १।१४, ४।१९०।

चतुर्थः	सन्धिनियमाः, पदपाठनियमाः, क्रमपाठनियमाश्च ।
पञ्चमः	अवग्रहसम्बन्धिनियमाः ।
षष्ठः	आख्यातोपसर्गपदानां स्वरनियमाः, पदस्वरूपनिरूपणञ्च ।
सप्तमः	अवसानाक्षरपरिग्रहनियमाः ।
अष्टमः	वर्णसमाम्नायः, वेदाध्ययनविधिः तत्फलञ्च, वर्णानां देवताः, चत्वारि पदजातानि, तेषां लक्षणानि दैवतनिरूपणञ्च ।

वाजसनेयप्रातिशाख्यग्रन्थे सूत्रकारेण तत्तत्स्थलेषु नवसंख्याकानामाचार्याणां नामानि निर्दिश्य तेषां मतानि प्रतिपादितानि । ते च यथा—काण्वः[१], शाकटायनः[२], शाकल्यः[३], औपशविः[४], काश्यपः[५], दाल्भ्यः[६], शौनकः[७], जातूकर्ण्यः[८], गार्ग्यश्च[९] । एतदतिरिक्तं—एके[१०], एकेषाम्[११] माध्यन्दिनानाम्[१२] इत्यादि शब्दैरपि मतानि परिगृहीतानि दृश्यन्ते । पारिभाषिकपददृष्ट्यापि ग्रन्थोऽयं महत्त्वमादधति । अत्र द्विप्रकारकाः पारिभाषिकशब्दाः दृश्यन्ते । अन्वर्थाभिधानाः यौगिकाः शब्दाः, अतिपरोक्षवृत्तिरूपाः रूढाः शब्दाः अपराः । एषु—जित्-मुत्-धि-सिम् इत्यादयः एवंविधाः पारिभाषिकशब्दाः सन्ति, येषां प्रातिशाख्यान्तरेषु प्रयोगाभावो विद्यते । अस्य प्रातिशाख्यस्य त्रिभिर्नामभिर्व्यवहारः समुपलभ्यते—

(१) वाजसनेयिप्रातिशाख्यम् ।

(२) शुक्लयजुः प्रातिशाख्यम् ।

(३) कात्यायनप्रातिशाख्यञ्चेति ।

---

१. वा० प्रा० १।१२३, १।१४९ ।

२. वा० प्रा० ३।९, ३।१२, ३।८७, ४।५, १२९, १९१ ।

३. वा० प्रा० ३।१०, ११ ।

४. वा० प्रा० ३।१३१ ।

५. वा० प्रा० ४।५, ४।१६० ।

६. वा० प्रा० ४।१६ ।

७. वा० प्रा० ४।१२० ।

८. वा० प्रा० ४।१२५, ४।१६०, ५।२२ ।

९. वा० प्रा० ४।१६७ ।

१०. वा० प्रा० २।१२८, ३।९१, ४।८८, ५।२३, ७।७ ।

११. वा० प्रा० ४।५७, ४।१२८, ४।१४६ ।

१२. वा० प्रा० ८।३१ ।

सूत्रकारः कात्यायनः तत्कृतित्वञ्च

वाजसनेयिप्रातिशाख्यविरचयितुः कात्यायनस्य सम्बन्धे प्राच्यप्रतीच्यविद्वद्भिः बहु समालोचितमस्ति। अथापि तेषु मतभेदाः दृश्यन्ते। कात्यायनाचार्यविषये यानि तथ्यानि विचारकैः प्रस्तुतानि तान्येवं सन्ति—

'त्रिकाण्डशेषकोशः' इति ग्रन्थस्य कर्त्रा पुरुषोत्तमदेवेन कात्यायनस्य पञ्च-नामानि मेधाजित्, कात्यः-कात्यायनः-पुनर्वसुः वररुचिश्चेति प्रतिपादितानि।[१] महाभाष्यकारेण पतञ्जलिनाऽपि कात्य-कात्यायन—वररुचीत्यभिधानानामुल्लेखः कृतो वर्तते।[२] भाषावृत्तौ पुनर्वसु—वररुचिनामनी समानसंज्ञात्वेनोक्ते।[३] 'कथासरित्सागर' ग्रन्थे 'श्रुतधर' इत्याख्या वररुचिकात्यायनस्य कृते व्यवहृता वर्तते।[४] हेमचन्द्रकृते कोशग्रन्थे कात्यायननामसु मेधाजित्, वररुचिः, पुनर्वसुरितिनामानि पठितानि सन्ति।[५] अत्रेदमवधेयम्भवति यत् यथा आचार्यवर्यस्य कौटिल्यस्य कृते 'वात्स्यायन' इति संज्ञा व्यवह्रियते, यथा च भगवतः पाणिनेः कृते 'शालातुरीय' इति संज्ञा प्रयुज्यते, तथैव कात्यायनाचार्यस्य कृते उपर्युक्तानि नामानि ग्रन्थकृद्भिरुद्धृतानि सन्ति। श्रीपाददामोदरसातवलेकरमहोदयेन 'पारस्कर' इत्याख्यापि कात्यायनस्य कृते साधिता वर्तते।[६]

काश्मीराभिजनेन सोमदेवेन स्वकीयकथासरित्सागरग्रन्थे कात्यायनविषयिणी एका आख्यायिका उद्धृता वर्तते। तदनुसारं वररुचिर्कात्यायनः कुशाग्रबुद्धिः मेधावी बालकः आसीत्। तेन व्याडिसकाशात् प्रातिशाख्यशास्त्रमधीत्य सद्यएवानुपूर्वीक्रमेण तच्छास्त्रस्य श्रावणं विहितम्। गूढ़शास्त्रेषु गभीरविषयेषु च सपदि तेन अधिकारो लब्धः। एवञ्च एकदा शब्दशास्त्रचर्चायां पाणिनिं पराजितवान्। परं शिवस्यानुग्रहेणा-न्ततः पाणिनिना विजयश्रीर्लब्धा। तदनन्तरमुग्रतपःप्रभावेण कात्यायनः भगवन्त-माशुतोषं तोषयन् शब्दशास्त्रस्योपदेशं गृहीतवान्। स्वप्रतिभया कालान्तरे कात्यायनेन पाणिनिव्याकरणस्य पूर्णं परिष्कृतञ्चस्वरूपं प्रकाशितम्। एवञ्च महाराजस्य नन्दस्य, तदुत्तराधिकारिणः योगनन्दस्य च मन्त्रिता कृता। कथासरित्सागरग्रन्थानुसारं

---

१. 'मेधावी वाथ मेधाजित् कात्यः कात्यायनश्च सः।
पुनर्वसुर्वररुचिर्गोनर्दीयः पतञ्जलिः॥' त्रिकाण्डशेषकोषः २।२५।

२. प्रोवाच भगवान् कात्यः............। महाभाष्यम् ३।२।३।

३. पुनर्वसुर्वररुचिः ४।३।३४।

४. 'एष श्रुतधरो जातो विद्यां वर्षादवाप्स्यति।' १।२।६९-७०।

५. 'कात्यायनो वररुचिर्मेधाजिच्च पुनर्वसुः।' अभिधानचिन्तामणिः ३।८५२।

६. 'याज्ञवल्क्यस्य पुत्रः कात्यायनीसजातः कात्यायनः परासां शाखानां ग्रन्थनिर्माण-करणात् पारस्कर इति नाम्ना प्रसिद्धः।' का० सं० भू० पृ० १६।

कात्यायनोऽयं शिवगणेषु प्रामुख्यं भजमानस्य पुष्पदन्तइत्यभिधेयस्यावतारभूतः आसीत् ।[1]

ऋक्सर्वानुक्रमणीग्रन्थभाष्यकृता षड्गुरुशिष्येण स्वकीयपद्यभूमिकायां कात्यायनस्य शौनकाचार्यशिष्यत्वम् आश्वलायनसतीर्थ्यत्वञ्च उक्तम् । कात्यायनेन वाजिसूत्रम्, उपग्रन्थाः, स्मृतिः, भ्राजमानश्लोकाः, ब्राह्मकारिका, पाणिनीयव्याकरणे महावार्तिकम्, ऋक्सर्वानुक्रमणी प्रभृतयोग्रन्थाः व्यरचीत्यपि उल्लिखितम् ।[2] श्रीकृष्णचरितकाव्य-प्रारम्भे स्कन्दगुप्तेन लिखितमस्ति यत् कात्यायनः स्वेरितवार्तिकैर्यथा व्याकरणशास्त्रं पुपोष, तथैव स्वर्गारोहणकाव्यं निर्माय तेन कविकर्मदक्षताऽपि प्रदर्शिता ।[3] प्रतिज्ञापरिशिष्टग्रन्थभाष्यकृता अनन्तदेवयाज्ञिकेन कात्यायनस्य स्मरणमष्टादशपरिशिष्टग्रन्थैस्सह-कल्पसूत्रकाररूपेण कृतम् ।[4]

स्कन्दपुराणस्य नागरखण्डान्तर्गत-१३०-३१ अध्यायानुसारं कात्यायन्यां जातो महर्षिकात्यायनः याज्ञवल्क्यपुत्रः यज्ञविद्याविचक्षणः वैदिककल्पसूत्रग्रन्थकारश्चासीत् ।

---

१. "ततः स मर्त्यवपुषा पुष्पदन्तः परिभ्रमन् । नाम्ना वररुचिः किञ्च कात्यायन इति श्रुतः ।.........जिज्ञासार्थम मे प्रातिशाख्यमपठ्यत । तथैव तन्मया सर्वं पठितं पश्यतोस्तयोः ॥.........एवं व्याडीन्द्रदत्ताभ्यां तत्र वसन्क्रमात् । प्राप्तोऽहं सर्वविद्यानां पारमुत्क्रान्त शैशवः ॥.........अष्टमेऽह्नि मया तस्मान्जिते तत्समनन्तरम् । नभस्थेन महाघोरो हुंकारः शम्भुना कृतः । तेन प्रणष्टमैन्द्रन्तदस्मद् व्याकरणं भुवि । जिता पाणिनिना सर्वे मूर्खीभूता वयं पुनः ॥.........अत्रान्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः । आराधितो मया देवो वरदः पार्वतीपतिः । तदैव तेन शास्त्रं मे पाणिनीयं प्रकाशितम् । तदिच्छानुग्रहादेव मया पूर्णीकृतं च तत् ।......... पारं सम्प्राप्य विद्यानां कृत्वा नन्दस्य मन्त्रिताम् ।.........इत्युक्त्वैव गते व्याडौ दातुं तां गुरुदक्षिणाम् । तदैवानीय दत्ता मे योगनन्देन मन्त्रिणे" । कथासरित्सागरः १।२ एवं १।४ ।

२. "शौनकस्य तु शिष्योऽभूद् भगवानाश्वलायनः ।.........शौनकस्य प्रसादेन कर्मज्ञः समपद्यत । कात्यायनमुनिः.........वाजिनां सूत्रकृत् साम्नामुपग्रन्थस्य कारकः । स्मृतेश्च कर्त्ता श्लोकानां भ्राजमानां च कारकः । अथर्वणां निर्ममे यः सम्बन्धे ब्राह्मकारिकाः । महावार्त्तिकनौकारः पाणिनीय महार्णवे । यत्प्रणीतानि वाक्यानि भगवांस्तु पतञ्जलिः । व्याख्यञ्छान्तनवीयेन महाभाष्येण हर्षितः । तपोयोगान्निर्ममे यः सर्वानुक्रमणीमिमाम् ॥" ऋक्सर्वानुक्रमणी (षड्गुरुशिष्यकृतायां भूमिकायाम्) ।

३. "यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान्भुवि । भाष्येण रुचिरेणैव ख्यातो वररुचिः कविः ॥ न केवलं व्याकरणं पुपोष दाक्षीसुत स्वेरित वार्त्तिकैर्यः । काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः" ॥

४. 'कल्पानष्टादशपरिशिष्टानि च प्रणीतवतो भगवतः कात्यायनस्य' प्र० परि० १।१॥

अस्य वररुचिर्नामा एकः पुत्रो बभूव।[1]

वृत्तजातसमुच्चयनामकप्राकृतछन्दोग्रन्थस्य टीकाकारेण चक्रपालात्मजेन गोपालेन स्वकीयोपोद्घाते छन्दः शास्त्ररचयितृषु पिङ्गलादिवत् कात्यायनस्योल्लेखः सनमस्कृति कृतः। अमरकोषस्य एकस्मिन्हस्तलेखे अष्टादशकोशकारगणनाप्रसङ्गे वररुचिकात्यायनयोः पृथक्-पृथक् कोशकाररूपेण निर्देशः कृतो विद्यते। कातन्त्रव्याकरणवृत्तिकारदुर्गसिंहल्लेखेन ज्ञायते यत् षट्पादीयकृत्प्रकरणस्य रचयिता कात्यायनो वर्तते।

पाश्चात्यविदुषां मतम्

मैक्समूलर-वेबर-गोल्डस्टुकरप्रभृतिभिर्विद्वद्भिः कात्यायनविषये स्वकीयमतानि प्रतिपादितानि। परं त्रयोऽपि परस्परं विवदन्ते। कथासरित्सागरस्य सोमदेवलेखाधारेण मैक्समूलरमहोदयस्य मतमस्ति यत् शौनकाश्वलायन-कात्यायन-पतञ्जलि-व्यासरूपात्मिका पाञ्चपौरुषी गुरु-शिष्य-परम्परा काचिदासीत्।[2] तत्र कात्यायनापरपर्यायो वररुचिः पाणिनिसमकालिकः आसीत्।[3] परं समेऽपि प्रातिशाख्यग्रन्थाः पाणिनिअष्टाध्यायीतः पूर्वमेव विरचिताः।[4] मैक्समूलरानुसारं ग्रन्थरचनायाः क्रमः इत्थं विद्यते—

(अ) कात्यायनप्रातिशाख्यम्।

(ब) पाणिनीयव्याकरणम्।

(स) कात्यायनीयं वार्तिकम्।

कथासरित्सागराधारेण मैक्समूलरमहोदयेन कात्यायनस्य कालः ईशातः पूर्वं चतुर्थशताब्द्याः उत्तरार्द्धः (३५० ई० पू०) स्थिरीकृतः।[5]

आटोबोथलिङ्गमहोदयानुसारमपि कात्यायनस्य समयः ई० पूर्वचतुर्थशताब्द्याः मध्योऽस्ति। राजतरंगिणीग्रन्थस्य सन्दर्भानुसारेण अभिमन्युनामकेन केनापि राज्ञा

---

१. 'एवं सिद्धिसमापन्नो याज्ञवल्क्यो द्विजोत्तमः।.........जनकाय नरेन्द्राय व्याख्याय च ततः परम्। कात्यायनसुतं प्राप्य वेदसूत्रस्य कारकम्॥ स्क० पु० (ना० खं०) ११०।७०-७१; ....कात्यायनाभिधं च यज्ञविद्याविचक्षणम्। पुत्रो वररुचिर्यस्य बभूव गुणसागरः'। स्क० पु० (ना० खं०) १३१।४८-४९।

२. द्र० History of Ancient Sanskrit Literature. p. 125.

३. द्र० History of Ancient Sanskrit Literature, p. 71.

४. द्र० ,, ,, ,, ,, p. 62.

५. "Katyayana may be placed, according to the interpretation of the Somdeva's story, in the second half of the Fourth Century B. C.—
History of Ancient Sanskrit Literature, p. 127

चन्द्रप्रभृतयो वैयाकरणाः कश्मीरदेशेषु पातञ्जलमहाभाष्यपाठनार्थमादिष्टाः। ओटोबोथलिङ्गमहोदयः अभिमन्युराजस्य कालः ई० पूर्व १०० अनुमिनोति। एतेनाधारेण च तेन पाणिनेः कालः ई० पू० ३५० निर्धारितः।[१] एवमपि कात्यायनस्य कालः ई० पू० चतुर्थशतीमध्यः सिध्यति। 'लैसेन' महोदयः उपर्युक्तं कालनिर्धारणं खण्डयन् पाणिनिकालः ई० पू० द्वितीयशताब्दीति साधितवान्।[२]

वेबर-मैक्डानलमहोदयौ मैक्समूलरदृष्टिकोणविरुद्धौ द्वौ पृथक्-पृथक् कात्यायनौ मन्येते।[३] परमुभावपि वाजसनेयिप्रातिशाख्यस्य रचना पाणिनिकालात्प्राग् जातेत्यत्र मैक्समूलरेण साकं संवदतः। मैक्डानलमहोदयस्याभिमतं विद्यते यत् एकः कात्यायनः परिशिष्टादि ग्रन्थानां वाजसनेयप्रातिशाख्यस्य च निर्माताऽऽसीत्। अपरश्च कश्चन कात्यायनः पाणिनिव्याकरणस्य वार्त्तिककारः आसीत्। यतोहि वैदिकभाषायाः कानिचिद् विशिष्टरूपाणि यानि पाणिनिव्याकरणद्वारा न साधितुं शक्यन्ते तानि परिशिष्टादिग्रन्थेषु समुपलभ्यन्ते। तानि पाणिनीयव्याकरणेन साधितुमशक्यानीति मैक्डोनलमहोदयस्य तर्को विद्यते।

गोल्डस्टुकरमहोदयस्य मतमस्ति यद् वाजसनेयिप्रातिशाख्यस्य रचयिता, वार्तिककारश्च कात्यायनः समान एव। कात्यायनेन पूर्वं महावार्तिकस्य रचना कृता तदनन्तरं च वाजसनेयिप्रातिशाख्यस्येति असौ मन्यते। वैदिकभाषायां पाणिनिवर्यस्य नियमा' अपूर्णा आसन् इति कृत्वा कात्यायनः तन्न्यूनतापूर्त्यर्थं प्रातिशाख्यं व्यरचयत्।[४] एवं गोल्डस्टुकरमहोदयः एककात्यायनपक्षे मैक्समूलरेण साकं संवदति। परं समेऽपि प्रातिशाख्यग्रन्थाः पाणिनिपश्चात् कालिका इति उद्घोषयन् मैक्समूलर-वेबर-राथ-बर्नेल-लाइबिच प्रभृतिभिर्विद्वद्भिः पृथक्तया कश्चन तृतीयः पन्थाः समासादितः। रॉथमहोदयेन पाणिनिव्याकरणस्य मार्गदर्शकतया अग्रगाम्यादर्शरूपेण प्रातिशाख्यानामवस्थितिः स्वीकृता वर्तते।[५] बर्नेलमहाशयोऽपि प्रातिशाख्यानि पाणिनिव्याकरणात्पूर्वकालिकानि मनुते। लाइबिचमहोदयोऽपि वाजसनेयिप्रातिशाख्यस्य पाणिनेः पूर्वभावित्वं स्वीकरोति।

प्रातिशाख्यानां पाणिनिपूर्वभावित्वविचारः

प्रतिशाख्यसूत्रैस्सह पाणिनिसूत्राणां तुलनात्मकेनाध्ययनेनेदं स्पष्टं प्रतीयते यत् प्रातिशाख्यसूत्राणां रचनाशैली शिथिला विस्तृता च वर्तते। एतदपेक्षया पाणिनीयव्याकरणस्य शैली सुसंगठिता, वैज्ञानिकी, लघीयसी, आदर्शभूता च विद्यते।

१. द्र० Commentary of Panini by Otto Bothtl'ngk p. 17-18.

२. Indische Alterthumskunde, vol. II p. 413.

३. द्र० Preface of Katyayana Pratisakhya, Edited by A. weber.

४. द्र० Panini and his place in Sanskrit Literature p. 200, 205, 212, 217.

५. द्र० Preface of the Nirukta. P. XLIII Edited by Roth.

उदाहरणार्थं—वाजसनेयिप्रातिशाख्ये गुणविधानं सूत्रद्वये विद्यते[1], परं पाणिनीय-व्याकरणे एकस्मिन्नेवसूत्रे इदमस्ति।[2] यदि प्रातिशाख्यकाराणां समक्षं पाणिनि-व्याकरणस्य सूत्राणि आदर्शरूपेण अभविष्यँस्तर्हि ते प्रातिशाख्यग्रन्थानां निर्माणे श्लथ-शैल्याः अवलम्बनं कथमकरिष्यन्। अतश्चेदं निश्चीयते यत् प्रातिशाख्यानां रचना पाणिनिकालात् प्रागेव जाता। पाणिनिवर्यस्य कालं जी० आर० भण्डारकर-गोल्ड-स्टुकर महोदयौ ई० पू० सप्तमशताब्दीरूपं साधयतः। ग्रियर्सन-लसेन-बोथलिङ्क-कीथ प्रभृतयो विद्वांसः पाणिनिमहोदयस्य ई० पू० चतुर्थशताब्दीकालं स्थिरी कुर्वन्ति। वासुदेवशरणअग्रवालमहाशयस्तु पाणिनिं ई० पू० पञ्चमशताब्द्यां स्थापयति। युधिष्ठिर-मीमांसकमहोदयानुसारं पाणिनेः समयः विक्रमतः पूर्वं २८०० वर्षाणि वर्तते। एवं प्रातिशाख्यकारस्य कात्यायनस्य निम्नतमकालसीमा ई० पू० चतुर्थशताब्दी वर्तते। आचार्यकात्यायनस्य रचनारूपेण वाजसनेयप्रातिशाख्येन साकम् अष्टादशपरिशिष्टानि, कात्यायनश्रौतसूत्रं, पारस्करगृह्यसूत्रं, सर्वानुक्रमणीग्रन्थः, क्रमसन्धानसूत्रं, प्रतिज्ञापरि-शिष्टसूत्रम्, गृह्यसूत्रस्यानेकपरिशिष्टसूत्राणि च सन्ति।

वाजसनेयिप्रातिशाख्यस्य टीकाग्रन्थाः

वाजसनेयिप्रातिशाख्यग्रन्थस्य षट्टीकाः दृष्टिपथमागताः सन्ति। तासु—

(१) उवटाचार्यस्य मातृमोदभाष्यम्।

(२) अनन्तभट्टस्य पदार्थप्रकाशभाष्यम्।

(३) श्रीरामशर्मणः ज्योत्स्ना विवृत्तिः।

(४) रामाग्निहोत्रिवर्यस्य प्रातिशाख्यदीपिका।

(५) अज्ञातकर्तृकं प्रातिशाख्यविवरणञ्च।

उपर्युक्तेषु व्याख्याग्रन्थेषु उवटाचार्यस्य भाष्यं सर्वथा प्राचीनतमं विद्वत्तापूर्णञ्च विद्यते।

ज्योत्स्नाविवृतिः

वाजसनेयिप्रातिशाख्यस्य ज्योत्स्नाविवृतेः कर्ता आचार्यः श्रीरामशर्मा विद्यते। व्याख्येयं सूत्रानुक्रमाधारेण नास्ति प्रत्युत सिद्धान्तकौमुदीप्रभृतिग्रन्थानुसारम् उदाहरण-प्रक्रियानुरोधेन प्रवृत्तेयं व्याख्यात्मिका रचना वर्तते। प्रकरणानुरोधवशात् व्याख्या-ग्रन्थेऽस्मिन् सूत्रक्रमे विपर्यासोऽवलोक्यते। व्याख्यानप्रसंगे विवृतिकर्त्रा स्पष्टार्थकसूत्राणां व्याख्या न कृता। एवञ्च सूत्रवृत्तिलेखनशैल्यनुरोधेन सूत्रस्थ प्रत्येकपदानां व्याख्यानमपि नास्ति। 'हिं' इति कालबोधकं सूत्रं, माध्यन्दिनशाखेतर (काण्वादिशाखासम्बद्धानां) सूत्राणाम्, अनुपलब्धोदाहरणसूत्राणाञ्च सर्वथा परित्याग अस्यां कृतो वर्तते। सूत्रपरि-त्यागे ग्रहणे च हेतुनिर्देशः व्याख्याकृता सर्वान्त्ये विहितः। अन्यच्चेदं वैशिष्ट्यं विद्यते

१. 'कण्ठ्यादिवर्णं एकारम्। उवर्णं ओकारम्'। वा० प्रा० ४।५४-५५।

२. आद्गुणः। ६।१।८७।

यत् प्रतिज्ञासूत्रम्, जटाद्यष्टविकृतिलक्षणञ्च ग्रन्थान्तर्गतमेव स्तः। ज्योत्स्नावृत्तौ वाजसनेयिप्रातिशाख्यस्य केवलं ५४४ सूत्राणां संकलनं कृतमस्ति। सेयं ज्योत्स्नावृत्तिः इदम्प्रथमतया प्राकाश्यमानीयत इति मन्ये सुधीजनानामानन्दसन्दोहाय कल्पेत।

ज्योत्स्नावृत्तिकारस्य परिचयः

ज्योत्स्नावृत्तेः अन्त्ये श्लोकत्रये पुष्पिकायाञ्च श्रीरामशर्मणा स्वीयः परिचयो दत्तः। तदनुसारमयं वैराजक्षेत्रवास्तव्यस्य ज्योतिर्विदां मुकुटायमानस्य श्रीसिद्धेश्वरयोगिनः पुत्रः आसीत्। ग्रन्थारम्भे गुरोर्नाम 'श्रीरामः' इत्यभिहितम्। ग्रन्थस्यान्तिमे श्लोके अयमाचार्यः स्वपितरं श्रीसिद्धेश्वरयोगिनमपि गुरुकल्पतया स्मरति। अन्ते च लिखति यत् 'रघुनाथस्य कृते मयेयं ज्योत्स्नावृत्तिः विरचितेति।' रचनायाः पूर्णताकालः, शकसम्वत्सर १७३७ ईश्वरनामकस्य 'बार्हस्पत्य' संवत्सरस्य आश्विनशुक्लदशमी (विजया दशमी) इति निर्दिष्टो वर्त्तते।

ग्रन्थारम्भेऽपि 'रामशर्मणा' इत्युक्त्या ग्रन्थस्यास्य कर्ता रामशर्मा वर्तत इति ज्ञायते। तस्य गुरुरपि 'श्रीरामं सद्गुरुं नत्वा' इत्येवं स्मरणात् श्रीरामः इति फलति। ग्रन्थनामापि तेनैव प्रतिपदमुक्तम्—'ज्योत्स्नाख्या विवृतिर्लघु' इतिना। सोऽयं ग्रन्थो ग्रन्थकृच्च माध्यन्दिनशाखामनुसरत इति 'माध्यन्दिनानुसारेण' इत्येवं वचनादवसीयते। ग्रन्थप्रयोजनमपि 'मन्दानां सुखबोधार्थं क्रियते' इति तत्रैवोक्तम्।

ग्रन्थमातृकाविवरणम्

'क'—संज्ञकपुस्तकविवरणम्

इदं वाराणसेयसरस्वतीभवनग्रन्थालयस्थं पुस्तकमस्ति। अस्य ग्रन्थालये प्रवेशसंख्या ४९००५ क्रमसंख्या च वेद-२४ वर्तते। अस्य नाम प्रातिशाख्यसूत्रमित्युल्लिखितम्। अत्र पत्रसंख्या १ तः २३ पर्यन्तमस्ति। आकारस्तु ८.६" × ३.९" वर्तते। प्रतिपत्रं पंक्तिसंख्या सप्त, प्रतिपंक्त्यक्षरसंख्या च एकोनत्रिंशदस्ति। अन्ते—"इति कात्यायन (कृते) प्रातिशाख्यसूत्रे प्रथमोऽध्यायः" इत्येवं पुष्पिका दृश्यते। कृते इति लिखितं हरितालेन विलोपितम्।

अस्य पुस्तकस्य काश्चन विशेषताः एवं सन्ति—

१. प्रतिविंशति सूत्रे १,२ इत्येवं विभागनिर्देशो वर्तते। स वर्गरूपः स्यादिति सम्भाव्यते। अध्यायान्तिमे विंशतिके यावती संख्यावशिष्यते तत्रैव पूर्णविंशतिकासंकेत इति विशेषः।

२. अत्र सूत्रविभागो पूर्णविरामरेखया '।' इत्येवमङ्कितः, परं संख्या नास्ति।

३. क्वचित् क्वचिद् विवृत्तिसूचनं '६' इत्येवं कृतम्। यथा-चमू '६' अस्मे इत्यादौ।

४. अत्र द्वित्वाक्षरसङ्केतो नास्ति। छकारात् पूर्वं चापि न निर्दिश्यते।

५. दीर्घह्रस्व ॐ कारचिह्नं यथार्हं पृथक्पृथग् दत्तम् ।

६. बहुषु स्थलेषु अनुस्वारचिह्नेनापि परसवर्णनिर्देशः । यथा—नीचोंतो० इत्यादौ ।

७. बहुपदग्राहिषूदाहरणेषु प्रत्युदाहरणं रक्तमस्या ऊर्ध्वरेखाङ्कनेन विभाग-निर्देशः । यथा—२।२० इत्यादौ द्रष्टव्यम् ।

८. सूत्रान्त्यो 'म्'कारोऽनुस्वारेण लिख्यते ।

९. क्वचित् सूत्रेषु जकारोच्चारणीययकारे उदररेखा वर्तते ।

१०. यदि लेखने अक्षरक्रमविपर्यासो जातस्तस्य शोधनं शीर्षस्थया १,२ संख्यया समीकृतम् । यथा—व२ह१ (३।३०) इत्यादौ द्रष्टव्यम् ।

'ख'—संज्ञकपुस्तकविवरणम्

इदं पुस्तकं श्रीकाशीनाथगोडशेमहोदयेभ्यो वैदिकेभ्यः प्राप्तम् । पुस्तके पत्रसंख्या ५४ वर्तते । प्रतिपृष्ठं द्वादश पंक्तयः । प्रतिपंक्ति च द्वात्रिंशदक्षराणि सन्ति । पुस्तकमिदम-तिजीर्णं स्पष्टं शुद्धं च सदपि धूमिलाक्षरमेव । एतस्य लिपिकालः अन्तिमपंक्तिद्वये एवमुपलभ्यते—

॥१॥ शके १७९९ ईश्वरनामाब्दे फाल्गुनशुक्लपद्यां (षष्ठ्यां ?) भौमवासरे तद्दिने गोडशेत्युपाभिधेयेन सदाशिवभट्टाङ्गजेन बालकृष्णेन स्वार्थं परार्थमिदं पुस्तकं लिखितं । शुभं (भ) वतु ॥ इति प्रतिशाख्यज्योत्स्ना समाप्ता पत्राणि ॥ ५४ ॥

प्राचीनपरम्परया श्लोकगणनाक्रमेणात्र पुस्तके १२९६ श्लोका भवन्ति । यतो हि प्रतिपृष्ठं द्वादशश्लोकाः, अतः प्रतिपत्रं चतुर्विंशतिः श्लोकाः सन्त्यत्र । चतुःपञ्चा-शत्पत्राणां सङ्कलनया ५४ × २४ = १२९६ श्लोकाः (द्वात्रिंशदक्षरात्मकाः) सम्पूर्णे ग्रन्थे सन्ति ।

पुस्तकस्यास्य केचन विशेषाः अधस्तात् प्रस्तूयन्ते—

१. अत्र लेखने विपर्यस्ते अक्षरे सति १,२ संख्यया समीकरणं कृतम् । यथा 'कात्यायन' इति शुद्धपाठार्थं 'कात्यानय' इति लेखे 'कात्यान२य१' इत्येवं संकेतः (पृ० १ पं० १) ।

२. वाक्यावसाने, पदावसाने मान्तपदस्य सानुस्वारलेखनमस्ति ।

३. सूत्राणां रक्तवर्णेन रंजनं कृतम् ।

४. पाण्डुग्रन्थेऽस्मिन् मस्यास्तीक्ष्णतया पत्राणां नाशोऽपि जातः ।

५. 'अभींधतां' स्थले (पृ० सं० १०।८) नकारस्याप्यनुस्वारलेखनम् । 'अभीन्धताम्' इति तु शुद्धं रूपम् । एवमन्यत्रापि दृश्यते ।

(६) व्यंजने उकारस्य निर्देशः (ॢ) संकेतेनास्ति। यथा स्र॒ (स्रु) पृ० १०।८, स्र॒ (सु) पृ० १३।२ इत्यादौ।

(७) स्वरश्छकारे (५०) इत्यादौ कुत्रचिदस्माभिः सन्धिर्विच्छिन्नः स्पष्ट-बोधनाय। लेखपुस्तके तु सन्धिसहितः पाठः। अनावश्यकस्थाने स्थितस्य पूर्णविराम-चिह्नस्य (।) त्यागोऽस्माभिर्विहितः। यथा—सिचतौ परे। परश्च मूर्धन्यम् (१७।४), अत्र अर्धविरामस्थाने पूर्णोविरामः। एवमेव द्वित्वेन जातं। व्यंजनं क्रमजं। तच्च पूर्व-स्यांगं इत्यत्र (२६।१०) अस्माभिर्विरामविरहितः पाठः—'द्वित्वेन जातं व्यंजनं क्रमजं, तच्च पूर्वस्यांगम्' इत्ययं विलिखितः। अन्यत्र च 'मुद्रः मासाम्' (२६।४) इदमस्माभिः 'मुद्रो मासाम्' इत्येवं नियाकमिति' (२७।१) इदमस्माभिः 'नियाकम्' इति, इत्येवं, 'पदं अस्मदर्थे' (२७।२) इदमस्माभिः 'पदमस्मदर्थे' इत्येवं, 'सर्वं उदात्तम्' (३०।९) इदमस्माभिः 'सर्वमुदात्त'' इत्येवं, बहुत्र संशोधनं विहितम्।

(८) यत्र स्वरस्य वर्णस्य वा शोधनं तत्र हरतालकथा लेपनं पुस्तकेऽत्र वर्तते। यत्स्थाने अक्षरान्तरलेखनमिष्टं तत्र = इति लक्ष्म कृत्वा पार्श्वे अन्यदक्षरं लिख्यते। १८ पृष्ठस्य ९ पंक्तौ औ =, पार्श्वे उ = इत्यस्ति। अत्र उ इष्टम्, ओ चानिष्टमस्ति।

(९) अत्र पुस्तके उदाहरणे स्वरनिर्देशो द्वित्वादिलेखश्च नास्ति। कदाचित्तु द्वित्वलेखो दृश्यते, यथा—शर्म च स्थो व्वर्म (३३।७) इत्यादौ (सू० ४३७)।

'ग'—संज्ञकपुस्तकविवरणम्

इदं पुस्तकं श्रीगणपतिदीक्षित जावजी भट्ट इत्येतेषामस्ति। इदं हस्तलिखितं शुद्धं प्र त्राकृति वर्तते।

'घ'—संज्ञकपुस्तकविवरणम्

इदं पुस्तकं काशीहिन्दूविश्वविद्यालयस्य पं० नारायणमहोदयानामस्ति। अत्र सर्वादौ प्रथमपृष्ठे एवं लिखितम्—

"शुक्लयजुःप्रातिशाख्यज्योत्स्नावृत्तिः प्रारभ्यते" इति। आरम्भिकश्लोकेषु चतुर्षु १,२,३,४ संख्या कुत्रापि नास्ति। अत्र पवर्गीयबकारस्थाने प्रायशो वकार एव लिखितः। लेखकप्रमादोऽप्यधिकः। अस्मिन् पुस्तके "ष्क" इत्येवं जिह्वामूलीयनिर्देशः, "ष्प" इत्येवञ्चोपध्मानीयस्य निर्देशः।

अन्ते तु—"संवत् १८२३ वर्षे चैत्रकृष्ण ३० रवौ दिने या०देवकृष्णसूनुना करुणा-कृष्णेन लिखितं शुभं ॥ श्रीः ॥ इत्थं लेखककालादिनिर्देशः।

'ङ'—संज्ञकपुस्तकविवरणम्

इदं शुक्लयजुर्वेदप्रातिशाख्यस्य पुस्तकं वाराणसीतो बनारससंस्कृतग्रन्थमालायां मुद्रितं पण्डितयुगलकिशोरमहोदयेन सम्पादितमुवटभाष्ययुतमस्ति। अष्टादशशताब्द्याः अन्तिमे भागे प्रकाशितेऽस्मिन् ग्रन्थे उदाहरणस्थलसङ्केताः दत्ताः। अन्ते च प्रतिज्ञा-सूत्रमपि संयोजितमस्ति।

'च'—संज्ञकपुस्तकविवरणम्

इदं वाजसनेयिप्रातिशाख्यस्य पुस्तकं मद्रासतः प्रकाशितं उवटानन्तभाष्य-द्वययुतमस्ति। मद्रासविश्वविद्यालयसंस्कृतसिरीजग्रन्थेषु पञ्चमसंख्यायां प्रकाशितोऽयं ग्रन्थः १९३४ ईसवीयवत्सरे वी० वेंकटरामशर्ममहोदयद्वारा सम्पादितो विद्यते। ग्रन्थेऽस्मिन्नुदाहरणस्थलसङ्केता न दत्ताः।

'छ'—संज्ञकपुस्तकविवरणम्

इदं शुक्लयजुःप्रातिशाख्य पुस्तकं कलिकर्त्तननगरात् प्रकाशितं जीवानन्दविद्या-सागरभट्टाचार्येण सम्पादितं सोवटभाष्यं वर्तते। ग्रन्थोऽयं सरस्वतीयन्त्रे १८९३ ईसवीय-वत्सरे मुद्रितः।

'ज'—संज्ञकपुस्तकविवरणम्

इयं मातृका काशीहिन्दूविश्वविद्यालयीयवेदविभागप्राध्यापकचराणां पण्डित श्रीकाशीप्रसादमिश्रमहोदयानां वाराणसीवास्तव्यानामस्ति। तेषां विद्वद्वराणां स्नेह-सौजन्यातिशयेनेयं पाण्डुलिपिर्लब्धा।

इयं पाण्डुलिपिर्न पत्राकृतिरस्ति, अपितु वर्तते पुस्तकाकृतिः। अत्र पुस्तके काशी-मुद्रितपुस्तकानुसारमेव केवलमध्यायसूत्राङ्काः प्रदत्ताः। कतिचनपृष्ठानन्तरं सूत्राणां लेखो नास्ति। बहुत्र सूत्राणामङ्कः एव सूत्रस्थाने प्रदत्तः। तेषामत्र निर्देशोऽस्मा-भिष्टिप्पण्यां कृतः। परं मूलपुस्तके पूर्णानि सूत्राण्यासन्निति तेभ्यो ज्ञात्वा ते संकेताः ४।१३ इत्यादयो न पाठान्तरे समादृताः। अक्षराण्यस्य यद्यपि असुष्ठूनि, तथापि वाचनार्हाणि। अत्र ग्रन्थे जटादिविकृतिलक्षणभागो न विद्यते।

अथास्य पुस्तकस्य काश्चन विशेषताः सङ्गृह्यन्ते—

१. कुत्रचिदुद्देश्यविधेयादिशब्दानां स्पष्ट प्रतिपत्तये सन्धिर्न लिख्यते। यथा—३१७(३।९९) सूत्रे "वदित्येतस्मिन्" इति ससन्धिपाठे "वत् इत्येतस्मिन्" एवं 'ज'पुस्तक-पाठोऽस्ति। एवमेव ३१८ (३।११२) सूत्रे "रथीत्ययम्" इति ससन्धिपाठे "रथि इत्ययम्" एवं 'ज'ग्रन्थपाठः। सोऽयं क्रमोऽस्माभिः तत्रान्यत्र चानुक्तावपि स्पष्टप्रतिपादकत्वात् सर्वत्र समादृतः। एतस्मिन् हि आद्रियमाणे विभाजने ' ' इत्यूर्ध्वार्धविरामचिह्नानां प्रदर्शनम्, मुद्रणाक्षराणां भेदनम्, रेखादिदानं वाध्येतॄणां स्पष्टप्रतिपत्तिविधायि सुदर्शनञ्च सम्पद्यते।

२. अत्र पुस्तके प्रायशो महान्ति सूत्राणि प्रतीकत उपादीयन्ते, "०" इति शून्य मपि पूर्णत्वनिर्देशकमङ्कितम्। अथवा "इति" 'इत्यादि' शब्दलेखनेन पूर्णत्वप्रतिपादनम्। यथा—मतिसुमतीति (३१६; ३।९६) सूत्रे वर्तते। एवमेव ३११ (३।९३) इत्यादिसूत्रेष्वपि द्रष्टव्यम्।

३. महतां सूत्राणामुदाहरणानि प्रत्युदाहरणानि च विस्तरभिया एकं द्वे वा लक्ष्ये समुदाहृत्य 'इत्यादि' पदेन पूर्यन्ते। यथा—२१६ (३।९६) सूत्रे। सोऽयं लेखस्तत्र तत्रास्माभिः सूचितः।

मातृकान्वेषणविषये विशेषः

उपर्युक्तोपयुक्तपुस्तकाष्टकातिरिक्तमेकमन्यत् ज्योत्स्नावृत्तिपुस्तकं पण्डितमाधवलालगोस्वामिवर्यस्य लिखितसङ्ग्रहे आसीदित्यवधार्य तद्वंशजो विश्वम्भरगोस्वामी राधारमणप्राकारान्तर्वर्त्ती वृन्दावनस्थः ग्रन्थप्रदर्शनायास्माभिर्निवेदितः। परं स ग्रन्थगौरवं प्रलपन्न प्रादर्शयदिति तस्योपयोगं नाहं कर्तुमशकम्।

अथ चैकोऽपरो हस्तलेखः श्रीश्रीधरवारे महोदयेन निर्दिष्टस्तद्गुरूणां नासिकवास्तव्यानां श्रीनारायणकेशवदेवशास्त्रिणां वर्त्तत इति ज्ञातम्। परं स हस्तलेखः पत्राद्याचरणेनापि नाधिगतोऽस्माभिः।

सम्पादने परिगृहीताः नियमाः

अथात्रास्मदीयसम्पादने ये केचन नियमाः साधारणतया समादृताः, याश्च काश्चन विशेषताः अस्माभिर्यथाशक्ति समुपकल्पितास्तत्सर्वं सुधीजनालोचनाय समुपस्थाप्यते—

१. स्पष्टप्रतिपत्तये सन्धिविच्छेदो विहितः। यथा—"एकवर्णमा इत्यादि पदमपृक्तसंज्ञं स्यात्" इत्यत्र (८४ सूत्रे) "एकवर्णम् आ इत्यादिपदम् 'अपृक्तं संज्ञं स्यात्" इत्येवं विच्छेदः।

२. प्रायः सर्वेषु पुस्तकेषु पदान्ते पदमध्ये वा (यथा—अंतस्था ज०११८ इत्यादौ) वर्तमानयोर्मन्वर्णयोः क्वचिद् हलन्तस्वरूपेण क्वचिच्चानुनासिकरूपेण लेखः। सोऽत्रास्माभिर्यथार्हं सम्पादनानुकूलतया अनुस्वारः, हलन्तः, परसवर्णो वा प्रदर्शितः। पंचम-पञ्चमादावपि निरर्थकाः पाठाः न समादृताः।

३. कार्य (सू० ९४) इत्यादौ "कार्य्यं" (ज०) इत्यादयः पाठभेदा नादृताः। आर्षसूत्रपाठ एव द्वित्वादिकं समुल्लिखितं, न सर्वत्र।

४. विरामबोधकस्य "।" इत्येवमृजुरेखाचिह्नस्य सर्वेषु पुस्तकेष्वयथात्वं दृश्यते। तद्भेदोऽस्माभिर्न प्रदर्शितः, अयथात्वान्निरर्थकविस्तारभयाच्च।

५. 'क' 'घ' संज्ञकपुस्तकवर्जं सर्वेषु पुस्तकेषु पदविभागो न विद्यत इति तयोरपि पदविभागे भेदः विशेषोपकाराभावान्न समादृतः।

६. पुस्तकलिपिकर्तृप्रमादकृतो विसर्गाभावः, अनुस्वाराभावः, ॐकारस्य वर्णानां ह्रस्वदीर्घादीनां विपर्ययश्च बहुत्र दृश्यते। सोऽस्माभिरनुट्टङ्कयित्वैव यथार्हं सम्पादितः।

७. यत्र उदाहरणे पदपाठाङ्काः पूर्वं ततश्च संहिताङ्काः, तत्र पदपाठं स्वीकृत्य संहितापाठे कश्चन विशेषविधिर्ज्ञेय इति सूचना। यथा—११९ सूत्रादौ द्रष्टव्यम्।

८. यत्रोदाहरणे पूर्वं संहितापाठाङ्काः ततः पदपाठाङ्कास्तत्र संहितापाठं स्वीकृत्य पदपाठे कश्चन विशेषविधिरिति ज्ञेयम् ।

९. यत्र च नैरपेक्ष्येण विधिनिर्देशस्तत्र संहितापाठाङ्केषु "संहि०" इति संकेतः ।

१०. अत्र पुस्तके शुक्लयजुःप्रातिशाख्यस्याध्यायसूत्राङ्काः अत्र संयोजित-सूत्रपाठानुसारेण प्रत्येतव्याः । शुक्लयजुःसंहितादिपाठस्तु निर्णयसागरीयः ।

११. अर्धाकारचिह्नस्य 'ऽ' इत्यस्य सम्पादनकलायां पूर्वरूपे उल्लेखः पूर्वशिष्ट-समादृतोऽस्ति । परमत्रास्माभिर्मन्त्रांशेषु उदाहरणेषु पूर्वरूपसन्धौ नेदं चिह्नं प्रयुक्तम्, किन्तु तत्स्थले उपरि(')इत्येवं सङ्केतः कृतः । मूलवेदपुस्तकेषु एतस्य(ऽ)चिह्नस्य स्वर-सन्ध्यभावबोधिकायां विवृत्तौ प्रयुक्तत्वादियं पद्धतिरस्माभिरङ्गीकृता । अतः उदाहरणेषु विवृत्तावेवेदं चिह्नमुपयुक्तम् । यथा—१३२ सूत्रे—'अग्नेदब्धायो'इत्यत्र, १३३ सूत्रे च 'गर्भेऽअन्तः' इत्यत्र द्रष्टव्यम् ।

सम्पादनेऽस्मत्कृतो विशेषः एवमस्ति—

१. सूत्राणां सान्तत्येन अनुक्रमाङ्काः पूर्वं [ ] इत्यस्मिन् कोष्ठे प्रदत्ताः ।

२. प्रातिशाख्यार्षपाठक्रमेण अध्यायसूत्राङ्कनिर्देशः सूत्रान्ते कृतः । प्रतिसूत्र-मध्यायाङ्काः वैशिष्ट्यं कथयन्त्यत्र ।

३. वृत्त्युल्लिखिते सूत्रनिर्देशे सूत्राङ्काः निर्दिष्टाः ।

४. वृत्त्युल्लिखितप्रमाणवाक्यानां यथार्हमङ्का लिखिताः ।

५. परिभाषाणां मुद्रणाक्षरभेदेन प्रदर्शनं कृतम् ।

६. सूत्राणां स्थूलाक्षरेण लेखनं स्पष्टप्रतिपत्तये कृतम् ।

७. स्वरविधायकसूत्रेषु वृत्तावुदाहरणानां सस्वरतया निर्देशो विहितः ।

८. पदपाठाध्ययनतः स्पष्टप्रतिपत्तव्यस्थलेषु पदपाठीयपदलक्ष्येषु पदपाठाङ्काः संहिताङ्काश्च प्रदर्शिताः ।

९. सूत्रेषु प्रतिपाद्यविषयबोधकशीर्षकविधानं सम्पादितम् ।

१०. पूर्वोत्तरशब्दाभ्यामुक्तंवक्ष्यतिशब्दाभ्यामेवंजातीयकान्यनिर्देशकपदानामुक्तौ तत्तत्स्थलबोधकाङ्काः निर्दिष्टाः ।

११. मूले उपयुक्तपाठस्य संस्थापनं विहितम् ।

१२. विधेयस्य मुद्रणाक्षरपरिवर्तनेन स्पष्टप्रतिपत्तिः प्रदर्शिता ।

१३. अवधातव्यस्य विशिष्टांशस्य ' ' इत्येवं चिह्नान्तःकरणेन वैशिष्ट्यं निरूपितम् ।

१४. सान्तत्येनैव पुस्तकहस्तलेखा आसन्, तत्र वृत्तौ पदच्छेदोऽस्माभिरूपपादितः ।

१५. उदाहरणाङ्काः प्रत्युदाहरणाङ्काश्च यथायथं प्रकाशिताः ।

१६. दृष्टान्ते (उदाहरणप्रत्युदाहरणयोः) सम्प्रदायविधया निर्देष्टव्यस्योच्चारणीयस्य च द्वित्वꣳकारादेर्निवेशो यथार्हं कृतः।

१७. आदर्शवृत्तिपुस्तकेषु पदान्ते वाक्यान्ते वा सावसानस्थले प्रयुज्यमानस्यानुस्वारस्यासन्धितत्वान्मकारनिर्देश उपकल्पितः।

१८. महाप्रकरणम् ❋ ❋ एतच्चिह्नान्तर्वर्तित्वेन, अवान्तरप्रकरणञ्च 卐卐 एतच्चिह्नान्तर्वर्तित्वेनास्माभिः स्फुटीकृतं प्रणीतञ्च।

१९. [ ] इत्येवं कोष्ठान्तःपाती पाठोऽस्मत्कृतः। स च [परिभाषेयम् ११९] इत्यादौ द्रष्टव्यः।

२०. पुनरुक्तानामर्थसमानानां पदानां = इत्येवं सम्बन्धसङ्केतः स्पष्टप्रत्यायनार्थमस्माभिर्विहितः। स च "इति वच्चर्चायाम्" इत्यादौ द्रष्टव्यः।

शुक्लयजुर्वेदप्रातिशाख्ये विशेषाः

अत्र ज्योत्स्नावृत्तिसम्पादनक्रमेऽस्माभिः ग्रन्थस्यास्य काश्चन शास्त्रीया विशिष्टताः संदृष्टाः। यथा ग्रन्थेऽस्मिन्नध्यायमुद्दिश्यापि विधानमुपदिश्यते। 'अश्वादौ चाध्याये' (३।१४७) इत्यादि स्थलेष्विदं द्रष्टव्यम्।

अथ च 'अपृक्त एकाल् प्रत्ययः' इत्यत्र प्रत्ययशब्देन अक्षरमेवोच्यते। तदेवात्र भाष्यादिषु सूत्रे चोक्तम्।

भाष्ये प्राचीनोक्तयोऽपि यत्र तत्रोल्लिखिताः। यथा चतुर्थाध्याये (४।१)—'आह च—अनितावध्याय इति कृतं' (२ कारिका) इत्यादौ द्रष्टव्यम्।

सङ्केतबोधनम्

ग्रन्थस्यास्य सम्पादनेऽस्माभिर्ये केचन सङ्केताः समुपयुक्तास्तेषां स्पष्टबोधनायात्र तत्तद्वैशिष्ट्यान्युपस्थाप्यन्ते—

१. न	—इत्यत्र तदक्षरं नास्तीति सङ्केतः।
२. X न	—यत्रेदं लिखितं तत्र इदं पदं नास्तीत्यभिप्रायः।
३. XX न	—तत्र इदं वाक्यं नास्तीति सङ्केतो ज्ञातव्यः।
४. W	—इति पदव्यत्ययसङ्केतः।
५. क, ख, ज	—इत्यादिः पुस्तकसङ्केतः।
६. शु०— / शु० सं०	—शुक्लयजुर्वेदसंहिता माध्यन्दिनशाखीया, तत्र चाध्यायकण्डिकाङ्काः।
७. शु० प्रा०	—शुक्लयजुःप्रातिशाख्यम्, अत्र ज्योत्स्नापाठस्यानुक्रमाङ्काः, अध्यायसूत्राङ्काः उभये वा अङ्काः ज्ञातव्याः।

८. या० शि०	—याज्ञवल्क्यशिक्षा ।
९. S	—सूत्रेषु चिह्नमिदं पूर्वरूपसन्धिनिर्देशकम् ।
S	—वेदमन्त्रेषु तु चिह्नमिदं विवृत्तिप्रदर्शननिर्देशकम् । विवृत्तिर्नाम स्वरद्वयसत्त्वे सन्धिप्राप्तावपि अपवादशास्त्रात् उदाहरणेषु द्वयोः स्वरयोः सन्ध्यभाववोधको मात्राकालिकविरामसङ्केतो वैदिकसम्प्रदायसिद्धः । तत्र चैकमात्राथाः सोद्ग्राहप्रदर्शनायायं संकेतो, न सूत्रेषु (यथा—त्व ईम् २।२६ इत्यादौ) ।
१०. ' '	—विशिष्टपदस्य वाक्यस्य निर्देशस्य वा स्पष्टप्रतिपत्तिफलकः सङ्केतः ।
११. ( )	—मूलपाठस्य सुबोधनाय मूलतः पृथक् पठनीयस्य ज्ञातव्यस्य वा अस्माभिः सङ्कलितस्यांशस्य सङ्केतः ।
१२. [ ]	—पुष्पिकायां तत्प्रकरणोयपूर्वसूत्रसंख्या सङ्केतो विद्यते । सूत्राणां सन्निधाने अनुक्रमाङ्कबोधनसङ्केतः । सूत्राणामुपरि तु विभिन्नैः [दीर्घविधानम्] एवंविधैर्मुद्रणैः विषयबोधनसंकेतः । अग्रे च सूत्रसंख्या ।
१३. पूर्वम्	—विषयोऽयं पूर्वमङ्कतो निर्दिष्टम्, सूत्रेषु समायातोऽयं विषय इत्यवगमाय सङ्केतः ।
१४. अग्रे	—विषयोऽयमग्रे सूत्रेषु समायातः इत्यवगमाय सङ्केतः ।
१५. –	—इत उत्तरमयं विशेषपाठ इति संकेतः ।
१६. ×	—अयं वर्णः (सव्यञ्जनमक्षरं) नास्तीति सङ्केतः ।
१७. १, २, ३,	—मूलपाठे प्रदत्ता इमाः संख्याः, अत्र पाठान्तरविषयिणी टिप्पणी नीचैरेतत्संख्यिका अवलोकनीयेति बोधनाय । टिप्पण्यामपि मूलपाठस्य कृते सङ्केतः संख्यानन्तरं यदि अक्षरस्योल्लेखस्तर्हि स मूलपाठाक्षरस्य स्थानीय इति सङ्केतः ।
१८. V	—इदं पदमधिकमिति सूचनासङ्केतः ।
१९. VV	—इदं वाक्यमधिकमिति सङ्केतः ।
२०.	—मध्यस्थवर्णानां सङ्केतः ।
२१. द्र०	—द्रष्टव्यमित्यर्थः ।
२२. तु०	—तुलनीयमित्यर्थः ।
२३. +	—ससन्धितपाठसङ्केतः, ततः सन्धिपाठः प्रदर्शितः ।

२४. – —पदस्यापरिपूर्त्तौ द्वितीयपंक्तौ पादपूर्तिबोधनाय प्रचलितः सङ्केतः।

२५. = —पूर्वसङ्केतात् किंचिद्दीर्घः लक्ष्यस्वरूपबोधनार्थः सूत्रे सङ्केतः स्पष्टप्रत्यायनाय। दीर्घसूत्रेषु यथा—२।१९ इत्यादौ।

श्रीः

श्रीश्यामदेवाय नमः

श्रीगुरुचरणकमलेभ्यो नमः

ज्योत्स्ना

(शुक्लयजुःप्रातिशाख्यवृत्तिः)

[मङ्गलाचरणम्]

यस्य[1] भृङ्गावलिः कण्ठे स्रुतदानाम्बुपूरिते ।
भाति रुद्राक्षमालेव स वः पायाद् गणाधिपः ॥ १ ॥

[प्रतिज्ञा]

श्रीरामं सद्गुरुं नत्वा याज्ञवल्क्यमुनिं तथा ।
कात्यायनकृते प्रातिशाख्ये वाजसनेयके ॥ २ ॥

माध्यन्दिनानुसारेण ज्योत्स्नाख्या विवृतिर्लघु ।
क्रियते सुखबोधार्थं मन्दानां रामशर्मणा ॥ ३ ॥

[शास्त्रप्रयोजनम्]

जपादौ नाधिकारोऽस्ति सम्यक् पाठमजानतः ।
प्रातिशाख्यमतो ज्ञेयं सम्यक् पाठस्य सिद्धये ॥ ४ ॥

[१] स्वरसंस्कारयोश्छन्दसि नियमः ।१।१॥

प्रतिज्ञासूत्रमेतत् । स्वराणामुदात्तादीनां, संस्काराणां लोपाऽऽगम-वर्णविकाराणां[2] च नियमो वक्ष्यमाणसूत्रैर्विहितानां नियतपठनं, छन्दसि माध्यन्दिनीये स्यात् ।

[२] लौकिकानामर्थपूर्वकत्वात् ।१।२॥

लौकिकानां शब्दानामर्थबोधनार्थं प्रयोगात्, तदनुसारि-प्रकृति-प्रत्यय-कल्पनया[3] व्याकरणानुसारेण स्वर-संस्कार-निर्णयः[4] । छन्दसस्तु अपौरुषेयत्वाद् यथोच्चारणं[5] तस्यैव स्वरस्य वर्णस्य वा[6] साधुत्वं कल्पनीयम् । तदर्थमिदं प्रातिशाख्यम् ।

१. ख पुस्तके अयं श्लोको नास्ति । आदौ "श्रीगणेशाय नमः" इत्यस्ति ।

२. 'लोपागमवर्णविकाराणां' नास्ति क.

३. "या" इत्यस्य स्थाने "मतो" क.

४. स्वर-वर्ण-निर्णयः ख.

५. यथायथोच्चारितम ख; यथोच्चरितं क. ग.

६. स्वर-वर्णस्य च, क.

[वेदाध्ययनविधिः]

[३] ॐ कारं वेदेषु ।१।१८॥

ॐ कारं वेदस्यारम्भे अन्ते च पठेत् । उक्तं च--

"ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
क्षरत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" ॥ इति[1] ।

[४] शुचिना ।८।२८॥

[५] शुचौ देशे ।८।२९॥

[६] शूद्रपतितयोरस ँ श्राव ँ स्वाध्यायोऽध्येतव्यः ।८।३०॥

स्नानाचमनादिना शुद्धेन पुरुषेण शूद्राद्यनुपहते प्रदेशे शूद्रपतितयोः श्रवणं यथा न भवति तथा वेदः पठितव्यः ।

[७] त्रीणि स्थानानि ।१।१०॥

[८] सवनक्रमेणोरः-कण्ठ-भ्रूमध्यानि ।१।३०॥

प्रातःसवन-मध्यसवनोत्तमसवनस्थानानि[2] क्रमेणैतानि स्युः । यथा—प्रातः सवनस्योरः, मध्यमसवनस्य[3] कण्ठः, उत्तमसवनस्य[4] भ्रूमध्यमिति ज्ञेयम् ।

❀ वर्णसमाम्नायप्रकरणम् ❀

[९] अथातो वर्णसमाम्नायं व्याख्यास्यामः ।८।१॥

[१०] तत्र स्वराः[5] प्रथमम् ।८।२॥

व्याख्यायन्त इति शेषः ।

[११] अ इति, आ इति, आ ३इति, इ इति, ई इति, ई ३इति, उ इति, ऊ इति, ऊ ३इति; ऋ इति, ॠ इति, ॠ ३इति; ऌ इति, ॡ इति, ॡ ३ इति ।८।३॥

---

१. "इति" नास्ति ख. ग. घ.

२. अत्र = इत्यङ्कयित्वा "तारं तु विद्यात् सवनं तृतीयमिति शिक्षोक्तेः" इति ख. पुस्तके उपलभ्यते । परमिदं न ज्योत्स्नापाठोऽनन्वितत्वात् । टिप्पणं तु लेखकीयं भवितुमर्हति ।

३. मध्यन्दिनसवनस्य क.

४. 'तारसवनस्य' इत्यधिकः पाठः ख. ग.

५. "तत्र स्वराः" इत्यन्ते पूर्णो विरामः ख पुस्तके । ततश्च "प्रथमम्" इति वृत्तिपाठः प्रतिभाति ख. पुस्तके ।

[सन्ध्यक्षरसंज्ञा]

[१२] अथ सन्ध्यक्षराणि ।८।४।।

एतदुत्तरे स्वरसमाप्तिपर्यन्ता वर्णाः "सन्ध्यक्षर" संज्ञकाः[१] स्युः ।

[१३] ए इति, ए ३ इति; ऐ इति[२], ऐ ३ इति; ओ इति, ओ ३ इति; औ इति, औ ३ इति ।८।५।।

[स्वरसंज्ञा]

[१४] इति स्वराः ।८।६।।

अकारादयः पूर्वोक्ता वर्णाः स्वरसंज्ञकाः स्युः ।

[सिम् संज्ञा]

[१५] सिमादितोऽष्टौ स्वराणाम् ।१।४४।।

पूर्वोक्तानां स्वराणां मध्ये प्रथमाः अ आ इ ई उ ऊ ऋ ॠ[३] एतेऽष्टौ "सिम्" संज्ञकाः[४] स्युः । प्लुतानां नियतानां वक्ष्यमाणत्वात् संज्ञायाः कार्यार्थत्वाद् अग्रहणम् ।

[भाविसंज्ञा]

[१६] अकण्ठ्यो भावी ।१।४६।।

कण्ठ्यो अवर्णस्तद्वर्जिता इकारादयः स्वरा "भावि" संज्ञकाः स्युः ।

[ह्रस्वसंज्ञा]

[१७] अमात्रस्वरो ह्रस्वः ।१।५५।।

एकमात्रकः स्वरो "ह्रस्व" संज्ञः स्यात् ।

[मात्रासंज्ञा]

[१८] मात्रा च ।१।५६।।

ह्रस्वो "मात्रा" संज्ञकश्च स्यात् ।

[दीर्घसंज्ञा]

[१९] द्विस्तावान् दीर्घः ।१।५७।।

द्विमात्रः स्वरो "दीर्घ" संज्ञः स्यात् ।

[प्लुतसंज्ञा]

[२०] प्लुतस्त्रिः ।१।५८।।

त्रिमात्रः स्वरः "प्लुत" संज्ञः स्यात् ।

---

१. सन्ध्यक्षराणि क.

२. ख पुस्तके 'ऐ इति ऐ ३ इति' इत्यनयोः 'ओ इति ओ ३ इति' इत्यनन्तरं पाठः ।

३. 'ऌ ॡ' इत्यधिकः पाठः क.

४. संज्ञाः क.

[२१] अथ व्यञ्जनानि ।८।७।।

[२२] किति खिति गिति घिति ङिति इति[1] कवर्गः ।८।८।।

[२३] चिति छिति जिति झिति ञिति इति[1] चवर्गः ।८।९।।

[२४] टिति ठिति डिति ढिति णिति इति[1] टवर्गः ।८।१०।।

[२५] तिति थिति दिति धिति निति इति[1] तवर्गः ।८।११।।

[२६] पिति फिति बिति भिति मिति इति[1] पवर्गः ।८।१२।।

[स्पर्शसंज्ञा]

[२७] इति स्पर्शाः ।८।१३।

कादयो वर्णाः "स्पर्श" संज्ञकाः स्युः ।

[अन्तस्थासंज्ञा]

[२८] अथान्तस्थाः ।८।१४।।

[२९] यिति रिति लिति विति[2] ।८।१५।।

एते यादयो वर्णा "अन्तस्थ" संज्ञकाः स्युः ।

[ऊष्मसंज्ञा]

[३०] अथोष्माणः ।८।१६।।

[३१] शिति षिति सिति हिति[3] ।८।१७।।

शादयो वर्णाः "ऊष्म" संज्ञकाः स्युः ।

[अयोगवाहसंज्ञा]

[३२] अथायोगवाहाः ।८।१८।।

[विसर्जनीयसंज्ञा]

[३३] अः इति विसर्जनीयः ।८।२२।।

अत्र स्वरात्परो वर्णो "विसर्जनीयः" स्यात् ।

[जिह्वामूलीयसंज्ञा]

[३४] ≍ क इति जिह्वामूलीयः ।८।१९।।

अत्र कात्पूर्वो वर्णो "जिह्वामूलीयः" स्यात् ।

---

१. "इति" नास्ति. ख. ङ. च. छ. ज. । ग. ज. पुस्तके तु "कवर्गः" इतोऽग्रे २३-२६ सूत्राणि न सन्ति, किन्तु "एवं चितीत्यादि, टितीन्यादि, तितीत्यादि, पितीत्यादि", इति पाठः ।

२. सूत्रस्थाने "यितीत्यादि" इति पाठः ग. ज.

३. सूत्रस्थाने "शितीत्यादि" इति पाठः ग. ज.

[उपध्मानीयसंज्ञा]

[३५] ≍ प इत्युपध्मानीयः ।८।२०।।

अत्र पात्पूर्वो वर्णं "उपध्मानीयः" स्यात् ।

[अनुस्वारसंज्ञा]

[३६] अं इत्यनुस्वारः ।८।२१।।

अत्र स्वरात्परो वर्णोः "अनुस्वारः" स्यात् ।

[नासिक्यसंज्ञा]

[३७] हुं इति नासिक्यः ।८।२३।।

अयमवसाने ऋक्शाखायां प्रसिद्धः ।

[यमसंज्ञा]

[३८] कुं खुं गुं घुं इति चत्वारो यमाः ।८।२४।।

विसर्गादयो वर्णा "अयोगवाह्" संज्ञकाः स्युः ।

[व्यञ्जनसंज्ञा]

[३९] इति व्यञ्जनानि ।८।२५।।

एते कादयो वर्णा "व्यञ्जन" संज्ञकाः स्युः ।

[व्यञ्जनानामर्धमात्रिकता]

[४०] व्यञ्जनमर्धमात्रा ।१।५९।।

पूर्वोक्तं व्यञ्जनम् अर्धमात्राकालिकं स्यात् ।

[संयोगसंज्ञा]

[४१] अनन्तरᳫ संयोगः ।१।४८।।

स्वरैरव्यवहितानि व्यञ्जनानि "संयोग" संज्ञानि स्युः ।

[अमाध्यन्दिनीया वर्णाः]

[४२] तस्मिन्-ळ-ळ्ह-जिह्वामूलीयो-पध्मानीय-नासिक्या न सन्ति माध्यन्दिनानाम् ।८।३९।।

[४३] लृकारो[1] दीर्घः प्लुताश्चोक्तवर्जम्[2] ।८।४०।।

पूर्वोक्तवर्णसमाम्नाये[3] ळ-ळ्हौ[4] ड-ढस्थानीयौ काण्वादिषु प्रसिद्धौ, जिह्वामूलीयादित्रयं, दीर्घ लृकार, अग्ना ३ ई इत्यादयोऽष्टौ प्लुता वक्ष्यन्ते (शु० प्रा० २।५०-५४), तेभ्योऽन्ये प्लुता, इत्येते वर्णा[5] माध्यन्दिनशाखिनां संहितायां न सन्ति ।

१. लृदीर्घः प्लुता ख. लृदीर्घप्लु घ. ज.

२. सूत्रमिदं पृथङ् नास्ति च.

३. म्नायो ख.

४. ळ-ळ्ह क; ल्हल ज.

५. 'इत्येते वर्णा' नास्ति क. घ.

[वर्णसंज्ञा]

[४४] उपदिष्टा वर्णाः ।१।३४।।

माध्यन्दिनीय[1]शाखोपयुक्ता वर्णाः [सू० ९-३९] प्रदर्शिताः ।

[वर्णनिर्देशविधिः]

[४५] निर्देश इतिना ।।१।३६।।

पूर्वोक्तानां वर्णानां निर्देश इतिना स्यात् । अ इति (शु० प्रा० ८।३) किति[2] (शु० प्रा० ८।८) ।

[४६] कारेण च ।१।३७।।

वर्णानां निर्देशः कारेण च[3] स्यात् चादितिना । अकारः (शु० प्रा० १।११४) ।

[४७] अव्यवहितेन व्यञ्जनस्य ।१।३८।।

व्यञ्जनस्य कादेर्निर्देश अकारव्यवहितेन कारेण स्यात् । ककारः (शु० प्रा० ३।११) ।

[४८] स्वरैरपि ।।१।४०।।

स्वरैरकारादिभिश्च व्यञ्जनानां निर्देशः स्यात् । नुः (शु० प्रा० ३।१३४), सिः[4] । "अपि" शब्दाद् इतिना कारेण च ।

[४९] र एफेन च ।१।३९।।

रस्य निर्देशः एफेन[5] च[6] स्यात्[7] । चाद् इतिना स्वरैश्च । रेफः (शु० प्रा० ४।१०२) ।

[५०] नानुस्वार-विसर्ग-जिह्वामूलीयो-पध्मानीय-यमाः ।१।४१।।

एते इतिना, कारेण स्वरैश्च न निर्देष्टव्याः[8] ।

॥ इति वर्णसमाम्नायप्रकरणम् ॥

---

१. न्दिनशा क. घ.
२. विति ज.
३. "च" नास्ति ख. ज,
४. सि ख. ज.
५. ण ख. ज.
६. "च" नास्ति ख. ज.
७. "अत्र 'रादिफः' इत्यनेन 'वर्णात्कारः' इत्यस्य बाधः कृतः" इत्यधिकः पाठः क.
८. ष्यः ख. ।

❀ स्थानप्रकरणम् ❀

[५१] स्थाने ।१।६२।।

अधिकारोऽयम् । स्थानं = वर्णानामुत्पत्तिस्थानम् । इत उत्तरेषु स्थान इत्युपतिष्ठते ।

[स्थानप्रकरणीयह्रस्वपरिभाषा]

[५२] ह्रस्वग्रहणे दीर्घ-प्लुतौ प्रतीयात् ।१।६३।।

अकारादीनां ह्रस्वानां स्वराणां ग्रहणे कृते सति दीर्घप्लुतयोर्ग्रहणं स्यात् । ह्रस्वग्रहण इत्युपलक्षणम् । सन्ध्यक्षराणां ह्रस्वाभावाद्दीर्घाणां ग्रहणेऽपि प्लुतानां ग्रहणं स्यात् ।

[स्थानप्रकरणीयवर्गपरिभाषा]

[५५] प्रथमग्रहणे वर्गम् ।१।६४।।

कवर्गादीनां प्रथमाः क-च-ट-त-पास्तेषां ग्रहणे यस्य वर्णस्य ग्रहणं तदादिवर्गं गृह्णीयात् ।

[तालुस्थानीया वर्णाः]

[५४] इ-च-शै[1]-यास्तालौ ।१।६६।।

ह्रस्व-दीर्घ-प्लुता[2] इकाराश्चवर्गः शकार एकारो यकारश्च[3] एते वर्णास्तालुस्थानाः स्युः ।

[जिह्वामूलस्थानीयौ वर्णौ]

[५५] ऋ ⌣ क्कौ[4] जिह्वामूले ।१।६५।।

ऋकारत्रयं जिह्वामूलीयः कवर्गश्च एते जिह्वामूलस्थानाः स्युः ।

[मूर्धस्थानीयो वर्णः]

[५६] ष-टौ मूर्धनि ।१।६७।।

षकारः टवर्गः एतौ मूर्धास्थानौ[5] स्याताम् ।

[दन्तमूलस्थानीयो वर्णः]

[५७] रो दन्तमूले ।१।६८।।

रेफो दन्तमूलस्थानः स्यात् ।

[दन्तस्थानीया वर्णाः]

[५८] लृ-ल-स[6]-ता दन्ते ।१।६९।।

ऌकारत्रयं, लकारः, सकारस्तवर्गश्च दन्तस्थानाः स्युः ।

---

१. शेया ग घ. ज. ङ. च. छ.

२. प्लुत क. घ.

३. श्चैते ग. ज.

४. ऋ ⌣ कौ ग. च. ज.

५. मूर्धस्थानौ ख. ग. ज.

६. सि च. छ. ज.

[ओष्ठस्थानीया वर्णाः]

[५९] उ-वौ[1]-पो-पध्मा ओष्ठे ।१।७०।।

उकारत्रयं, वकार, ओकारः, पवर्गः, उपध्मानीयश्च एते ओष्ठस्थानाः स्युः ।

[कण्ठस्थानीया वर्णाः]

[६०] अ-ह-विसर्जनीयाः कण्ठे ।१।७१।।

अकारत्रयं, हकारो, विसर्जनीयश्च एते वर्णाः कण्ठस्थानाः स्युः ।

[कण्ठतालुस्थानीयः कण्ठोष्ठस्थानीयश्च वर्णौ]

[६१] ऐकारौकारयोः कण्ठ्या पूर्वा मात्रा ताल्वोष्ठयोरुत्तरा ।१।७३।।

ऐकारस्य पूर्वभागः[2] कण्ठस्थानीयः, उत्तरभागश्च तालुस्थानः स्यात् । औकारस्य पूर्वः कण्ठस्थानः, उत्तर ओष्ठस्थानः स्यात् । एवं च कण्ठतालुस्थान ऐकारः कण्ठोष्ठस्थान औकार इति बोध्यम् ।

[नासिकास्थानीया वर्णाः]

[६२] यमा-नुस्वार-नासिक्यानां नासिके ।१।७४।।

यमाश्चत्वारोऽनुस्वारो नासिक्यश्च एते वर्णा नासिकास्थानाः स्युः ।

इति स्थानानि

॥ इति स्थानप्रकरणम् ॥

❀ करणप्रकरणम् ❀

अथ करणानि । करणमुत्पत्तिसाधनम् ।

[जिह्वाग्रकरणा वर्णाः]

[६३] दन्त्या जिह्वाग्रकरणाः ।१।७६।।

लृ-ल-स-ता जिह्वाग्रं करणं[3] येषामेवंभूताः स्युः ।

[६४] रश्च ।१।७७।।

रेफश्च जिह्वाग्रकरणः स्यात् ।

---

१. वो ग. घ. ङ. च. छ. ज.

२. पूर्वो भागः ख.

३. णमेषा क. घ.

[प्रतिवेष्टितजिह्वाग्रकरणा वर्णाः]

[६५] मूर्धन्याः प्रतिवेष्टचाग्रम् ।१।७८।।

षकारः टकारादिपञ्च च[1] प्रतिवेष्टितजिह्वाग्रकरणाः स्युः ।

[जिह्वामध्यकरणा वर्णाः[2]]

[६६] तालुस्थाना मध्येन ।१।७९।।

इ-च-श[3]-या जिह्वामध्यकरणाः स्युः ।

[नासिकाकरणा ओष्ठकरणाश्च वर्णाः]

[६७] समानस्थानकरणा नासिक्यौष्ठचाः ।१।८०।।

नासिक्यो नासिकाकरणः,[4] उ-वौ-पो[5]-पध्मानीया ओष्ठकरणाः स्युः ।

[दन्ताग्रकरणो वर्णः]

[६८] वो दन्ताग्रैः ।१।८१।।

वकार ओष्ठस्थानोऽपि दन्ताग्रकरणः स्यात् । पूर्वसूत्रापवादः ।

[नासिकामूलकरणा वर्णाः]

[६९] नासिकामूलेन यमाः ।१।८२।।

यमा नासिकामूलकरणाः स्युः ।

[हनुमूलकरणा वर्णाः]

[७०] जिह्वामूलीयानुस्वारा हनुमूलेन ।१।८३।।

ऋ ≍ क्का[6] अनुस्वारश्च एते हनुमूलकरणाः स्युः ।

[पुनः जिह्वामध्यकरणा वर्णाः[7]]

[७१] कण्ठचा मध्येन ।१।८४।।

अ-ह-विसर्गा जिह्वामध्यकरणाः स्युः । इति करणानि ।

॥ इति करणप्रकरणम् ॥

---

१. 'च' नास्ति क. घ.
२. अग्रेऽपि ७१ सूत्रे
३. शो ग. घ. ज.
४. नासिक्यकरणः ख.
५. वोपौ ग. घ. ज.
६. ऋ ≍ क्को क. घ.
७. पूर्वमपि ६६ सूत्रे

❀ आस्यप्रयत्नप्रकरणम् ❀

अथास्यप्रयत्नः । स चतुर्द्धा-स्पृष्टे-षत्स्पृष्टे-षद्विवृत-विवृतभेदात् ।

स्पृष्टप्रयत्नाः स्पर्शाः ।

ईषत्स्पृष्टप्रयत्नाः अन्तस्थाः ।

ईषद्विवृतप्रयत्ना ऊष्माणः ।

विवृतप्रयत्नाः स्वराः ।[1]

॥ इति आस्यप्रयत्नप्रकरणम् ॥

❀ संज्ञाप्रकरणम् ❀

[सवर्णसंज्ञा]

[७२] समानस्थान-करणा-स्यप्रयत्नः सवर्णः ।१।४३।।

ताल्वादिस्थानं जिह्वाग्रादिकरणमाभ्यन्तरप्रयत्नश्चेत्येतत् त्रयं यस्य वर्णस्य येन वर्णेन तुल्यं तस्य सवर्णः स्यात् ।

[शास्त्रोपयोगिपरिभाषासु संख्यासूत्रम्]

[७३] स्पर्शेष्वेव संख्या ।१।४९।।

प्रथमादिसंख्या स्पर्शेष्वेव स्यात् ।

[शास्त्रोपयोगिसंज्ञासु वर्णसंज्ञाप्रकरणम्]

[७४] द्वौ द्वौ प्रथमौ जित् ।१।५०।।

पञ्चसु वर्गेषु प्रथमौ[2] द्वौ द्वौ—क-खौ, च-छौ, ट-ठौ, त-थौ, प-फौ, एते वर्णा 'जित्' संज्ञकाः स्युः ।

[७५] ऊष्माणश्च ह्[3] वर्जम् ।१।५१।।

हकारवर्जिताः ऊष्माणः = श-ष-साश्च 'जित्' संज्ञकाः स्युः ।

[मुत्संज्ञा]

[७६] मुच्च ।१।५२।।

श-ष-सा 'मुत्'[4] संज्ञकाः स्युः, चाज्[5] 'जित्' संज्ञकाः ।

---

१. क. ग. घ. ज. पुस्तकेषु पूर्वं 'विवृतप्रयत्नाः स्वराः' ततः 'इषद्विवृतप्रयत्ना ऊष्माणः' इतिपाठः ।

२. 'प्रथमौ' नास्ति क. घ.

३. हि ख. ज.

४. नुत्सं ख.

५. वा क. घ.

[घिसंज्ञा]

[७७] घि शेषः ।१।५३।।

पूर्वोक्तेभ्योऽन्ये ग-ज-ड-द-बा, घ-झ-ढ-ध-भा, ङ-ञ-ण-न-मा, य-र-ल-वा, हकारश्च, एते 'घि' संज्ञकाः स्युः ।

[सोष्मसंज्ञा]

[७८] द्वितीय-चतुर्थाः सोष्माणः ।१।५४।।

द्वितीयाः-ख-छ-ठ-थ-फाः, चतुर्थाः—घ-झ-ढ-ध-भाश्च 'सोष्म' संज्ञाः स्युः ।

[अनुनासिकसंज्ञा]

[७९] मुख-नासिका-करणोऽनुनासिकः ।१।७५।।

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ।

[८०] अनुनासिकाश्चोत्तमाः ।१।८९।।

ङ-ञ-ण-न-मा, 'अनुनासिकाः' स्युः, चात् स्व[1]-स्ववर्गस्थानाः[2] । नासिका-स्थानं[3] द्वितीयमेषामित्यर्थः ।

तदित्थम्—वर्गेषु प्रथमा 'जित्' संज्ञकाः ।

द्वितीया 'जित्' संज्ञकाः 'सोष्माण'श्च ।

तृतीया 'घि' संज्ञकाः ।

चतुर्थाः 'सोष्माणो' 'घि' संज्ञकाश्च ।

पञ्चमा 'घि' संज्ञका 'अनुनासिका' श्चेति ।

इति शास्त्रीयसंज्ञासु सन्धिप्रकरणोपयोगिवर्णसंज्ञाः

[उपधासंज्ञा]

[८१] अन्त्याद् वर्णात् पूर्व उपधा ।१।३५।।

अन्तिमाद् वर्णात् पूर्वो वर्ण 'उपधा' संज्ञकः स्यात् ।

[लोपसंज्ञा]

[८२] वर्णस्यादर्शनं लोपः ।१।१४१।।

उच्चारणयोग्यस्य वर्णस्यानुच्चारणं 'लोप' संज्ञः स्यात् ।

---

१. स्ववर्ग ख. ग. ज.

२. नम् क. घ.

३. स्थाने ख.

[नतिसंज्ञा]

[८३] दन्त्यस्य मूर्द्धन्या[1]पत्तिर्नतिः ।१।४२।।

दन्त्यस्य स[2]कारादेः षकारादि[3]मूर्द्धन्यभावो 'नति' संज्ञकः स्यात् ।

[अपृक्तसंज्ञा]

[८४] एकवर्णं[4] पदमपृक्तम् ।१।१५१।।

एकवर्णम् 'आ' इत्यादिपदम् 'अपृक्त'संज्ञं स्यात् ।

[अपृक्तस्य आद्यन्तवद्भावपरिभाषा]

[८५] स एवादिरन्तश्च ।१।१५२।।

एकवर्णं[5] पदमेव 'आदिरन्तश्च' स्यात् । आदिवदन्तवच्च कार्यं लभत इत्यर्थः ।

[पदसंज्ञा]

[८६] द्विरुक्तमाम्रेडितं पदम्[6] ।१।१४६।।

द्विरुच्चारितं पदम् 'आम्रेडित' संज्ञं स्यात् ।

[स्थितोपस्थितसंज्ञा]

[८७] स ऍं हित[7] ऍं स्थितोपस्थितम् ।१।१४७।।

मध्यस्थेन[8] इतिना सह द्विरुच्चारितं पदं 'स्थितोपस्थित' संज्ञं स्यात् । उक्तं च—

"उपस्थितं सेतिकारं केवलं तु पदं स्थितम् ।
तत् स्थितोपस्थितं नाम यत्रोभे आह संहिते ।।"

[संहितासंज्ञा]

[८८] वर्णानामेकप्राणयोगः संहिता ।१।१५८।।

वर्णानामविरामेणोच्चारणं 'संहिता' संज्ञं[9] स्यात् ।

---

१. मूर्धन्या क. ग. घ. च., मूर्धन्यापति ज.
२. वका ग.
३. मूर्धन्या इति ज.
४. वर्णः घ. ङ. च. छ.
५. वर्ण ज.
६. पदं नास्ति ख.
७. त ऍं क .घ. ज.
८. स्थने घ.
९. संज्ञा ग. ज.

❀ शास्त्रीयपरिभाषाप्रकरणम् ❀

[शास्त्रीयपरिभाषासु ८९—९९]

[द्वितीयापरिभाषा]

[८९] तमिति विकारः ।१।१३३।।

द्वितीयया[1] निर्दिष्टो विकारः स्यात् ।

[सप्तमीपरिभाषा]

[९०] तस्मिन्निति निर्दिष्टे पूर्वस्य ।१।१३४।।

परिभाषेयम्—अनियमे नियमकारिणी[2] । वर्णस्य सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तराव्यवहितस्य[3] पूर्वस्य स्यात् ।

[पञ्चमीपरिभाष।]

[९१] तस्मादित्युत्तरस्यादेः ।१।१३५।।

पञ्चमी निर्देशेन[4] क्रियमाणो विधिः वर्णान्तराव्यवहितस्य[5] परस्यादेः स्यात् ।

[षष्ठीपरिभाषा]

[९२] षष्ठी स्थानेयोगा ।१।१३६।।

अनिर्धारितसम्बन्धा[6] षष्ठी स्थानसम्बन्धवती स्यात् । स्थानम् = उच्चारणप्रसङ्गः ।

[तृतीयापरिभाषा]

[९३] तेनेत्यागमः ।१।१३७।।

तृतीयानिर्दिष्ट आगमः स्यात् ।

स्थाने जायमानो 'विकारः', समीपे जायमान 'आगम' इति भेदः ।

[सन्निकृष्टपरिभाषा]

[९४] सन्निकृष्ट-विप्रकृष्टयोः सन्निकृष्टस्य ।१।१४४।।

---

१. तीयानिर्दि ग. ज.

२. रिणो ज., रिणि ख.

३. स्यापू क.

४. निर्द्देशे ग. ज.

५. तपरस्या क.

६. संवधा ज.

सन्निहितासन्निहितयोः कार्यप्राप्तौ सत्यां सन्निहितस्यैव कार्यं स्यात् । अथ च [परिभाषा]—'सहचरितासहचरितयोर्मध्ये सहचरितस्यैव कार्यहेतुत्वं[1] स्यात् ।'

[यथासन्नपरिभाषा]

[९५] विकारी यथासन्नम् ।१।१४२।।

यस्य वर्णस्य विकारः क्रियते, स वर्णः स्था[2]नादिना स्वसदृशं विकारमापद्यते ।

[यथासङ्ख्यपरिभाषा]

[९६] सङ्ख्यातानामनुनिर्देशे[3] यथासङ्ख्यम् ।१।१४३।।

समसङ्ख्यानां विधीयमानं[4] कार्यं यथाक्रमं स्यात् ।

[पदान्तवत्परिभाषा प्राथमिकी]

[९७] अवग्रहः पदान्तवत् ।१।१५३।।

अवग्रहोऽस्ति यस्मिंन्त्सोऽवग्रहः[5] =अवगृह्यस्य पूर्वभागः पदान्तवत् कार्यं लभते । अर्थादुत्तरस्यापि पदत्वम् ।

[पदान्तवति इतिकरणनिषेधः]

[९८] न त्वितिकरणम्[6] ।१।१५४।।

अवग्रहः एकमात्राकालिकव्यवधानेनोच्चारणम्[7] । अवग्रहः[8] इतिकरणं न लभते ।

[विप्रतिषेधपरिभाषा]

[९९] विप्रतिषेध उत्तरं बलवदलोपे ।१।१५९।।

द्वयोः शास्त्रयोरन्यत्र चरितार्थयोरेकत्र युगपत्प्राप्तौ सत्याम् उत्तरं बलवत् स्यात्, लोपं वर्जयित्वा ।

॥ इति शास्त्रीयपरिभाषाप्रकरणम् ॥

---

१. कार्यं हेतुत्वं क. घ., हेतुत्व ग.
२. वर्णस्याना ख. घ.
३. मनुदेशो ख. घ. ज. ग., मनूदेशो ङ. छ., मनूद्देशो च.
४. विवीयमानं ज.
५. ग्रहयोग्यः ख. ग. ज. घ.
६. सूत्रे 'अवग्रहः' इत्यपि घ.
७. एतद्वाक्यं क. घ. पुस्तकयोरेवास्ति । द्र. ज्यो. ४६७, शु. प्रा. ५।१
८. 'अवग्रहः' नास्ति क. घ.

❀ प्रगृह्यसंज्ञाप्रकरणम् ❀

[सू० १००–१०६]

[प्रगृह्याधिकारसूत्रम्]

[१००] प्रगृह्यम् ।१।९२।।

संज्ञाधिकारोऽयम् ।

[केषुचिद् द्विवचनान्तेषु प्रगृह्यत्वम्]

[१०१] एकारे-कारो[1]-कारा द्विवचनान्ताः ।१।९३।।

एकारान्तमीकारान्तमूकारान्तं च द्विवचनान्तं 'प्रगृह्य'[2] संज्ञं स्यात् ।

[पदान्तीयौकारस्य प्रगृह्यत्वम्]

[१०२] ओकारश्च पदान्तेऽन[3]वग्रहः ।१।९४।।

पदान्ते वर्तमान 'ओकारः' 'प्रगृह्य'संज्ञः[4] स्यात्, अवग्रहं (सू ९७ शु. प्रा. १।१५३) वर्जयित्वा ।

[अपृक्तेषु उकारस्य प्रगृह्यत्वम्]

[१०३] उकारोऽपृक्तः ।१।९५।।

अपृक्त 'उकारः' 'प्रगृह्य' संज्ञः[4] स्यात् ।

[केषुचित् सप्तम्यर्थपदेषु प्रगृह्यत्वम्]

[१०४] चमू अस्मे त्वे ।१।९६।।

एतानि पदानि 'प्रगृह्य' संज्ञा[5]नि भवन्ति[6] ।

[स्वरविशेषेण प्रगृह्यं पदम्]

[१०५] मे उदात्तम् ।१।९७।।

'मे' पदमुदात्तस्वरयुक्तं 'प्रगृह्य' संज्ञं स्यात् ।

[अमीपदस्य प्रगृह्यत्वम्]

[१०६] अमी पदम् ।१।९८।।

अमी इत्येतत् पदं 'प्रगृह्य' संज्ञं स्यात् ।

।। इति प्रगृह्यसंज्ञाप्रकरणम् ।।

---

१. रौ घ.
२. ह्यं ख.
३. ना ज.
४. संज्ञं क. ख.
५. संज्ञकानि क.
६. भवन्ति स्थाने स्यात् ख.

❋ रिफतसंज्ञाप्रकरणम् ❋

[सू. १०७-११५]

[रिफितसंज्ञाधिकारसूत्रम्]

[१०७] विसर्जनीयो रिफितः ।१।१६०।।

विसर्गो 'रिफित' संज्ञः स्यात् ।

अधिकारोऽयम् ।

[रिफितपदानां परिगणनम् सू० १०८-११५]

[१०८] कर[1]नुदात्तम् ।१।१६१।।

'कर्' इत्येत[2]स्य पदस्य विसर्गो 'रिफित' संज्ञः स्यात्, यदि तत्[3] पदमनुदात्तम् ।

[१०९] अन्तरनाद्युदात्तम् ।१।१६२।।

'अन्तर्' इत्येतस्य[4] विसर्गो 'रिफित' संज्ञः स्यात्, यदि तदाद्युदात्तं न ।

[११०] अहरभकारपरम् ।।१।१६३।।

अहर्—इत्यस्य विसर्गो 'रिफितः' स्यात्, भकारः[5] परो न चेत् ।

[१११] आवर्-व-रिति समानर्चि ।।१।१६४।।

आवर्-वर्[6]-इत्यनयोः पदयोर्विसर्गो 'रिफित' संज्ञः[7] स्यात्, तत्पदद्वयमेकस्यामृचि विद्यमानं चेत् ।

[११२] स्तोतर्-वस्तः-सनुतर[8]-भार्-वार्-द्वाः ।।१।१६५।।

एषां पदानां विसर्गो 'रिफितः' स्यात् ।

[११३] स्वः पदमनरणे ।।१।१६६।।

स्वर्—इत्ये[9]तस्य विसर्गो रिफितः स्यात्, अरणशब्दे[10] परे तु न भवति । इदमुत्तरार्थम्[11] ।

---

१. करमनु ज. ग. ङ. च. छ.
२. त्येतत्पदस्य क.
३. तत्''''इत्यारभ्य अग्रिमसूत्रीय''''यदि पर्यन्तं पाठो नास्ति घ.
४. इत्येतस्य स्थाने इत्यस्य क. ग. ज.
५. कारपरो ख.
६. आवर वर ज.
७. संज्ञ नास्ति ख. ग. ज.
८. सनुतरे क.
९. तस्य स्थाने तत्पदस्य ज.
१०. शब्द ज.
११. रार्थम् ख.

[११४] पदादिश्चाजित्परः ।१।१६७।।

पदादिभूतस्य स्वर्—इत्ये तस्य विसर्गो 'रिफित' संज्ञः[२] स्यात्,[३] जित्संज्ञको वर्णः परो न चेत् ।

[११५] ह्वाः–सवितः–पुनस्–त्वष्टर्–नेष्ट-रकर्-होतर्-मातः-प्रातर्-जामात-रजीगः[४]-प्रणेतरिति च ।१।१६८।।

एषां पदानां विसर्गो 'रिफित' संज्ञः स्यात् ॥

॥ इति संज्ञा-परिभाषा प्रकरणम् ॥

❁ अथ स्वर (अच्) सन्धिप्रकरणम् ❁

सू० ११६—

[स्वरसन्ध्यवसरसूत्रम्]

[११६] स[५]ँहितायाम् ।३।१।।

अधिकारोऽयम् ।

[स्वरसन्धिस्थलसूत्रम्]

[११७] पदान्त-पदाद्योः सन्धिः ।३।३।।

परिभाषेयम् । यदत्र[६] सन्धिकार्यमुच्यते तत् पदान्त-पदाद्योः स्यात् । अवग्रह-योग्ये पदे सन्धिकार्याणि 'अवग्रहः पदान्तवत्' (सू० ९७ शु० प्रा० १।१५३) इत्यतिदेशाद् भवन्ति । यानि पदद्वयसम्बन्धीनि कार्याणि तत्रैतस्योपस्थितेः व्यस्ते न भवन्ति । एकपदस्थानि तु अवग्रहे न भवन्ति ।

[अन्तस्था (यण्) सन्धिः]

[११८] स्वरे भाव्यन्तस्था[७]म् ।४।४६।।

भाविसंज्ञकः स्वरः स्वरे परे 'अन्तस्थाम्' आपद्यते । 'विकारी यथासन्नम्'

---

१. त्वे नास्ति ज.

२. संज्ञ नास्ति ज.

३. स्यात् नास्ति ख.

४. जीभः क.

५. सं. ख. ग. ज; सँ. च.

६. यदत्र स्थाने यच्च ख.

७. स्थायाम् क.

(सू० ९५ शु० प्रा० १।१४२) इति स्थानेन सदृशो भवति[1]। 'तस्मिन्निति निर्दिष्ट' (सू० ९० शु० प्रा० १।१३४) इत्यव्यवहितस्य।

पु॑नाम्यच्छिद्रेण (पद १।१२, सं० १।१२) व्वाज्ज्युर्व्वी[2] (पद ११।१९ सं० ११।-२२) व्वे[3]त्वाज्ज्यंस्य (पद २८।११, सं० २८।११)

[अन्तस्थान्तसन्धिः]

[११९] सन्ध्यक्षरमयवायावम् ।४।४७।।

सू[4]त्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र [—**परिभाषेयम्**]।

'स्वर' (सू० ११८ शु० प्रा० ४।४७) इत्यनुवर्तते। सन्ध्यक्षरसंज्ञकः स्वरः स्वरे[5] परे—अय्, अव्, आय्, आव्—एतानादेशानापद्यते[6]। 'संख्यातानामनुनिर्देशो[7] यथा-संख्यम्' (सू० ९६ शु० प्रा० १।१४३) इति यथाक्रमं भवन्ति। ते+आ (पद १९।५५ सं० १९।५७) इति स्थिते अयादेशे[8] जाते[9]—

[यवलोपसन्धिः]

[१२०] य-वयोः पदान्तयोः स्वरमध्ये लोपः ।४।१२६।।

उभयोः स्वरयोर्मध्ये विद्यमानयोः पदान्त[10]योर्यकारवकारयोर्लोपः स्यात्। 'षष्ठी स्थानेयोगा' (सू० ९२ शु० प्रा० १।१३६) इति स्थाने।

तऽ आग॑मन्तु (पद १९।५५ सं० १९।५७)।

सर॑स्वत्याऽ इन्द्रा॑य (पद २१।५५ सं० २१।५९)।

वि॒ष्णो॒+ए॒ते (पद ५।१६ सं० ५।१६) इति[11] स्थिते अवादेशे (सू० ११९ शु० प्रा० ४।४८) कृते, लोपे पूर्वसूत्रेण (सू० १२० शु० प्रा० ४।१२६) प्राप्ते—

---

१. ख पुस्तके इत उत्तरम्—'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र। स्वर इत्यनुवर्तते।' इति पाठः। अन्येषु उत्तरसूत्र अयं पाठ उपलभ्यते।
२. वाज्यर्वन् ख.
३. त्वेत्वाज्यस्य घ.
४. 'सूत्रे····वर्तते' अत्रायं पाठो नास्ति ख.
५. स्वरे नास्ति घ.
६. द्यन्ते ख.
७. मनुद्देशो ख. मनुदेशो क. घ. ज.
८. देशो ख.
९. जायते ख.
१०. पदोत्तरयो ख.
११. इति नास्ति ग. ज.

[वलोपसन्ध्यपवादः]

[१२१] न वकारस्यासस्थान एकेषाम् ।४।१२७।।

एकशब्दः प्रधानवाची। स्वरयोर्मध्ये विद्यमानस्य वकारस्य पदान्तस्य लोपो न स्याद् भिन्नस्थाने स्वरे परे।

विष्णवे ते (पद ५।१६ सं० ५।१६)।

आनन्दनन्दावाण्डौ मे [1] भगं (पद २०।८ सं० २०।९)।

असस्थान इति किम्—

विष्णंऽ उरुगाय (पद ८।१ सं० ८।१)।

ऊरू पादांऽ उच्च्येते [2] (पद ३१।१० सं० ३१।१०)।

[ह्रस्वसन्धिः]

[१२२] क [3] ण्ठ्य ऋकारे ह्रस्वम् ।४।४६।।

कण्ठ्यः [4] स्वर ऋकारे [5] परे ह्रस्वं [6] स्वरमापद्यते।

त्वंऽ ऋ भुमते (पद ३८।५ सं० ३८।८)।

❀ एकादेशसन्धिप्रकरणम् ❀

[एकादेशसन्धिस्वरूपम्]

[१२३] अथैक [7] मुत्तरश्च ।४।५०।।

'अथ' इत्य [8] धिकारे। उत्तरः, चकारात् पूर्वः [9] = द्वौ वर्णौ एकमादेशमापद्येते।

---

१. मे भगः नास्ति क. ख. घ.
२. उच्यते ख.
३. कण्ठ्य ख. कण्ठ ज.
४. कण्ठ्यस्वर क. घ. कण्ठ्यस्वरं ग. ज.
५. ऋकारपरे क. घ.
६. ह्रस्वस्वर ग. ज.
७. थैक उत्त. क.
८. इति नास्ति ख.
९. पूर्वौ ख.

[दीर्घसन्धिः]

[१२४] सिᳲ सवर्णे दीर्घम् ।४।५२।।

'सिम्' संज्ञकः स्वरः स[1]वर्णे स्वरे[2] परे पूर्वः परश्च एकं **दीर्घ**मापद्यते।

भू ताय[3] त्वा नारातये (सं० १।११; पद० १।११)।

स्वाह ाग्नये[4] यज्ञियाय (सं० ३८।११; पद० ३८।८)।

स्वाहापये[5] (सं० ९।२०; पद० ९।१९)।

यौमीदम् (सं० १।२२; पद० १।२२)।

वीद्ध्र्याय (सं० १६।३८; पद० १६।३८)।

पचन्तू खे[6] (सं० ११।६१; पद० ११।५८)—अत्र 'स्वरे भाव्यन्तस्थाम्' (शु० प्रा० ४।४७ सू० ११८) इति प्राप्ते[7] 'विप्रतिषेध०' (शु० प्रा० १।१५९ सू० ९९) इत्यनेन[8] परत्वादिदमेव (शु० प्रा० ४।५२ सू० १२४) भवति।

[गुणसन्धिः]

[१२५] कण्ठ्यादिवर्ण एकारम् ।४।५३।।

'वर्णग्रहणे सवर्णग्रहणम्'। [—परिभाषेयम्]

कण्ठ्यात् पर इवर्णः[9] पूर्वः परश्च एकम्[10] **एकार—**मापद्यते।

जयेन्द्राय (सं० ९।११; पद ९।११)।

एदम् (सं० ४।१; पद० ४।१)[11]।

[१२६] उवर्ण ओकारम् ।४।५६।।

---

१. स्व ख.

२. स्वरे नास्ति क.

३. भूताय नास्ति ख.

४. इदमुदाहरणं खातिरिक्तपुस्तकेषु।

५. इदमुदाहरणं ख पुस्तके एव वर्तते परं नैतन्माध्यन्दिनीयसंहितायामुपलभ्यते। जटायां व्युत्क्रमे तु भवति।

६. षे ज. क.

७. प्तं ग. ज. ख.

८. इत्यनेन नास्ति घ.

९. र्ण क. घ.

१०. एकम् नास्ति घ.. क.

११. एकम् इत्यधिकम् घ.

कण्ठ्यात् पर उवर्णः पूर्वश्च एकम् **ओकारम्**[1] आपद्यते।

वरु॑णस्योत्तम्भ॑नम् (सं० ४।३६; पद० ४।३६)।

प्रोहा॑मि (सं० २।१५; पद० २।१५)।

सम्वेतत्[2] (सं० ८।६१; पद० ८।५५)

इन्द्राया॑हि (सं० २०।८७; पद० २०।७८)

इन्द्रेहि[3] (सं० ३३।२५ पद ३३।२२)—इत्यादौ अन्तस्था[4]—दीर्घ[5] एकारादीनि 'स एवादिरन्तश्च[6]' (शु० प्रा० १।१५२ सू० ८५) इत्यतिदेशाद् भवन्ति।

[वृद्धिसन्धिः]

[१२७] सन्ध्यक्षरमेकारौकारौ ।४।५७।।

कण्ठ्यात् स्वरात् परं सन्ध्यक्षरं पूर्वश्च[7] एतौ **ऐकारौ-कारौ** आपद्ये[8]ते। स्थानतः सादृश्याद् (शु० प्रा० १।१४२ ज्यो० ९५) एकारैकारयोः[9] ऐकारः, ओकारौकारयोः औकारः।

आजायै॒ष ते॒ (सं० ८।४० पद ८।३५)

इन्द्रे॑णै॒न्द्रम् (सं० १९।२६ पद १९।२४)

ओजि॒ष्ठौजिष्ठं (सं० ८।३९ पद ८।३४)

प्रौ[10]क्षन् (सं० ३१।९ पद ३१।९)।

[वृद्धिसन्ध्यपवादः, पररूपसन्धिनिपातनम्]

[१२८] समुद्रस्येमँस्त्वेमँ[11]-स्त्वोद्म[12]न्निति च ।४।५५।।

एते निपात्यन्ते।

---

१. 'म् आ' न. घ.

२. सन्वेतत् ज. ग; —सम्वेतत् ख.

३. 'एहि' ख. ग. ज. क.

४. —द् क.

५. र्घोका क. र्घेका. ग.

६. च. न. ग.

७. च. न. घ.

८. द्य. घ.

९. एकारैकारयोः न. घ.

१०. प्रो क. मौ. घ.

११. स्त्वेमँ न. घ. ग.

१२. द्य. घ.

'अन्यथा प्राप्तस्य अन्यथोच्चारणं निपातनम् ।' [—परिभाषा]

अपाम्पृष्ठे[1] समुद्रस्येमंन् (सं० १३।१७ पद १३।१५) ।

अपा[2]न्त्वेमंन् (सं० १३।५३ पद १३।४८) ।

अपान्त्वोद्म'न्त्सा[3]दयामि (सं० १३।५३ पद १३।४८) ।

[शास्त्रीयपरिभाषासु कालपरिभाषा]

[१२९] ह्यन्तराः कालाः ।३।५।।

'ह्रेः[4]' (शु० प्रा० ४।११ ज्यो० ×, ४।१२४ ज्यो० ×) पूर्वा विधयः **पूर्वकालाः** पराः[5] **परकालाः** स्युः ।

[कालसिद्धिपरिभाषा शास्त्रीया]

[१३०] न परकालः[6] पूर्वकाले पुनः ।३।४।।

जातः परकालो विधिः पूर्वकाले विधौ प्राप्ते सति असिद्धः स्यात् ।

तऽ इह श्रु[7]वन्तु (सं० १९।५७ पद० १९।५५) ।

पादाऽ उच्येते (सं० ३१।१० पद ३१।१०) ।

अराध्या एदिधुषुदं पुतिम् (सं० ३०।९ पद ३०।७) ।

रात्र्या[8] ऋक्षं÷[9] (सं० २४।३६ पद २४।३६) ।

तऽ आगमन्तु (सं० १९।५७ पद १९।५५)—अत्र 'यवयोः पदान्तयोः' (शु० प्रा० ४।१२७ ज्यो० १२०) इत्यस्य 'ह्रेः' (शु० प्रा० ४।१२४ ज्यो० ×) परकालत्वात् तस्मि[10]ञ्जाते पूर्वकालं यथायथं प्राप्तं सन्धिकार्यं (ज्यो० १२४ शु०प्रा० ४।५२) न भवति

[ह्रस्वसन्ध्यपवादभूतो वृद्धिसन्धिः]

[१३१] आरमृकारोऽपृक्तात् ।२।५६।।

---

१. ष्ठे ज.
२. पां त्वे ज.
३. न्सा क. घ.
४. ह्रेः नास्ति घ.
५. पराः न. क.
६. लाः क. घ.
७. स्रु घ. क. श्व ज.
८. त्र्या घ.
९. ऋक्षः स्थाने ऋतुः ज.
१०. तस्मिन् न. ख.

अपृक्तात् पर ऋकारः पूर्वश्च एकम् **आरम्** आपद्यते। 'कण्ठ्य ऋकार' (शु० प्रा० ४।५० ज्यो० १२२) इत्यस्यापवादः।

यस्यावश्यं प्राप्तौ सत्यां यो विधिरारभ्यते स तस्यापवादः। [—परिभाषा] स्वपुनमात्त्यैं' (सं० ३०।१७ पद ३०।१५)।

❀ पूर्वरूपसन्धिप्रकरणम् ❀

[उत्सर्गसूत्रम्]

[१३२] एदोद्भ्यां पूर्वमकारः ।४।६१।।

एदोद्भ्यां परो[1] अकारः पूर्वश्च एकम् **एकारम् ओकारं** वापद्यते। एतत्प्रकरणे (शु० प्रा० ४।६१—८०, ज्यो० १३८-१५३) यानि विसर्गान्तानि पदानि तेषां 'सर्वो अ[2]कार ओकारम्' (शु० प्रा० ४।४३ ज्यो० २३०) इत्यनुवर्तमाने 'अकारे च[3]' (शु० प्रा० ४।४४ ज्यो० २३१) इत्यनेन[4] ओकारान्तत्वम्।

[5]कारग्रहणे तत्कालग्रहणम्। [—परिभाषा]

अग्नयेनी'कवते (सं० २४।१६ पद २४।१६)।

अग्ने'[6]दब्धायोशीतम (सं० २।२० पद २।२०)।

नमोश्वे'भ्यः (सं० १६।२४ पद १६।२४)।

❀ प्रकृतिभावप्रकरणम् ❀

[१३३] प्रकृतिभाव ऋक्षु ।४।८१।।

ऋक्षु = नियमिताक्षरच्छ[7]न्दःसु मन्त्रेषु एदोद्भ्यां परो अकारः **प्रकृत्या** भवति। 'एदोद्भ्याम्' (शु० प्रा० ४।६१ ज्यो० १३२) इत्यस्यापवादः।
गर्भे' [8]अन्तः। (सं० ३१।१९, पद ३१।१९)।
वा[9]यो'ऽअस्मिन् (सं० २७।२८ पद २७।२७)।

---

१. रो+अ=रोऽ ख.
२. अः ख. ज. अकारः घ.
३. च इ नास्ति घ.
४. 'न च' घ
५. इकार घ.
६. ग्ने नास्ति ख. ज. ग.
७. श्छ ख. छ ज.
८. र्मे क.
९. त्वा क.

[१३४] जुषाणश्चानध्वनि ।४।८२॥

'जुषाण' शब्दौकारः अकारे प्रत्यये[1] प्रकृत्या भवति अध्व[2]भिन्ने परे। अनध्वनी[3]ति शाखान्तरविषयम् ।

जुषाणोऽअप्तुराज्य[4]स्य (सं० ५।३५ पद ५।३५) ।

चकारस्यानुक्तसमुच्चयार्थत्वाच्छु[5]क्रः—

वायो' शुक्रोऽ[6] अयामि ते (सं० २७।३० पद २७।२९) ।

[१३५] ते चानुदात्तमनुदात्ते ।४।८३॥

ते इत्येतपदमनुदात्तं चेदनुदात्ते अकारे परे[7] प्रकृत्या भवति[8] ।

या ते'ऽ अग्नेयशया (सं० ५।८ पद ५।८) ।

अनुदात्तं किम्—ते प्सरसाम् (सं० २४।३७ पद २४।३७) ।

[१३६] हेड-आपो-ऽग्रे[9]गुवो-ऽपाग्ने[10]-धीरासो-देवास-उरो-रक्षा णो-मो-वैश्वनरो-वृषभो-वचः-प्राण[11]-उदानो-अङ्ग-इमा मे-वृष्णो-दशमास्यो-ऽन्ध-आवित्तो-ऽरिष्टो अर्जुनः-प्रत्याश्रावः-स्विष्टो घासे-प्रणीतस्-तेभ्यो नमो अस्तु-दूरे-नो अद्य-यज्ञे-सधस्थे-सो अध्वराये-न्द्रे-हिरण्यपर्णो-द्वारो-देवो-ऽब्दो-रथिभ्यो[12]-महद्भ्यः-स[13]ँ सदः ।४।८४॥

---

१. प्रत्यये क. घ. एव
२. अध्वनि क. घ.
३. मीति ग.
४. त्र्य भ.
५. त् शु. ग. ज. त् छु. ख.
६. क्रः ज.
७. परे न क. घ.
८. भवति नास्ति ख. ज.
९. ऽग्रे नास्ति ङ. च. छ. आपो अग्रेगुवो क. घ.
१०. 'पाग्ने० इत्यादि अ. ४।८४' इति ज. पूर्णं सूत्रं नास्ति ।
११. प्राणः घ.
१२ क्यो घ.
१३. सँ क. घ.

एतेषां पदानां यथायथमेकारौकारौ[1] अकारे परे **प्रकृत्या**[2] भवतः । यत्रानेकपदपाठस्तत्र यथोक्ते प्रकृत्या[3] भवतः, अन्यत्र तु अकारमात्रे ।

हेडो॒ऽ अवं (सं० २१।३; पद २१।२) ।
देवी॑रापोऽ अपान्नपा॒त् (सं० ६।२७; पद० ६।२५)
अ॒ग्रे॒ग॒ु॒वो॒ऽ अ॒ग्रे॒पु॒वहं (सं० १।१२; पद० १।१२) ।
अपां॑ग्नेऽ अ॒ग्निम् (सं० १।१७; पद० १।१७)
धीरा॑सोऽ अनु॒ दि॑श्यं[4] (सं० १।२८; पद० १।२८)
देवा॑सोऽ अ[5]जुषन्त (सं० ४।१; पद० ४।१)
उरो॑ऽ अन्तरिक्ष (सं० ४।७; पद० ४।७)
रक्षां॑ णो॒ऽ अप्रं[6]युच्छन् (सं० ४।१४; पद० ४।१४)
हिंᳬसीर्मोऽ अह॒न्त्वाम् (सं० ४।१५; पद० ४।१५)
वै॒श्वा॒न॒रोऽ अदंब्धहं (सं० ४।१५; पद० ४।१५)
वृ॑ष॒भोऽ अ॒न्तरिक्ष॒म् (सं० ४।३०; पद० ४।३०)
वचो॒ऽ अपा॑वधी॒त् (सं० ५।८; पद० ५।८)
प्रा॒णोऽ अङ्गे॑[7] (सं० ६।२०; पद० ६।१८)
उ॑दा॒नोऽ अङ्गे॑[8] (सं० ६।२०; पद० ६।१८)
अङ्गे॑ऽ अङ्गे (सं० ६।२०; पद० ६।१८)
इमा मे॑ऽ अग्ने॒ (सं० १७।२; पद० १७।२)
वृ[9]ष्णो॑ अ॒ᳬशुभ्या॒म् (सं० ७।१; पद० ७।१)
दशंमास्यो॒ऽ अस्त्र॑त् (सं० ८।२८; पद० ८।२३)
अन्धो॑ऽअच्छे॒त॒हं (सं० ८।५४; पद० ८।४८)
आवित्तो[10]ऽ अ॒ग्निः (सं० १०।९; पद० १०।९)
अरिंष्टो॒ऽ अर्जु॑नहं (सं० १०।२१; पद० १०।१९)
प्रत्याश्रावोऽ अनु॑रूपहं (सं० १९।२४; पद० १९।२२)
स्विंष्टोऽ अ॒ग्निः (सं० २१।५८; पद० २१।५४)
घा॒सेऽ अंज्रा॒णा॒म् (सं० २१।४४; पद० २१।४१)

---

१. रो क.
२. त्या भवतः इत्यस्य स्थाने तिभावः ग. त्या भावः ख.
३. प्रकृतिभावः ज.
४. श्या ज.
५. अनु ज.
६. प. घ.
७. 'अङ्गे' द्विरावृत्तम् ख.
८. अङ्गे नास्ति ख.
९. वि ज.
१०. ज्ञो घ.

प्रणी॑तोऽ अ॒ग्निः॒ (सं० १९।१७; पद० १९।१५)

तेभ्यो॒ नमो॑ऽ अस्तु॒ (सं० १५।१५; पद० १५।१५)

दू॒रेऽ अमित्रश्च॒ ग॒णः॒ (सं० १७।८३; पद० १७)

सम्मि॑तासो नोऽ अ॒द्य[१] (सं० १७।८४; पद० १७।७७)

य॒ज्ञेऽ अ॒स्मिन् (सं० १७।८४; पद० १७।७७)

स॒धस्थे॑ऽ अङ्गि॒र॒स्वत् (सं० ११।६१; पद० ११।५८)

सोऽ अ॑ध्व॒राय॒ (सं० ३३।७५; पद० ३३।६६)

इन्द्रे॑ऽ[२] अ॒श्विना॑ (सं० २१।४८; पद० २१।४४)

हि॒र॑ण्यपर्णोऽ अ॒श्विभ्या॒म् (सं० २१।५६; पद० २१।५२)

द्वारो॑ऽ अ॒श्विना॑ (सं० २१।४९; पद० २१।४५)

दे॒वोऽ अ॒ग्निः॒ (सं० २१।५८; पद० २१।५४)

अ॒ब्दोऽ अयंवोभिः॒[३] (सं० १२।७४; पद० १२।६५)

र॒थि॒भ्यो॑ऽ अर॒थेभ्यः॑ (सं० १६।२६; पद० १६।२६)

म॒हद्भ्यो॑ऽ अर्भ॒केभ्यः॑ (सं० १६।२६; पद० १६।२६)

स॒ꣳसदो॑ऽ अष्ट॒मी (सं० २६।१; पद० २६।१)

[१३७] छन्दो॑ अङ्कुप-मङ्काङ्क-मस्त्रीवयः ।४।८५।।

'छन्द'[४] इत्येतत्पदौकारः[५] एतेषु प्रकृत्या ।

छन्दो॑ऽ अङ्कु॒पम् (सं० १५।४ पद० १५।४)

छन्दो॑ऽ अङ्का॒ङ्कम् (सं० १५।५; पद० १५।५) ।

छन्दो॑[६]ऽ अस्त्री॒[७]वयः॒ (सं० १४।१८; पद० १४।१४) ।

---

१. घ. घ.

२. इन्द्रो खातिरिक्तेषु

३. अवयोभिः ज.

४. 'छन्दो ४।८५' इत्येव ज.

५. सरसेतत्प क.

६. छेदो ज.

७. स्त्री क.

❀ प्रकृतिभावापवादात्मकं पूर्वरूपप्रकरणम् ❀

[सू० १३८-१५३]

[१३८] गाहमानः -शिवो-भरन्तो-द्वेषोभ्यो-जम्भयन्तो-वाजे[२]वाजे वाजजितो[३]-मदन्तः - शोचे- ऽवसे-सुषुवे- ज्योते-सुपर्णो-वीरुधः- सुवीरो-धातवे-सूनवे-द्रूणान[४]-आशवो-वहतः-सङ्क्रन्दनो-बाहवो-ऽयुध्यो-ऽद्रुहः ।४।६४।।

एतेषामे[५]कारौकाराभ्यां[६] परो अकारः पूर्वश्च एकं पूर्वमापद्यते। 'प्रकृतिभाव ऋक्षु' (शु० प्रा० ४।८१ ज्यो० १३३) इत्यस्याप[७]वादः।

ह॒गामानोद॒यो[८] वी॒रः[९](सं० १७।३९; पद० १७।३६)
अहिं ॅ[१]सन्नहं[१] शि॒वोती॑हि (सं० ३।६१ पद० ३।६०)
भर॒न्तो॑श्वा॑येव॒ तिष्ठंते[१] (सं० ११।७५; पद० ११।७०)
द्वेषो॑भ्यो॒' न्यंक्रतेभ्यं[१०] (सं० ५।३५; पद० ५।३५)
ज॒म्भय॒न्तो॑' हिं वृक॒म्[१] (सं० ९।१६; पद० ९।१५)
वाजे॑ वाजे॑' वत (सं० ९।१८; पद. ९।१७)
वाजजि॒तो॑' ध्वंनस्कम्भ्नु॒ व[१]न्तो॒[११] (सं० ९।१३; पद० ९।१२)
मद॒न्तो॑' ग्ने॒ मा ते॒[१२] (सं० ११।७५; पद० ११।७०)
भंद्र[१] शोचे, पू॒ पम्[१३] (सं० १२।२६; पद० १२।२३)
अवंसे॒' ग्निमु॒न्वारंभामहे[१] (सं० ९।२६; पद० ९।२५)
सु॒षु॒वे॑' ग्रे॒[१४] सोम॒[१]म्[१५] (सं० ९।२३; पद० ९।२२)
ज्योते॑' दि॒ति॒ सरंस्व[१]ति॒ (सं० ८।४३; पद० ८।३७)

---

१. 'नो ४।६४' इत्येव सूत्रसङ्केतः ज. नो घ.
२. वाजे नास्ति क.
३. त. क.
४. नो क.
५. मै ज.
६. का ख.
७. म्प ज.
८. यः, 'वीरः' नास्ति ख.
९. पदमिदं नास्ति ख.
१०. भ्य ज.
११. न्तः ज. क.
१२. ने घ.
१३. थ. घ. य. ज.
१४. ग्ने
१५. इतः परं ज पुस्तके एतत्सूत्रोदाहरणानि न सन्ति 'इत्यादि' इति च लिखितम्

सुपर्णो' सि गुरुत्मा'न्' (सं० १२।४; पद० १२।४)
वी'रुधो' स्यै सन्द'त्त' (सं० १२।९४; पद० १२।८५)
सुवीरो' वी'रहा (सं० ४।३७; पद० ४।३७)
सरस्वति' तमि'ह' धातवे' कः (सं० ३८।५; पद० ३८।३)
सूनवे' ग्ने' सूपायनो' भव' (सं० ३।२४; पद० ३।२४)
द्रूणानो' स्तांसि (सं० १३।९; पद० १३।८)
आशवो' स्तम् (सं० १५।४१; पद० १५।३७)
वहतो' प्रतिधृष्टशवसम् (सं० ८।३५; पद० ८।३०)
सङ्क्रन्दनो' निमिषः (सं० १७।३३; पद० १७।३०)
बाहवो' नाधृष्याः (सं० १७।४६; पद० १७।४३)
अयुध्यो' स्माकम् (सं० १७।३९; पद० १७।३६)
अध्याये[२] किम्—

गोव्युच्छ[३]मितिं गो। व्युच्छम् (पद० ३०।१६ सं० ३०।१८) इत्यादौ 'स्वरे भावी' (ज्यो० ११८ प्रा० ४।४६) इत्यादि भवति। अयं निषेधो विकारवतः पदस्यैव स्थितोपस्थिते नान्यत्र। तेन—

रायस्पोष[४]द इतिं रायस्पोषु[५]। दे (पद० ५।१ सं० ५।१)। अत्र 'रायः सहसः[६]' (ज्यो० २५० प्रा० ३।२५) इति सकारो भवति।

[२४५] इतिवच्चचर्चायाम् ।३।२०॥

पुनरुच्चारितं पदं चर्चा, = इतेः परं पदम्।
तत्र इतौ परे यथा न भवति तद्वदेव।

[विसर्गस्य सकार-षकारविधानम्]

[२४६] ककार—प[७]कारयोः सकारम् ।३।२१॥

[२४७] भाव्युपधः ष[८]कारम् ।३।२२॥

भाव्युपधो विसर्गः षकारमापद्यते, परिशेषात् कण्ठ्यपू[९]र्वः सकारं ककारे पकारे[१०] च परे। अधिकारोऽयम्। उत्तरसूत्रेषु यथायोग्यमुभयोः सम्बन्धः।

[२४८] आ[११]विर्निरिड-इडाया-वसति-र्वरिवः ।३।२३॥

एतेषां षण्णां विसर्गः ककार—पकारयोर्यथाय[१२]थं सकारं षकारं चापद्यते।

---

१. ध्यर्थम् ख. कारार्थम् क. घ.
२. 'अध्याये'''भवति' पाठो नास्ति क.
३. व्यच्छन्तमि. घ.
४. यस्योपद घ.
५. यस्योप घ.
६. सह इति घ.
७. यकार ज.
८. सका क.
९. पूवः ज
१०. पकारे नास्ति क.
११. सूत्रस्थाने ३।२३ ज.
१२. यथासङ्ख्यं क. घ.

आविंष्कृणुष्व[१] (पद० १३।१२ सं० १३।१३)
[२]अम्ब निष्पर (पद० ६।३४ सं० ६।३६)
इडस्पदे[३] (पद० १५।२६ सं० १५।३०)
इडा [४]यास्पद[५]म् (पद० ४।२२ सं० ४।२२)
इडायास्पदे[६] (पद० ३४।१५ सं० ३४।१५)
वसतिष्कृता (पद० १२।७० सं० १२।७९)
वरिवस्कृणोतु (पद० ५।३७ सं० ५।३७)

[२४९] [७]दिवोऽककुत्—पृथिव्योः ।३।२४।।

दिव इत्ययं विसर्गः[८] क—पयोः समापद्यते ककुत्-पृथिवीशब्दौ[९] वर्जयित्वा।
दिवस्परिं (पद० १२।१७ सं० १२।१८)
दिवस्पु त्रायं (पद० ४।३५ सं० ४।३५)
दिवस्पृ ष्ठे (पद० १५।५० सं० १५।५८) (पद० १५।५२ सं० १५।६४)
अककुदित्यादि किम्—
दिवः ककुत् (पद० ३।१२ सं० ३।१२)
दिवः पृथिव्या? (पद० २९।५३ सं० २९।५३)

[२५०] [१०]रायः सहस[११]स् पोष-पुत्रयोः ।३।२५।।

एतौ यथासङ्ख्यं पोष-पुत्रयोः परयोः[१२] सकारमापद्य[१३]ते।
रायस्पोषे[१४] (पद० सं०)

---

१. ष्व नास्ति ख. ज.
२. अम्ब नास्ति ख. ज.
३. स्पते घ.
४. इदाया ज.
५. नैतदुदाहरणम् क. घ.
६. इदमुदाहरणं क. घ. एव.
७. सूत्रस्थाने ३।२४ इत्येव ज.
८. सगः ज.
९. शब्द ज.
१०. सूत्रस्थाने ३।२५ ज.
११. सहस्पो घ.
१२. रयो ज.
१३. द्येते ख.
१४. क. घ. एवैतत्

रायस्पोषेण[1] (पद० ४।२२ सं० ४।२२)
सहस्रस्पुत्र? (पद० ११।६५ सं० ११।७०)

[२५१] [2]तमसोऽपरस्तात् ।३।२६।।

क—पयोरयं विसर्गः[3] सकारमापद्यते[4] परस्ताच्छब्दं वर्जयित्वा ।
तमसस्पारम्[5] (पद० १२।६४ सं० १२।७३)
तमसुस्परि[6] (पद० २०।१६ सं० २०।२१)
अपर[7]स्तात् [8]किम्—
तमसः परस्तात् (पद० ३१।१८ सं० ३१।१८)

[२५२] त[9]प[10]सस्पृथिव्याम् ।३।२७।।

अयं समापद्यते पृथिवीशब्दे परे[11] ।
तपस[12]स्पृथिव्याम् (पद० ३७।९ सं० ३७।१६)

[२५३] [13]अ[14]ध्वनो-रजसो-रिष-स्स्पृश-स्पातौ ।३।२८।।

एते चत्वारः पाधातौ सकारमापद्यन्ते ।
अध्वनस्पातु (पद० ४।१९ सं० ४।१९)
रजसस्पाति[15] (पद० १७।५६ सं० १७।६०)
रिषस्पाहि (पद० ३।४७ सं० ३।४८)
सुं स्पृशस्पाहि (पद० ३७।४ सं० ३७।११)

---

१. क. घ. वर्जमेतत्
२. सूत्रस्थाने ३।२६ ज.
३. सगः ज.
४. समा क. ज. घ.
५. ख. ज. एवैतदुदाहरणम् ।
६. क. घ एवैतदुदाहरणम् ।
७. पस्तात् घ.
८. स्तार्कि ख.
९. सूत्रस्थाने ३।२७ ज.
१०. तमस घ.
११. परे नास्ति क. ख.
१२. तपस्पृ ख.
१३. सूत्रस्थाने ३।२८ ज.
१४. स्पातु ज. ग.

[२५४] अ[1]ध्वनस्कुर्विति च ।३।२९।।

एतन्निपात्यते ।

सकां[2]मां २ ।। अध्वंनस्कुरु (पद० २६।१ सं० २६।१)

[२५५] [3]समानपदे च ।३।३०।।

एकपदे विद्यमानोविसर्गः[4] क-पयोर्यथा[5]यथं सकारं षकारं चापद्यते, इतौ परे चर्चायां च न ।

श्रेयस्कर[6] (पद० १०।२६ सं० १०।२८)
तपस्पतिं (सं० ५।६,४०)
जास्त्यपम् (सं० ३३।१२)
हविष्कृत् (सं० १।१५)
चतुष्पात् (सं० १२।९५)

स्थितोपस्थिते—

श्रेयं[7] करेति श्रेयं । कर (पद० १०।२६)
तपः पतिरिति तपं ÷ । पति[8] (पद० ५।६,४०)
जाः पत्यमिति जाः । पत्यम् (पद० ३३।९)
हविं कृ दिति हविं । कृत् (पद० १।१५)
चतुः[9] पादिति चतुं । पात् (पद० १२।८६)
इत्यादि भवति ।

[२५६] [10]पराव[11]वसाने ।३।३१।।

अवसानस्थिते परिशब्दे[12] परे विसर्गः समाप[13]द्यते ।

ओषधयुस्परिं (पद० १२।८२ सं० १२।९१)

---

१. सूत्रस्थाने ३।२९ ज.
२. कामाँ क. कामा २ ज. कामाँ घ.
३. सूत्रस्थाने ३।३० ज.
४. सगः ज.
५. यथासङ्ख्यं क.
६. स्करा घ.
७. श्रेयस्करे क. घ
८. पति । घ.
९. चतुष्पादि क. घ.
१०. सूत्रस्थाने ३।३१ ज.
११. रावसा घ.
१२. शब्दे[ ]परे[ ]नास्ति क.
१३. माद्यते ख.

अवसाने किम्—

हेड॒ पर्रि (पद १३।४१ सं० १३।४५)

[२५७] क[1]विः—करत्-कृधिषु ।३।३२।।

एतेषु[2] विसर्गः सकारं षकारं[3] वापद्यते ।

वसुष्कृविः (पद० ५।३२ सं० ५।३६)

श्रेयंसस्करत्[4] (पद० १०।२६ सं० १०।२८)

पुनंस्कृधि (पद० ४।१४ सं० ४।१४)

[२५८] [5]कृषीश्च कृधौ सकारम् ।३।३३।।

[6]कृषीरित्ययं विसर्गः कृधिशब्दे सकारमापद्यते । भाव्युपधत्वात् पूर्वसूत्रेण षकारे प्राप्ते विधिः ।

कृ॒षीस्कृ॑धि[7] (पद० ४।१० सं० ४।१०)

[२५९] [8]सदो-द्यौ-र्नमस्कृतं-पिता-पथेषु ।३।३४।।

सद[9] इत्यादीनां त्रयाणां विसर्गः कृतमित्यादिषु यथासङ्ख्यं[10] परेषु यथाय[11]थं सं षं चापद्यते ।

येषा॑म॒प्सु[12] सदं॑स्कृ॒तम् (पद० १३।७ सं० १३।८)

उप॑हूतो[13] द्यौष्पिता (पद० २।११ सं० २।११)

शर्म॑ सु॒प्रथा॑[14] नम॑स्पथे (पद० १८।५० सं० १८।५४)

---

१. सूत्रस्थाने ३।३२ ज. कविष्क क. घ. रक्तृधि ख.

२. एषु क.

३. सकारः ज.

४. श्रेयस्कर ख.

५. सूत्रस्थाने ३।३३ ज.

६. कृषि घ. ज.

७. कृषि स्कृ. ज. कृधीस्कृ ख.

८. सूत्रस्थाने ३।३४ ज. सदौ घ

९. सह क.

१०. संख्यप ज.

११. यथासंख्यं क.

१२. 'येषामप्सु' क एव

१३. उपहूतो क. एव

१४. शर्म सप्रथाः क. एव

[२६०] पति[1] ताल[2]व्यस्वरोदये पदे च।३।३५,३६।।

तालव्यस्वरान्ते [3]पतिशब्दे[4] पदरूपे परे विसर्गः सकारमापद्यते। तालव्य[5]-स्वरोदय इति सम्भवा[6]भिप्रायम्।

ब्रह्मणस्पते[7] (पद० ३४।५७ सं० ३४।५८)
वाचस्पतये[8] (पद० ७।१ सं० ७।१)
वाचस्पतिम् (पद० ८।३९ सं० ८।४५)
पदे किम्[9]—'तस्मिन्निति निर्दिष्ट' (ज्यो० प्रा०)

इति सप्तमीनिर्दिष्ट वर्णविषयम्। अत्र चेदमेव ज्ञापकं पदावयवे व्यवहितस्या सम्भवात्।

यतो जात? प्रजापतिः (पद २३।५६ सं० २३।६३)

[२६१] [10]न परुषः परुषि।३।३७।।

परुष इत्ययं विसर्गः परुषि न सकारमापद्यते। 'समानपदे च' (ज्यो० २५५ प्रा० ३।३०) इति[11] प्राप्तस्य निषेधः।

प्ररोह[12]न्ती परुषः परुषस्परि[13] (पद० १३।१८ सं० १३।२०)

[२६२] वा[14]जपति-र्वासऽ-एदिधिषु-रन्तः पा[15]र्श्व्येनान्तः पाश[16]र्व्यं मिति च[17]।३।३८।।

---

१. सूत्रस्थाने ३।३५ ज.
२. ताव्य घ.
३. प्रति घ.
४. पतिशब्दे नास्ति क.
५. तालस्व ज.
६. संभवदभि. क.
७. स्पतये क.
८. नैतदुदाहरणम् क.
९. पदेकिम् नास्ति ज.
१०. सूत्रस्थाने ३।३७ ज.
११. इति नास्ति घ.
१२. प्ररोहन्ती नास्ति ख. ज
१३. परि नास्ति ख. ज.
१४. सूत्रस्थाने ३।३८ ज. वाजयति घ.
१५. रन्तपा ख.
१६. ख पार्श्वं घ.
१७. च नास्ति घ.

क-पयो'र्वाज[1]पति'रित्यादीनां त्रयाणां **विसर्गो** 'अन्तः[2] पर्शव्येने' त्यादिपदद्वय[3]-सम्बन्धी च **न विकारमापद्यते।**

वाज'[4]पतिः कुविः (पद. ११।२२ सं. ११।२५)

'कविः[5] करत्' (ज्यो० २५७ प्रा० ३।३२) इत्यस्य निषेधः।

वासः पल्पूलीम् (पद० ३०।१० सं० ३०।१२)

एदिधिषुः[6] पतिम् (पद० ३०।७ सं० ३०।९)

अन्तः पर्शव्येन (पद० ३९।९ सं० ३९।९)

अन्तः पार्श्व्यम्[7] (पद० ३९।९ सं० ३९।९)

'समानपदे च' (ज्यो० २५५ प्रा० ३।३०) इति प्राप्तस्य निषेधः।

'इति च' इत्यनुक्तसमुच्चयार्थम्। तेन—

जातः पति'÷(पद० १३।३ सं० १३।४)

इत्यत्र न सकारः।

[२६३] अ[8]हः पतौ रेफम्।३।३८॥

अहः इत्ययं **विसर्गः** पति[9]शब्दे परे **रेफमापद्यते।**

'समानपदे' (ज्यो० २५५ प्रा० ३।३०) [10]इत्यस्यापवादः।

अहर्पत'ये (पद० ९।१९ सं० ९।२०)

स्थितोपस्थिते तु[11]—

अहः पत'ये इत्य'हः। पत'ये (पद० ९।१९)

[२६४] [12]परश्च मूर्द्धन्यम्।३।४०॥

अधिकारोऽयम् 'परश्च' इति 'त आघा[13]दनाडम्बरात्' (ज्यो० २६८ प्रा०३।४८) इत्यस्मात् प्राक्, 'मूर्द्धन्यम्' इति तमभिव्याप्य।

---

१. वाजयति घ.
२. अन्तप ख.
३. द्वयं स. ज.
४. वाजः पतिः ज.
५. कविष्क क. घ.
६. षुण. ज.
७. पाश्र्य ज. पार्श्वं घ.
८. सूत्र स्थाने ३।३९ ज.
९. प्रति घ.
१०. पद इ ज.
११. ते षु क.
१२. सूत्रस्थाने ३।४० ज.
१३. आघाता घ. ज.

[२६५] स्वर्धूः[1] साँसहयोः ।३।४१।।

स्वः धूः इमौ[2] य[3]थासङ्ख्यं सां-सह-इत्येतयोः रेफमापद्यते, परश्च मूर्द्धन्यम् ।
स्व[4]र्षामप्साम् (पद० २४।२० सं० ३४।२०)
इ[5]तं धूर्षाहौ (पद० ४।३३ सं० ४।३३)
'विकारी यथासन्नम्' (ज्यो० ९५ प्रा० १।१४२) इति[6] ईषद्वि[7]वृतत्वात् [8]षकारः । स्थितोपस्थिते—

स्वः सामिति स्वः । साम् (पद० ३४।२०)

धूः सहाविति धूः । सहौ (पद० ४।३३)

[२६६] [9]उकारं दुर्दे ।३।४२।।

[10]दुरित्ययं विसर्गः[11]उकारमाप[12]द्यते [13]दकारे परे, परश्च मूर्द्धन्यम् । धिसंज्ञकत्वा-[14]दसोष्मत्वा[15]-न्निरनुनासिकत्वाच्च ड[16]कारः ।
परि ते दूडभः (पद० ३।३६ सं० ३।३६)

स्थितोपस्थिते—

[17]दुर्दभऽ इति । दुदर्भः (पद० ३।३६)
'अध्याय' (ज्यो० २४४ प्रा० ३।१९) इत्युक्तत्वादुपस्थिते 'रेफँ स्वर-धौ' (ज्यो० २२६ प्रा० ४।३६) इति भवति ।

---

१. सूत्रस्थाने ३।४१ ज.
२. एतौ क.
३. 'यथा''''विकारी' पाठो नास्ति ज.
४. अप्साम् नास्ति ख.
५. इतं नास्ति ख.
६. इति नास्ति घ.
७. षत्त ख. षत् घ. वृतत्वान्यका क.
८. यका घ.
९. सूत्रस्थाने ३।४२ ज.
१०. दुः अयं ज.
११. सगः ज.
१२. मापते ज.
१३. दकारे परे नास्ति क.
१४. त्वाल्लृदसो घ.
१५. ष्मत्या घ.
१६. उका ज.
१७. दु ज.

स्थिते तु न संहिताया (ज्यो० ११६ प्रा० ३।१) अ[1]भावात् ।

[२६७] ओ[2]कारमितः सि[3]ञ्चतौ सोपधः ।३।४६॥

इतः इत्ययं **विसर्गः** पूर्ववर्णसहित ओकारमापद्यते सिञ्चतौ परे, **परश्च मूर्द्धन्यम्** ।

परीतो षिञ्चता[4] सु तम् (पद० ९।१२ सं० ९।१२)

॥ इति विसर्गसन्धिः ॥

❀ विशेषः संस्कारसन्धिः ❀

[तकारस्य टकारादेशः]

[२६८] त[5] आघादनाड[6]म्बरात् ।३।४८॥

आघा[7]शब्दात् परस्तकारो मूर्द्धन्यमापद्यते, स चे[8]दाघाशब्दः आडम्बरशब्दात् परो न[9] ।

दार्वाघाटः (पद० २४।३५ सं० २४।३५)

जित्संज्ञकत्वा-दसोष्मक[10]त्वाच्च टः । स्थितोपस्थिते तु[11]—

दार्वाघात[12] इति दारु । आघातः (पद० २४।३५)

अनाडम्बरात्[13] किम्—

शब्दा[14]याडम्बराघातम् (पद० ३०।१७ सं० ३०।१९)

---

१. तायामसंभवात् ज.
२. सूत्रस्थाने ३।४६ ज.
३. षिञ्चतौ क. घ.
४. ञ्चत इत्येव ख. ज.
५. सूत्रस्थाने ३।४८ ज.
६. नाऽम्ब घ.
७. आद्या घ.
८. 'चेद्दारुशब्दात्परः' इति पदद्वयस्थाने ज.
९. ना. ख.
१०. ष्मत्वा ज.
११. तु नास्ति ज.
१२. घाट क.
१३. रात्ति ख
१४. शब्दाय नास्ति ख. ज.

[रेफागमविधानम्]

[२६९] [1]वनसदोऽवेटो[2] रेफेण ।३।४९।।

वन[3]शब्दः सदशब्दे परे रेफेण व्यवधीयते, वनशब्दो 'वेट्' शब्दात् परो न चेत् ।

भुरण्यवो[4] वनर्षदं (पद० ३३।१ सं० ३३।१)

स्थितोपस्थिते—

वनसदऽइति वन । सद (पद० ३३।१)

अवेटः किम्—

[5]वेड्वं[6]नसदे (पद० १७।११ सं० १७।१२)

[सकारागमविधानम्]

[२७०] [7]पत्यौ च सकारेण ।३।५०।।

वनशब्दः पतिशब्दे सकारेण व्यवधीयते ।

वनस्पतिं [8]शमिता देवः (पद० २९।३५ सं० २९।३५) इदं[9] शाखान्तर-विषयम् । अत्र लेख[10]नं तु 'सकारेण' इत्यनुवृत्तिप्रदर्शनार्थम्[11] ।

[२७१] [12]ऋता-वरौ च पति-परयोः ।३।५१।।

ऋत-अवर-एतौ पति-परयोः सकारेण व्यवधीयेते[13] ।

[14]तव व्यायवृतस्पते (पद० २७।३३ सं० २७।३४)

तू[15]र्णवध्ममवरस्परायं (पद० ३०।१७ सं० १७।१९)

---

१. सूत्रस्थाने ३।४९ इत्येव ज.
२. वेरो घ.
३ वनः शब्दः क. घ. ख.
४. भुरण्यवो नास्ति ख. ज.
५. अप्सुषदे घ. ग.
६. वेट् वन घ. क.
७. सूत्र स्थाने ३।५० ज.
८. शमिता देवः नास्ति ख. ज.
९. इदं च क. घ.
१०. खन तु ज.
११. र्शनार्थः क.
१२. सूत्रस्थाने ३।५१ इत्येव
१३. यते ज.
१४. तव व्यायो नास्ति ख. ज.
१५. तूणवध्मं क. घ एव ।

स्थितोपस्थिते तु[1]—
ऋतंपत॒ऽ इत्यृतं । पते (पद० २७।३३)
अ॒व॒र॒प॒रायेत्यंवर । प॒रायं (पद० ३०।१७)

[२७२] तद्[2]-बृहतौ कर-पत्योस्तलोपश्च ।३।५२।।

तत्[3]-बृहत्-एतौ कर-पतिशब्दयोः प्रत्यय[4]योर्यथासङ्ख्यं **सकारेण व्यवधीयेते** पूर्वपदयोश्च **तकारलोपो** भवति । यथा—
तत् + करान् = तस्क॑राँ ऽउत (पद० ११।६६ सं० ११।७१)
बृहत् + पतिः = बृहस्पतिं (पद० २५।१७ सं० २५।१९)

[षकारागमविधानम्]

[२७३] [5]परि कृते षकारेण ।३।५३।।

परीत्य यं कृते परे[6] **षकारेण व्यवधीय**[7]ते ।
परिष्कृतां शु क्रा[8]? (पद० २१।३९ सं० २१।४२) स्थितोपस्थिते तु—
परिंकृता॒ऽ इति॒ परिं । [9]कृतां । (पद० २१।३९)

[शकारागमविधानम्]

[२७४] [10]चन्द्रे सु शकारेण ।३।५४।।

सुशब्दः चन्द्रे शब्दे[11] परे[12] **शकारेण व्यवधीयते** ।
उ॒भे सु॑श्चन्द्र[13] (पद० १५।३९ सं० १५।४३)
स्थितोपस्थिते—सु॑च॒न्द्रेतिं । सु । चन्द्र (पद० १५।३९)

---

१. तु नास्ति ख.
२. सूत्रमेतत् सवृत्तिकं नास्ति ख. ज.
३. तद् घ क.
४. प्रत्ययो घ.
५. सूत्रस्थाने ३।५३ ज.
६. परे नास्ति ज.
७. धीयेते घ. ततः—'पूर्वपदयोश्च तकारलोपो भवति । यथा—तत्कारान् तस्करीं उत' इति पूर्वसूत्रोक्तं पुनरावृत्तं क. घ.
८. शुक्राः नास्ति ख. ज. घ.
९. ष्कृताः घ.
१०. सूत्रस्थाने ३।५४ ज.
११. शब्दे नास्ति क. घ. ज.
१२. परे नास्ति ज.
१३. न्द्रः घ

[दकारादेशविधानम्]

[२७५] [1]दुधुक्षन् धो दकारम् ।३।५५।।

दुधुक्षन्नित्ययं[2] धकारो[3] दकारमापद्यते ।

[4]बृहतीन्दुदुक्षन् (पद० ३३।२५ सं० ३३।२८) [5]स्थितोपस्थिते—

दुधुक्षन्निति दुधुक्षन् (पद० ३३।२५)

❀ नति प्रकरणम् ❀

[२७६] भा[6]विभ्यः सः[7] षं समानपदे ।३।५६।।

भाविभ्यः परः सकार एकपदे विद्यमानः षकारमापद्यते ।

[२७७] षा[8]त् त-थौ मूर्द्धन्यम् ।३।८०।।

ष[9]कारात् परौ त-थौ मूर्द्धन्यमापद्येते[10] ।

व्रजङ्गच्छ[11] गोष्ठानम् (पद० १।२५ सं० १।२५)

परमेष्ठ्यभिधीत[12] (पद० ८।४८ सं० ८।५४)

अप्स्वन्तरा[13] सुषाव (पद० १९।२ सं० १९।२)

भुवना[14] सीषधाम (पद० २५।४४ सं० २५।४६)

दुष्टरस्तरन्[15] (पद० ९।३६ सं० ९।३७)—तस्य टः, जित्संज्ञकत्वात् सोष्मत्वाच्च[16] थस्य ठः । स्थितोपस्थिते तु[17]—

---

१. सूत्रस्थाने ३।५५ ज.
२. त्यत्र ख. घ. ज.
३. 'धकारो' स्थाने धो ज.
४. बृहतीम् क. एव
५. 'स्थितो....क्षन्' पाठः नास्ति घ.
६. सूत्रस्थाने ३।५६ ज.
७. सुः ख.
८. सात् घ.
९. षात्परौ ज.
१०. द्यते घ. क.
११. व्रजङ्गच्छ नास्ति ख. ज.
१२. अभिधीतः नास्ति ख. ज.
१३. अप्स्वन्तरा नास्ति ख. ज.
१४. भुवना नास्ति ख. ज.
१५. तरत् क. घ. नास्ति ख. ज.
१६. चास्य पाठः क. घ.
१७. तु नास्ति ख. ज.

गोस्थानमिति गो । स्थानम्[1] (पद० १।२५)
परमेस्थीति परमे । स्थी[2] (पद० ८।४८)
दुस्तर इति दु । त[3]र (पद० ९।३६)
सुसावेति सु सावं (पद० १९।२)
सीसधामेति सीसधाम (पद० २५।४४)
'तस्मादित्युत्तरस्य' (ज्यो० ९१ प्रा० १।१३५) इत्यवहितस्य[4] । तेन—
प्रेषितं (पद० २१।५७ सं० २१।६१) इत्यत्र तकारस्य मूर्द्धन्यो न ।

[२७८] अ[5]नुस्वाराच्च[6] तत्पूर्वात् ।३।५७।।

भाविपूर्वादनुस्वारात् परः सकारः [7]षकारमापद्यते ।
तपूंष्यग्ने[8] (पद० १३।८ सं० १३।९)
पुरोडाशैं हुवींष्या[9] (पद० १९।१८ सं० १९।२०)
तत्पूर्वात् किम्[10]—
व्वा[11]म्मनांसि (पद० १२।५० सं० १२।५८)

[२७९] क[12]-रे[13]फाभ्यां च ।३।५८।।

ककार[14]-रेफाभ्यां च परः सकारः ष[15]कारमापद्यते । ऋक्षु (नास्ति पद-संहितापाठयोः)
वनर्षदं (पद० ३३।१ सं० ३३।१)

१. स्थान ज.
२. स्थो ज.
३. दुस्तरः ख. ज.
४. तस्या घ.
५. सूत्रस्थाने ३।५७ ज.
६. च्चा घ.
७. सका घ.
८. तपू ं ब्यग्ने घ. तपूंषि एव ख. ज.
९. हवीं षि एव ख. ज.
१०. म् नास्ति घ.
११. वाम् नास्ति ख. ज. वा घ.
१२. सूत्रस्थाने ३।५८ ज.
१३. रैफा घ.
१४. करेफा ज. ककारेफा घ.
१५. सका. घ.

अनुस्वारात् क[1]काराच्च परस्य ष[2]त्वं व्याकरणात्[3] सिद्धम्, अत्र लेखनं तु—

हिꣳसी[4] (पद० ३।६२ सं० ३।६३)

ऋक्सामयोः[5] (पद० ४।९ सं० ४।९)

इत्यादिनिषेधस्य वक्ष्यमाणत्वात्[6] प्राप्तिप्रदर्शनार्थम्[7]।

[२८०] नेः[8] सीदतेः ।३।५९।।

नेः परः सी[9]दधातोः सकारः [10]षकारमापद्यते ।

ए[11]दं बर्हिर्निषी॑दत (पद० ७।३२ सं० ७।३४)

[२८१] [12]ससाद च ।३।६०।।

नेः परः ससादेति सकारः षकारमापद्यते । [13]एतस्य 'सद्'धातुज[14]त्वात् स्पष्टार्थम् ।

नि षसाद[15] धृ॒तव्र॑त[16] (पद० १०।२५ सं० १०।२७)

[२८२] ओकारात् सु ।३।६१।।

ओकारात् परः सु-सकारः षकारमापद्यते ।

मो षू ण॑ (पद० ३।४५ सं० ३।४६)

---

१. फका. ज.
२. सत्यं घ.
३. रणसिद्धं क. घ.
४. हिꣳ सि घ.
५. ऋक्षामयोः घ.
६. त् नास्ति ज.
७. पदर्शनार्थं ज.
८. ने सी. घ.
९. सद क. ख.
१०. सका. घ.
११. एदं बर्हिर् नास्ति ख. ज. बर्हिषीदत घ.
१२. सूत्रस्थाने ३।६० ज.
१३. 'एतस्य' प्रकृति मोषूणः' इत्यतः पूर्वं
१४. नास्ति पाठः ज.
१५. धातुकत्वा घ. धातुत्वा क. षषाद घ.
१६. व्रनः ख.

[२८३] [1]उश्चापृक्तात् ।३।६२।।

अपृक्तादुकारात् परः 'सु'सकारः[2] षकारमापद्यते ।

[3]ऊर्ध्वं ऊ षु णः (पद० ११।३९ सं० ११।४२)

[२८४] अभेश्च ।३।६३।।

अभेः परः 'सु' सकारः षकारमापद्यते ।

अभीषुणः (पद० २७।४० सं० २७।४१)

[२८५] [4]परेः सि[5]ञ्चतेः ।३।६४।।

परेः परः सि[6]ञ्चतेः सकारः षकारमापद्यते ।

परिषिञ्चन्ति[7] (पद० २०।२२ सं० २०।२८)

[२८६] [8]अभेश्च ।३।६५।।

अभेः परः सिञ्चतेः[9] सकारः षकारमापद्यते ।

अभिषिञ्चामि (पद० ९।२९ सं० ९।३०)

[२८७] [10]अव्यवहितोऽपि ।३।६६।।

अभेः परः[11] अकारव्यवहितोऽपि सिञ्चतेः सकारः षकारमापद्यते ।

मित्रावरुणा[12]वभ्यषिञ्चन् (पद १०।१; सं० १०।१) ।

[२८८] वेर्युदयः[13] ।३।६७।।

वेः पर[14]भूतो यकारपरः सकारः[15] षकारमापद्यते ।

---

१. सूत्रस्थाने ३।६३ ज.

२. पदमिदं नास्ति घ.

३. ऊर्ध्वः नास्ति ख. ज., उर्ध्वः घ.

४. सूत्रस्थाने ३।६४ ज.

५. षिञ्चतेः घ.

६. सिं इत्येव ख.

७. ञ्चति'घ. क.

८. सूत्रस्थाने ३।६५ ज.

९. ञ्चतः ज.

१०. सूत्रस्थाने ३।६६ इत्येव ज.

११. परो क. घ.

१२. 'मित्रावरूणाव्' नास्ति ख. ज.

१३. सूत्रस्थाने ३।६७ इत्येव ज.

१४. परो ज. ग. परिभूतो क.

१५. कारः ज. ग. पकार क.

विष्<u>या</u>म्या[1]यु<u>'षो</u> न मध्यात् (पद १२।५६ सं० १२।६५) यु[2]दयः किम्—

विस्<u>व</u>ं पश्<u>य</u>[3] (पद० ७।४१ सं० ७।४५)

[२८९] र्हेर्मि-थोदयः ।३।६८।।

हेः प[4]रभूतो मकारपरः थकारपरश्च[5] सकारः षकारमापद्यते[6]।

हि ष्मा ते[7] (पद ३।४५ सं० ३।४६;)

आ<u>पो</u> हि <u>ष्ठा</u> (पद ११।४७; सं० ११।५०)

[२९०] द्यवेश्च ।३।६९।।

द्यविशब्दात्परः थकारोदयः सकारः[8] षकारमापद्यते। मकारस्तु (ज्यो० २८९ शु० प्रा० ३।६८) असम्भवान्न संबद्धयते[9]।

उप<u>् द्य</u>'[10]वि<u>ष्ठ</u> (पद० ३३।४८; सं० ३३।५३)

[२९१] नेः[11] स्त्या-स्तनोः ।३।७०।।

निशब्दात् परः स्त्या[12]—स्तन-संबन्धी[13] सकारः षकारमापद्यते। 'नि-[14] + स्त्यायताम्, निः[15] + स्तनिहि' इति स्थिते[16] 'लुङ्[17] मुदि जित्परे' (ज्यो० २३९ शु० प्रा० ३।१३) इति विसर्गलोपे कृते[18] सस्य षः।

---

१. विष्यामि इत्येव ख. ज.

२. व्युदयः ज.

३. पश्य नास्ति ख.

४. परि ख. परो ज. ग. परी क.

५. थका....च नास्ति ज. ग.

६. इत उत्तरं 'मापद्यते' पर्यन्तं पाठो नास्ति क. घ.

७. विष्यामि इत्युदाहरणम् ज.

८. सकरः ज.

९. ध्यते ख.

१०. द्य नास्ति ज.

११. ने स्त्या ख. क.

१२. स्त्या नास्ति घ. क.

१३. बन्धि घ. क.

१४. निरस्त्या क. घ.

१५. निस्त घ निः नास्ति ज.

१६. षु ज. ख.

१७. लुङि ज.

१८. कृते नास्ति घ.

आ[१]प्यायतां निष्ट्या यताम् (पद ६।१३; सं० ६।१५)
निष्टनिहि (पद० २९।५६; सं० २९।५६)

[२९२] ततक्षौ ।३।७१।।

'नि' [२]इत्य[३]स्मात्परः सकारः षकारमापद्यते ततक्षौ परे। 'त-थयोः '(ज्यो० १९३ शु० प्रा० ३।१६६) इति सस्य षः।

स्वधया निष्टतक्षु (पद० १७।८५ सं० १७।६२)

[२९३] अनोः[४] स्तुवन्त्याम् ।३।७२।।

अनोः परः स्तुवन्ति-सकारः षकारमापद्यते।
अनुष्टुवन्ति पूर्वथा[५] (पद० ३३।८७ सं० ३३।९७)

[२९४] [६]दुःस्वप्न्यम् ।३।७३।।

इदं कृतषत्वं निपात्यते।
दुःस्वप्न्यंसुव (पद ३५।१० सं० ३५।११) स्थितोपस्थिते तु[७]—
दुःस्वप्न्यमिति दुः । स्वप्न्यम्[८] (पद ३५।१०)

[२९५] वन्दारुर्माकिः ।३।७४।।

एतयोः सकारः[९] षकारमापद्यते। [१०]इह (ज्यो० २७६-२९५ शु० प्रा० ३।५६-३।७४) यानि विसर्गान्तानि पदानि तेषां 'त-थयोः सम्' (ज्यो० १९३ प्रा० ३।१६६) इति सत्त्वे जाते षः।

वन्दारुष्टे (पद० १२।३५ सं० १२।४२)
माकिष्टे (पद० १३।१०;सं० १३।११)

[२९६] सहेः पृतनायाः ।३।७५।।

पृतनाशब्दात् परः सहेः सकारः षकारमापद्यते।

---

१. आप्यायतां क एव.
२. निः इत्य घ.
३. इत्यत्यस्मा ज.
४. नोस्तु ज. क.
५. पूर्वथा नास्ति ख. ज.
६. दुस्वप्न्यम् ज.
७. तु नास्ति ज.
८. अत्र 'एतयोः सकारः षकारमापद्यते' इत्यधिकः ख. पाठः लेखकप्रामादिकः.
९. कारं ज.
१०. 'इह''''सत्वे जाते षः' पाणें नास्ति ज 'इह''''मापद्यते' नास्ति क. घ.

पृतनाषाह्याय च (पद १८।६२; सं० १८।८६)
स्थितोपस्थिते—

पृतनास[1]ह्यायेति पृतना। स[2]ह्याय (पद १८।६२ सं० १८।६८)
अभाविपूर्वाद[3]प्राप्ते (सू० २७६ शु० प्रा० ३।५६) विधिः।

[२९७] सधिर ॐ शु-रदितिः ।३।७६॥

एतेषां त्रयाणां सकारः षकारमापद्यते।
अप्स्वग्ने[4] सधिष्टव (पद १२।३१; सं० १२।३६)
अॐशुरॐशुष्टे (पद ५।७; सं० ५।७)
अदितिष्टे (पद ११।५६; सं० ११।५९)

[२९८] वायु-रग्नि-रग्ने—रेकाक्षरे ।३।७७॥

एतेषां[5] त्रयाणां सकारः एकाक्षरे पदे[6] षकारमापद्यते।
व्वायुष्ट्वा प[7]चतैः (पद २३।११; सं० २३।१३)
अग्निष्टेधिपतिः[8] (पद १३।२२; सं० १३।२४)
अग्नेष्ट्वा तेजसा[9] (पद १३।१२; सं० १३।१३)

एकाक्षरे किम्—
अग्निस्तिग्मेन (पद १७।१५ सं० १७।१६)
अग्नेस्तनूः (पद १।१५; सं० १।१५)

[२९९] सकारपरे च ।३।७८॥

भाव्युपधः सकारः सकारपरे एकाक्षरे पदे परे[10] षकारमापद्यते।
अवतत्य[11] धनुष्ट्वं[12]ॐ सहस्राक्ष[13] (पद. १६।१३ सं० १६।१३)

---

१. नासाह्या घ.
२. नासाह्या घ.
३. पूर्वात् प्रा ज. अभावि नास्ति घ.
४. अप्स्वग्ने नास्ति ख. ज,
५. एषां ज.
६. परे घ.
७. 'पचतैः''''अग्नेष्ट्वा' पाठो नास्ति घ. पचतैः नास्ति ज.
८. त्रिपतिः नास्ति ज.
९. तेजसा नास्ति ज.
१०. परे नास्ति क. घ.
११. अवतत्य नास्ति ख. ज.
१२. नुष्वम् क.
१३. सहस्राक्ष नास्ति क. घ.

सकारपरे किम्—

सुवितुस्त्वा प्रसुवे (पद. १।३१ सं० १।३१)

[३००] मातृभि-र्रुचिभिः—पायुभि—र्वरूत्रीः[1] ।३।७९।।

एतेषां चतुर्णां सकारः[2] षकारमापद्यते ।

सङ्‌सृज्य[3] मातृभिष्ट्वम् (पद० १२।३२ सं० १२।३८)

शिवेभि[4]र्रुचिभिष्ट्वम् (पद० १२।२८ सं० १२।३२)

अदब्धेभिः सवितः[5] पायुभिष्ट्वम् (पद० ३३।६२ सं० ३३।६९)

र्व्वरूत्रीष्ट्वा (पद० ११।५८ सं० ११।६१)

।। इति नतिविधानम् ।।

अथ नत्यपवादप्रकरणम्

[अधिकार सूत्रम्]

[३०१] प्रकृत्या[6] नानापदस्थे तकारे ।३।८१।।

अधिकारोऽयम् ।

[षट्‌त्रिंशत्सकाराणां प्रकृतिभावविधानम्]

[३०२] [7]अनुसन्तनोतु-बृहस्पतिसुतस्य-सुसमिद्धायसुसन्दृश-मभिसत्वा[8]भिसंविशन्तु- सुसस्याऽ- अतिस्थूल- म्मुसले- पत्नीसँय्याजान्- क्रतुस्थलाञ्जिसक्क्थो- दिविस्पृशा- हृदिस्पृश[9]ङ्- हिङ्‌सी- र्ऋक्सामयो- ऋक्क्-सामाभ्यां- तित्तिरिः सीसेन-सीसाः[10]-सीसं पशुसनि- गोसनि-प्रतिसदृङ्-प्रतिसदृक्षासश्च्च[11]तुस्त्रिङ्‌शत् ।३।८२।।

---

१. वरुत्रीः ज.

२. कारष ज.

३. सङ्‌सृज्य नास्ति ख. ज.

४. शिवेभिः नास्ति ख. ज.

५. अदब्धेभिः सवितः नास्ति ख. ज.

६. प्रकृत्या इत्येव सूत्रम् ज.

७. ज.— अनुसन्तनोत्वित्यादि० ३।८२ इत्येव

८. सन्त्वा क.

९. स्पृशं घ.

१०. सीसाः नास्ति घ.

११. श्चतु द्विरावृत्तं घ.

एते ष[१]ट्त्रिंशत्[२] ? (षड्विंशतिः) सकाराः प्रकृत्या भवन्ति ।
'हि ꣳ सीः' (पद० ३।६२ सं० ३।६३) इत्यत्र 'अनुस्वाराच्च' ।
(ज्यो० २७८ प्रा० ३।५७) इति प्राप्तिः । 'ऋक्साम' (पद० ४।९ सं० ४।९,१)
इति द्वयोः[३] (उद० १६-१७) 'क-रेफाभ्यां च' (ज्यो० २९१ प्रा० ३।५८) इति[४] ।
'तित्तिरिस्ते सर्पाणाम् (पद २४।३६
सं० २४।३६) इत्यत्र सकारपर' (ज्यो० प्रा०) इति ।
अन्यत्र समानपदत्वात् (ज्यो० प्रा०) ।

चतुस्त्रिꣳशदिति किम्—
ध[५]र्त्रंश्चतु ष्टोमं ÷ (पद० १४।१ सं० १४।२३)
—अत्र 'लुङ् मुदि[६]' (ज्यो० २३९ प्रा० ३।१३) इति विसर्गलोपे 'भाविभ्यः'
(ज्यो० २७६ प्रा० ३।५६) इति षत्वं[७] भवति ।
वीर्य्यं पुत्रोनुसन्तनोतु[८] (हौत्रसूत्र)
बृहस्पतिं सुतस्य (पद० ८।८ सं० ८।९)
सुसंमिद्धाय शोचिषे[९] (पद० ३।२ सं० ३।२)
सु सन्दृशन्त्वा (पद० ३।५१ सं० ३।५२)
अभिसत्वा सहौजा (पद० १७।३४ सं० १७।३७)
देवाऽ अभि संविशन्तु (पद० १३।२३ सं० १३।२५)
स सस्याः कृषीस्कृधिं (पद० ४।१० सं० ४।१०)
[१०]अतिस्त्थूलञ्चातिकृशम् (पद० ३०।२० सं० ३०।२२)
ऊलूखले मुसले (का० श्रौ० ३।८।१)
[११]शय्युना पत्नीसंयाजान् (पद० १९।२७ सं० १९।२९)
पुञ्जिकस्त्थला च क्रतुस्त्थला च[१२] (पद० १५।१५ सं० १५।१५)
शितिकक्षो ञ्झिसक्क्थः[१३] (पद० २४।४ सं० २४।४)

१. सप्त घ.
२. त्रिंशदिति सर्वेषु पुस्तकेषु । उचितं तु विंशतिरिति.
३. द्वये क. घ
४. इत उत्तरं 'पर इति' पर्यन्तं पाठो नास्ति घ.
५. धत्रं नास्ति ज. ख.
६. मुद् घ.
७. सत्वं घ.
८. इतः परमुदाहरणानि न सन्ति सूत्रे ज.
९. शोचिषे नास्ति क. घ. इत उत्तरं 'एवं सर्वत्र' इति विलिख्य सूत्रस्य वृत्तिः समापिता ख.
१०. ८-९ उदाहरणद्वयं नास्ति घ.
११. संयु क.
१२. च नास्ति घ.
१३. सक्थ्याः क.

बृहता दिविस्पृशा (पद० १५।२३ सं० १५।२७)

भद्रꣳ हृदिस्पृशम् (पद० १५।४० सं० १५।४४)

एनं ꣳ हि ꣳ सीः (पद० ४।१ सं० ४।१)

ऋक्क्सामयोꣳ शिल्पे (पद० ४।९ सं० ४।९)

ऋक्क्सामाभ्याꣳ सन्तरन्तꣳ (पद० ४।१ सं० ४।१)

तित्तिरिस्ते सर्प्पाणाम् (पद० २४।३६ सं० २४।३६)

सीसेन तन्त्रम् (पद० १९।७८ सं० १९।८०)

हरिणीꣳ सीसायुजः[1] (पद० २३।३५ सं० २३।३७)

· सीसञ्च मे (पद० १८।१३ सं० १८।१३)

प्रजासनि पशु सनि (पद० १९।४६ सं० १९।४८)

यो गोसनिꣳ (पद० ८।११ सं० ८।१२)

प्रति सदृङ् (पद० १७।७४ सं० १७।८१)

प्रति सदृक्क्षास एतन (पद० १७।७७ सं० १७।८४)

चतुस्त्रिꣳशद्वाजिनं ÷ (पद० २५।३९ सं० २५।४१)

[उदयमुखेन सकारप्रकृतिभावविधानम्]

[३०३] ऋकार-रेफा-रुदयश्च[2] ।३।८३।।

ऋकारः रेफः अर् इत्ये[3]तदुदयत्वेन च यः परः सकारः [स] प्रकृत्या ।

तिसृभिरस्तुवत[4] (पद० १४।२३ सं० १४।२८)

तिस्रश्च[5] मे (पद० १८।२४ सं० १८।२४)

व्वाचो[6] व्विसर्जनम् (पद० १।१५ सं० १।१५)

[षट्सकाराणां प्रकृतिभावविधानम्]

[३०४] पृथिवी-दिव्यु-परि[7]-चर्षणि-शकुनि-यासिभ्यः ।३।८४।।

---

१. युजः नास्ति घ.

२. च नास्ति क. ऋकार-रेफोरुदयः इति ख. ज.

३. इत्येतद् नास्ति क. घ. 'उदयत्वेन च यः' नास्ति ज.

४. अस्तुवत नास्ति ख. ज.

५. च मे नास्ति ख. ज.

६. वाचो नास्ति ख.

७. परीति' सूत्रस्वरूपं ज.

एतेभ्यः षड्[1]भ्यः सकारः प्रकृत्या ।
पृथिवि[2]सदन्त्वा[3] (पद० ९।२ सं० ९।२)
दिविसदन्त्वा[3] (पद० ९।२ सं० ९।२)
उपरिसदौ दुवस्वन्त[4]ꣳ (पद० ९।३५ सं० ९।३६)
चर्षणीसहां व्वेतु[5] (पद० २८।१ सं० २८।१)
शकुनिसादेनं कूर्म्मान्[6] (पद० २५।३ सं० २५।३)
अव[7]यासिसीष्ठाꣳ (पद० २१।२ सं० २१।३)

॥ इति नतिमहाप्रकरणे षत्वप्रकरणम् ॥

❀ नतिमहाप्रकरणे णत्वविधानम् ❀

[औत्सर्गिकं णत्वविधानम्]

[३०५] ऋ–ष–रेभ्यो नकारो[8] णकारꣳसमानपदे ।३।८५।।

[३०६] [9]स्वर–य–व–ह–क–पैश्च ।३।८६।।

ऋकार-षकार-रेफेभ्यः परः स्वर-यकार-वकार-हकार-कव[10]र्ग-पवर्गव्यवहितोऽपि नकारो णकारमापद्यते समानपदे। 'तस्मादित्त्युत्तर[11]स्य' (ज्यो० ९१ प्रा० १।१३५) इत्युक्तत्वाद्[12] व्यवधाने अप्राप्तत्वाद्[13] वचनादेतैर्व्यस्तैर्यथासम्भवमिलितैश्च व्यवायेऽपि[14] भवति, नान्यैः।

नृमर्णाꣳ (पद० १२।१७ सं० १२।१८)
पुरीषवाहंणꣳ (पद० ११।४१ सं० ११।४४)

---

१. षट्भ्यः ख.
२. थिवीस ज.
३. त्वा नास्ति ख. ज.
४. दुवस्वन्तः नास्ति ख. ज.
५. वेतु घ. वेत्तु नास्ति ख. ज.
६. कूर्मान् नास्ति ख. ज.
७. अव नास्ति ख. ज. वासि ज.
८. कार इति सूत्रम् ज.
९. नैतत्सूत्रं दृश्यते ज.
१०. वर्गाप क.
११. त्तस्य क.
१२. क्त त्वादव्य घ.
१३. त्वाद् नास्ति. ख. ज. 'तद् वचना' नास्ति क. घ.
१४. अपि नास्ति क. घ.

प्रवाहंण६ (पद० ५।३१ सं० ५।३१)

स्थितोपस्थिते तु—

नृ मना॒ऽ इति॑ नृ । मना६ (पद० १२।१७)

पु॑रीषवाहंन॒ऽ इति॑ पुरीष । व्वाहंन६ (पद० ११।४१)

प्रवाहंन॒ऽ इति॑ प्र । व्वाहंन६ (पद० ५।३१)

एतैः किम्—

रश्मिनां (पद० १५।६ सं० १५।६)

रसे॑न[1] (पद० १।२१ सं० १।२१)

रु॑चान६ (पद० १२।१ सं० १२।१)

रथे॑न (पद० १७।३३ सं० १७।३६)

[प्रनिमित्तकणत्वविधानम्]

[३०७] प्र नेति–नुदति–हिनोमीनाम् ।३।८९।।

प्रेत्ये[2]तस्मान् नी[3]-नुद्धात्वोः हिनोमिशब्दस्य च नकारो णकारमापद्यते ।

प्र णय देवाव्यम्[4] (पद० ११।६ सं० ११।८)

प्र णु॑दानः (पद० १५।१ सं० १५।१)

प्र हि॑णोमि (पद० ३५।१५ सं० ३५।१९)

[नस्यप्रकृतिभावप्रकरणम्]

[नत्वीयप्रकृतिभावाधिकारसूत्रम्]

[पदान्तीयस्य णत्वापवादः]

[३०८] प्रकृत्या पदान्तीयः ।३।९०।।

पदान्तीयो नकारः प्रकृत्या भवति ।

पूषन् (पद० ३४।१० सं० ३४।४१)

अक्रन्[5] (पद० ३।४६ सं० ३।४७)

अर्व्वन्[6] (पद० ११।४१ सं० ११।४४)

पितृन् (पद० २।३२ सं० २।३४)

---

१. सैरेन ख. रथ्येन क. घ.

२. त्येत स्थाने त्य ख. ज.

३. न्नो घ.

४. देवाव्यं नास्ति ख. ज.

५. नास्ति घ.

६. घ एव

[चतुर्षुणत्वापवादः]

[३०६] नी[1]-वनि-नसः-प्रपीनम् ।३।८९१।।

ऋ-ष-रेभ्यो नी[2]-वनि-नस इत्येषां प्रपीनमित्ययं च[3] नकारः प्रकृत्या ।
धूम्रा[4] बभ्रुनी'काशाः (पद० २४।१८ सं० २४।१८)
रायस्पोषवनि[5] (पद० ५।२७ सं० ५।२७)
ब्रह्मवनिं त्वा क्षत्रवनिं[6] (पद० १।१७ सं० १।१७)
वार्ध्री[7]नसस्ते[8] (पद० २४।३९ सं० २४।३९)
प्रपी'नमग्ने[9] (पद० १७।८० सं० १७।८७)

[माध्यन्दिनीयशाखायां णत्वापवादनिर्देशः]

[३१०] श्रीमना इत्येके ।३।८९२।।

एकशब्दो मुख्यवाचो । अयं च[10] निपात्यते ।
श्रीमंनाः शृतपंयाः (पद० १७।५२ सं० १७।५६)

[अष्टसु पदेषु णत्वापवादः]

[३११] इन्द्राग्नी[11] चित्रभानो वार्त्रघ्नं दुष्वप्न्यं ध्रुवयोनिः पुरोनुवाक्याभिः पुरोनु[12]वावाक्याश्चर्मम्नम् ।३।८९३।।

एतान्यष्टौ निपात्यन्ते[13] ।
इन्द्राग्न्योरुज्जितिम् (पद० २।१५ सं० २।१५)
इन्द्राया'हि चित्रभानो सुता (पद० २०।७८ सं० २०।८७)
इन्द्रंस्य वार्त्रघ्नमसि (पद० १०।८। सं० १०।८)

---

१. नि क. घ. ज.
२. नि क. घ. ज.
३. च नास्ति क. घ.
४. धूम्रा नास्ति ख. ज.
५. नास्ति घ. क.
६. एतदुदाहरणं नास्ति ख. ज.
७. र्ध्री क. ध्री ज.
८. ते नास्ति ख. ज.
९. प्रपीन मोनश्च घ.
१०. अयं च स्थाने अन्यत्र घ.
११. इन्द्राग्नी इत्येव सूत्रम् ज.
१२. पुरोऽनुवा. घ.
१३. उदाहरणानि न सन्ति ख. ज.

दु: ष्वप्न्यं ६. सुव (पद० ३५।१० सं० ३५।११)
ध्रु॒ वक्षितिध्रु॒ वयो॑निः (पद० १४।१ सं० १४।१)
ऋचं: पुरोनुवा॒क्क्या॒भिः (पद० २०।११ सं० २०।१२)
पुरोनुवा॒क्या॒या॒ज्या॒भिः (पद० २०।११ सं० २०।१२)
सा॒दध्येभ्य॑श्चर्म्म॒म्म्नम् (पद० ३०।१३ सं० ३०।१५)

[तवर्गोदये णत्वापवादः]

[३१२] तवर्गे च ।३।८४।।

ऋ-ष-रेभ्यः[1] परो [2]नकारः प्रकृत्या [3]तवर्गे [4]परे ।
तुम्पन्तु॒ होत्रा॒:[5] (पद० ७।१४ सं० ७।१५)
अंव क्रन्दे॒न ता॒लु[6] (पद० २५।१ सं० २५।१)
क्रन्द॑ते॒ (पद० २२।७ सं० २२।७)

[ऋकारोदये णत्वापवादः]

[३१३] षादनन्तर ऋकारे ।३।८५।।

षात् परो[7] नका[8]रः प्रकृत्या ऋकारे परे ।
उ॒ग्र[9]स्त्वे॒ष नृ॑[10]म्म्णः (पद० ३३।७१ सं० ३३।८०)

[त्रयोदशसु णत्वनिपातनम्]

[३१४] निषण्णाय–रथवाहण[11]–मिन्द्रऽ एणं–परिणीयते–समिन्द्र णऽ–उरुष्या णो-रक्षाणः-षु णः[12]-षूणः[13]-षुणासत्या–स्वर्णा-[14]वस्थूरि णौ-प्र णऽ आयूꣳषि ।३।८७।।

---

१. स्यो क. घ.
२. व क.
३. ग क.
४. र्गप ज.
५. होत्राः नास्ति. ख. ज. ग.
६. नैतदुदाहरणम् ख. ज.
७. पुरो ख.
८. नकरः ज.
९. उग्रः नास्ति ख. ज. ग.
१०. न्नृम्णः ज.
११. णमिति एतावत्सूत्रम् ज.
१२. षुणः नास्ति क.
१३. षूणः नास्ति घ.
१४. व नास्ति क.

एतानि त्रयोदश निपात्यन्ते ।

निषण्णाय स्वाहा[1] (पद० २२।८ सं० २२।८)

रथवाहंणम् (पद० २९।४५ सं० २९।४५)

इन्द्रं एणम् (पद० २९।१३ सं० २९।१३)

परिंणीयते कविः[2] (पद० ३३।६६ सं० ३३।७५)

समिन्द्र णो मनसा[3] (पद० ८।१३ सं० ८।१५)

उरु ष्या णो[4] अघायुतः? (पद० ३।२६ सं० ३।२६)

रक्षा णो ब्रह्मणस्पते (पद० ३।३० सं० ३।३०)

मो षू णः (पद० ३।४५ सं० ३।४६)

अभी षु णः (पद० २७।४० सं० २७।४१)

गोमदू षु णासत्या (पद० २०।७२ सं० २०।८१)

स्वर्णं घर्म्मः? (पद० १८।४६ सं० १८।५०)

अस्त्थू रि णौ (पद० २।२७ सं० २।२७)

प्र ण आयूंषि (पद० २३।३० सं० २३।३२)

[5]स्थितोपस्थिते तु[6]—

निसन्नायेति नि । सन्नाय । (पद० २२।८)

रथवाहनमिति रथ । वाहनम् (पद० २९।४५)

॥ इति णत्वप्रकरणम् ॥

॥ इति नतिमहाप्रकरणम् ॥

❀ अथ दीर्घप्रकरणम् ❀

[दीर्घाधिकारसूत्रम्]

[३१५] दीर्घम् ।३।९७॥

अधिकारोऽयम् ।

---

१. स्वाहा नास्ति ख. ग. ज. । इत उत्तरं नोदाहरणानि ख. ज. अपि तु 'एवं सर्वत्र ज्ञेयम्' इत्युपलभ्यते ख. ज.

२. कविः नास्ति घ.

३. मनसा नास्ति घ.

४. अघायत इत्येव घ.

५. इत आरभ्य पाठो वर्तते ख. ग. ज.

६. तु नास्ति क. ग.

[पञ्चविंशतिदीर्घविधानसूत्रम्]

[३१६] अश्व-रश्मि-मति-सुमति[1]-श्व-सुत-चारय-घृणि-सेदिमे-न्द्रिय-धारय-चित्र-भङ्गुर-वयुना-श्वस्य-हृदय-घुष्य-ता-भ्य-वता-ध्यर्च-शक्ति-पुरु-शचि[2] वकारे ।३।९६।।

एते पञ्चविंशतिर्ह्रस्वा[3] दीर्घमापद्यन्ते[4] वकारे परे ।

अश्वावती'म्[5] (पद० १२।७२ सं० १२।८१)

रश्मीवती'म् (पद० १५।५२ सं० १५।६३)

मतीविदे' सु'मतीवृधः (पद० २२।११ सं० २२।१२)

श्वाविद् भौमी[6] (पद० २४।३३ सं० २४।३३)

सु तावंत६ (पद० २०।७९ सं० २०।८८)

चा'रया व्वृषन् (पद० २३।१९ सं० २३।२१)

घृणीवान् (पद० २४।३९ सं० २४।३९)

सेदिमा व्वयम् (पद० २५।१३ सं० २५।१५)

इन्द्रियावान् (पद० ६।२५ सं० ६।२७)

धारया व्वसू'नि (पद० ६।७ सं० ६।८)

चित्रावसो (पद० ३।१८ सं० ३।१८)

भङ्गु रावंताम् (पद० ११।२३ सं० ११।२६)

व्वयुनाविदेकं[7] ÷ (पद० ५।१४ सं० ५।१४)

अश्वस्या व्विशस्ता (पद० २५।४० सं० २५।४२)

हृदयाविधंश्चित्[8] (पद० ८।१७ सं० ८।२३)

परु'ष्परुरनु [9] घुष्या व्विशंस्ता[10] (पद० २५।३९ सं० २५।४१)

---

१. मतीति सूत्र समाप्तिः ज.

२. ची ख.

३. तिह्रस्वा क. घ. ज.

४. ते ख.

५. इत उत्तरम् 'इत्यादि सूत्रोदाहरणम्' इति ज. नोदाहरणानि सन्ति.

६. भौमी नास्ति ख.

७. एकः नास्ति ख.

८. चित् नास्ति ख.

९. परु''''रनु नास्ति ख.
परुष्परुः नास्ति क.

१०. विशस्ता नास्ति घ.

ऋतावानम्महिषम्[१] (पद० १२।१०२ सं० १२।१११)

अभीवर्तं (पद० १४।१९ सं० १४।२३)

प्र[२]वताव्वचं ÷ (पद० १२।७९ सं० १२।८८)

अधीवासंय्या[३] (पद० २५।३७ सं० २५।३९)

अर्चा विश्वानरराय (पद० ३३।२० सं० ३३।२३)

शक्तीवन्तो गभीरा?[४] (पद० २९।४६ सं० २९।४६)

इमाऽ उं त्वा[५] पुरूवसो (पद० ३३।७२ सं० ३३।८१)

[६]स्थितोपस्थिते तु—

अश्ववतीमित्त्यश्श्व । व्वतीम् (पद० १२।७२)

रश्मिवतीमिति रश्मिम् । व्वतीम्[७] (पद० १५।५२)

[८]मतिविदऽ इति मति । व्विदे (पद० २२।११)

सुमतिवृधऽ इति सुमति । व्वृधं ÷ (पद० २२।११)

स्वविदिति स्व । व्वित् (पद० २४।३३)

सुतवंतऽ इति सुत[९] । व्वत[१०] (पद० २०।७९)

घृणिवानिति घृणि । व्वान् (पद० २४।३९)

इन्द्रियवानितीन्द्रिय । व्वान् (पद० ६।२५)

चित्रवसोऽ इति चित्र । व्वसो (पद० ३।१८)

भङ्गुरवतामिति भङ्गुर । व्वताम् (पद० ११।२३)

व्वयुनविदिति व्वयुन । व्वित् (पद० ५।१४)

हृदय[११]विधऽ इति हृदय । व्विधं (पद० ८।१७)

---

१. महिषम् नास्ति ख. ग. क.

२. प्र नास्ति ख.

३. या नास्ति ख.

४. गभीराः न ख, न्तः इति ख.

५. इमा उ त्वा नास्ति ख.

६. इतोऽस्ति पाठः ज.

७. इत उत्तरम् 'इत्यादि' इत्येव, न स्थितोपस्थितनिर्देशः ज. म् नास्ति क. घ.

८. 'मति''''व्वित्' पर्यन्तं पाठस्त्रुटितः घ.

९. सुता घ.

१०. वसः क.

११. हृया घ.

ऋतवा॑नमित्यृ॒त । व्वा॑नम् (पद० १२।१०२)

अ॒भिव॒र्त्तऽ इत्य॑भि । व्व॒र्तं? (पद० १४।१९)

अ॒धिव॒ासमित्य॑धि । व्व॒ासम्[1] (पद० २५।३७)

शक्ति॑वन्त॒ऽ [2]इति॒ शक्वि॑तं । व्वन्त६ (पद० २९।४६)

पु॒रु॒व॒सो॒ऽ इति॑ पुरु । व्वसो (पद० ३३।७२)

[3]शचीवसो (अन्यशारवीयम्) ।

[अश्वशब्ददीर्घापवादः]

[३१७] नाश्व[4]वद्धिरण्या[5]त् ।३।९९।।

हिरण्यवच्छब्दात् परम् अश्व इति शब्दरूपं वत् इत्ये[6]तस्मिन् परे न दीर्घमापद्यते।
हिर॑ण्य व॒द॒श्श्व॑वत् (पद० ८।५७ सं० ८।६३)

[अभिशब्ददीर्घापवादः]

[३१८] अभि विख्ये[7]षं-वीर-विश्व[8]-वत्स-वृत्र-वाजयन्तेषु ।३।१००।।

'अभि' इत्ययं ह्र[9]स्वो विख्येष[10]मित्यादि[11] षट्सु न दीर्घमापद्यते।

अभिविख्ये॑ष[12]म् (पद० १।११ सं० १।११)

अ॒भि वी॑रोऽ अ॒भि स॑ त्वा[13] (पद० १७।३४ सं० १७।३७)

अ॒भि विश्वे॑ गृ॒णन्त[14] ÷ (पद० २।१८ सं० २।१८)

---

१. वासः क. घ.
२. न्तमिति क.
३. इतोऽस्ति पाठः ज. शाची घ.
४. श्व घ.
५. ण्यवत् ज.
६. र्ता घ.
७. विष्येषं क. घ. ज.
८. विश्व घ.
९. हस्वो घ.
१०. विष्येष
११. वत्सु ज.
१२. विष्येषम् घ.
१३. अभिसत्वा नास्ति ख. ज.
१४. गृणन्तः नास्ति ख. ज.

अभि वृत्सन्न[1] (पद० २६।१० सं० २६।११)

अभिवृत्रम् (पद० १८।६२ सं० १८।६९)

अभि वाजयन्त६ (पद० १८।६७ सं० १८।७४)

[अनुक्तसङ्ग्रहार्थं दीर्घापवादनिर्देशः]

[३१९] अश्वस्य वाजिन इति च ।३।१०१।।

अश्वस्येति ह्रस्वो[2] वाजिन[3] इत्येतस्मिन् परे न दीर्घमापद्यते ।

अश्श्वस्य व्वाजिनं ÷ (पद० २३।३७ सं० २३।३७) ।

'इति च' इत्येवंविधा[4]न्योदाहरण[5]सूचनार्थम् । तेन—

अधिवक्ता (पद० १६।५ सं० १६।५) । इति न दीर्घः ।

[विश्वशब्ददीर्घविधानम्]

[३२०] विश्व सह-भुव-पुष-वसुषु ।३।१०२।।

नेति नानुवर्तते । [6]विश्वेत्ययं ह्रस्वः सहादिषु चतुर्षु दीर्घमापद्यते ।

व्विश्श्वासाहमवसे[7] (पद० ७।३४ सं० ७।३६) ।

व्विश्वानराय[8] व्विश्श्वाभुवे (पद० ३३।२० सं० ३३।२३) ।

उत[9] व्विश्श्वापुषम् (पद० २५।४३ सं० २५।४५)

गन्धर्वस्त्वा[10] व्विश्श्वावसुः (पद० २।३ सं० २।३)

स्थितोपस्थिते तु[11]—

व्विद्वस ँहमिति विश्श्व । सहम्[12] (पद० ७।३४)

---

१. न नास्ति ख. ज.

२. ह्रस्वः ख. ज.

३. इत उत्तरं 'इत्ये....इति च' पर्यन्तं पाठो नास्ति घ.

४. विघोदा क. घ.

५. रणम् सू. घ.

६. श्व ख.

७. मवसे न ख. अवसे न ज.

८. विश्वानराय नास्ति ख. ज.

९. उत नास्ति ख. ज.

१०. गन्धर्वस्त्वा नास्ति ख. ज.

११. तु नास्ति ज.

१२. विश्वा घ.

१३. सह इत्येव क.

व्वि॒श्श्व॒भु॑व॒ऽ इति॑ वि॒श्श्व॒ । भु॒वे॑ (पद० ३३।२०)
व्वि॒श्श्व॒ पुष्[1]मिति॑ वि॒श्श्व॒ । पुष॑म् (पद० २५।४३)
व्वि॒श्श्ववं॑सु॒ रिति॑ वि॒श्श्व[2] । व्वं॑सु॒ᳪ (पद० २।३)

[स्वरनिमित्तकदीर्घविधानम्]

[३२१] तिष्ठाद्युदात्तम् ।३।१०४।।

आद्युदात्तं तिष्ठेति पदं दीर्घमापद्यते ।
तिष्ठा रथ॒मधि यम्[3] (पद० १०।२० सं० १०।२२)
तिष्ठा॑ दे॒वो नं सवि॒ता[4] (पद० ११।३९ सं० ११।४२)

आद्युदात्तं किम्—

आ[5] ति॑ष्ठ व्वृत्रहन् (पद० ८।२८ सं० ८।३३)

[प्रशब्ददीर्घविधानम्]

[३२२] प्र वण[6]—शृङ्ग—यासे[7]षु ।३।१०५।।

'प्र' इत्ययं ह्रस्वो वणादिषु त्रिषु दीर्घ[8]मापद्यते ।
प्रा॒व॒णे[9]भिं÷स॒जोषं॑स[10]ᳪ (पद० १२।४३ सं० १२।५०)
प्रा॑शृ॒[11]ङ्गा मा॑हेन्द्रा[12]ᳪ (पद० २४।१७ सं० २४।१७)
[13]प्रा॒या॒साय॑ (पद० ३९।११ सं० ३९।११)

---

१. श्वयुष क.
२. विश्वा ज.
३. अधियम् नास्ति ख. ग. ज.
४. नैतदुदाहरणम् ख. ग. ज.
५. आ नास्ति ख. ग. ज.
६. वणः शङ्ग घ.
७. याशेषु क.
८. दीर्घ घ.
९. णोभिः घ.
१०. सजोषसः नास्ति ख. ग. ज.
११. शङ्गा घ.
१२. माहेन्द्राः नास्ति ख. ग. ज.
१३. अत्र 'आयासाय' इत्यधिकमुदाहरणम् क. घ.

स्थितोपस्थिते—

प्रवणेभिरिति प्र[1] । व्वणेभिः (पद० १२।४३)

प्रशृ[2]ङ्गाऽ इति प्र । शृङ्गा? (पद० २४।१७)

प्रयासायेति प्र[3] । यासाय (पद० ३९।११)

[नकारोदयदीर्घविधानम्]

[३२३] धा[4]रयाम–योजाव[5]–सचस्वः–नुद–मोषु–जयतोरुष्य–रक्ष–यज–यच्छ–मत्सथ–पिपृत गायतातु येन नकारे ।३।१०८।।

धारयाम इत्यादयः षोडश ह्रस्वाः नकारे दीर्घमापद्यन्ते[6] ।

धारयामा नमोभिः (पद० १७।८३ सं० १७।९०)

योजान्विन्द्र[7] (पद० ३।५१ सं० ३।५२)

अर्वानो [8]देव्या धिया[9] (पद० ११।३८ सं० ११।४१)

सचस्वा नः स्वस्तये[10] (पद० ३।२४ सं० ३।२४)

प्रणुदानः सुपत्नान्[11] (पद० १५।१ सं० १५।१)

मोषूणः (पद० ३।४५ सं० ३।४६)

मो षु[12] किम्—

ऊर्ध्व ऊषुणः (पद० ११।३९ सं० ११।४२)

जयता नरः (पद० १७।४६ सं० १७।४६)

उरुष्या णः (पद० ३।२६ सं० ३।२६)

रक्षा णः (पद० ३।३० सं० ३।३०)

---

१. प्रा घ; प्रवणे। भिः क.
२. शङ्गा घ.
३. प्रा घ.
४. धा घ.
५. 'धा''''जावेति' एव सूत्रम् ज.
६. ते घ.
७. न्द ज.
८. दे ज.
९. धिया नास्ति ख.
१०. स्वस्तये नास्ति ख, ग. ज.
११. सपत्नान् नास्ति क. ग. घ. ज.
१२. पू क., षु नास्ति ज. ग.

यजा नो[1] मित्रावरु'णा[2] (पद० ३३।३ सं० ३३।३)

यच्छा न॒ꣳ शर्म्म'[3] (पद० ३५।१७ सं० ३५।१; ३६।१३)

मत्स॑था न्नो॒[4] व्विश्व॑[5] (पद० ३३।३० सं० ३३।३४)

पिपृ॒ता निर॑व॒द्यात्[6] (पद० ३३।३८ सं० ३३।४२)

गायता नरꣳ (पद० ३३।५६ सं० ३३।६२)

आ तू[7] न॑÷ (पद० ३३।६४ सं० ३३।६५)

आ तु[8] किम्—

तु॒ चेतु न॒ो भव॑न्तु[9] (पद० ३३।८४ सं० ३३।९४)

ये॒ना नꣳ पूर्व्वे॑ (पद० ३४।१७ सं० ३४।१७)

[नकारोदयभवदीर्घविधानम्]

[३२४] भव च ।३।१०९।।

अयं ह्रस्वो दीर्घमापद्यते नकारे परे ।

भवा'न ꣳ (पद १२।१०५ सं० १२।११४)

[भवदीर्घविधानम्]

[३२५] सचा-वरुथ्य-वाजस्य-पायुषु च ।३।११०।।

भव इत्ययं[10] ह्रस्वः[11] सचादिषु चतुर्षु दीर्घं[12]मापद्यते ।

भ॑वा॒ सचा॑[13] (पद ३४।५५ सं० ३४।५६)

---

१. नः ज.

२. मित्रावरुणा नास्ति ख. ग. ज.

३. शर्म नास्ति ख. ग. ज.

४. नः ज.

५. विश्व नास्ति ख. ग. ज.

६. निरवद्यात् नास्ति ख. ग. ज.

७. तु. ज.

८. तू. क.

९. तु चे ज नः ज. भवन्तु नास्ति ख. ग.

१०. अयं न ग. ज.

११. स्वो ख. घ.

१२. धर्मा घ.

१३. सच क,

भंवा व्वरुथ्यः (पद ३।२५ सं० ३।११)
भवा वाजंस्य (पद १२।१०३ सं० १२।११२)
भवां पायुः (पद १३।१० सं० १३।११)

[अवदीर्घापवादः]

[३२६] नाऽवनयामि ।३।१०७।।

अव इत्ययं ह्रस्वो नयामि शब्दे परे न दीर्घं[1]मापद्यते ।
[2]अवंनयामि (पद ५।२५ सं० ५।२५) ।

[३२७] अपृक्तः सौ ।३।१११।।

उकारः सौ दीर्घमापद्यते ।
महीमू [3]षु (पद २१।४ सं० २१।५)

[रथिदीर्घविधानम्]

[३२८] रथि तकारनकारयोः ।३।११२।।

'रथि'[4]इत्ययं ह्रस्वस्त[5]कार-नकारयो[6]र्दीर्घमापद्यते ।
रथीतंम[7]ᳬ रथीनां वाजाना'म्[8] (पद १२।४८ सं० १२।५६)

स्थितोपस्थिते—
रथितंममिति' रथि । तंमम् ।
रथिनामिति रथिना'म्[9] (पद)

---

१. र्घमा घ.
२. 'अव''''द्यते' पर्यन्तं पाठो नास्ति घ.
३. मू षु. घ.
४. रथीता घ.
५. स्वका घ.
६. योः दी. ज. योदी घ.
७. तमम् घ. ज. क.
८. वाजानां नास्ति ख. ग. ज
९. रथि । नाम् क. नाम घ.

[यकारोदयदीर्घविधानम्]

[३२९] अथो-दारिथ शो[1]च पनय सादय-जु वृष शत्रु सलक्ष्मा[2]-घा-घा-रात्यृ[3]-त भवत यकारे ।।३।११३।

अथादयश्चतुर्दश ह्रस्वा यकारे दीर्घ[4]मापद्यन्ते[5] ।

मंद्ध्युमण्ँ अथाय (पद० १२।१२ सं० १२।१२)

उदारिथा यजे' (पद० १७।६९ सं० १७।७५)

बृ[6]हच्छो'चा यविष्ठ्य[7] (पद० ३।३ सं० ३।३)

पंन[8]या य जंम् (पद० १९।६२ सं० १९।६४)

सादया' य ज्ञ[9]म् (पद० ११।३२ सं० ११।३५)

ऋजूयताम् (पद० २५।१३ सं० २५।१५)

[10]वृषायमाणँ (पद० २०।३९ सं० २०।४६)

शत्रूयतो [11]हन्ता (पद० १२।५ सं० १२।५)

स लक्ष्मा यत्[12] (पद० ६।१८ सं० ६।२०)

आ घा ये (पद० ७।३० सं० ७।३२)

अ[13]घायत? (पद० ३।२६ सं० ३।२६)

अ[14]रातीयतँ (पद० १२।५ सं० १२।५)

ऋतायते (पद० १३।२५ सं० १३।२७)

भंवता यजत्राँ (पद० ३३।४७ सं० ३३।५१)

---

१. शौच घ 'शोचेति' सूत्रसमाप्तिः ज.
२. लक्ष्म क. घ.
३. रातृत क.
४. दीघमा घ
५. घते घ.
६. बृहत् नास्ति ख. ज.
७. विष्ठय घ.
८. पन्नया घ.
९. यजम् ज.
१०. नैतदुदाहरणम् ज.
११. यतः ज, हन्ता नास्ति ख. ज.
१२. यत् नास्ति ज.
१३. आघा घ.
१४. अरायती घ.

स्थितोपस्थिते तु—

श्र॒थ॒येति॑ श्श्रथय[1] (पद० १२।१२)

ऋ॒जु॒[2]य॒तामित्यृ॑ज॒ । य॒ताम् (पद० २५।१२)

वृष॒[3]यमा॑ण॒ऽ इति॑ वृष॒ । यमाणः (पद० २०।३९)

श॒त्रु[4]य॒तऽ इति॑ श॒त्रु । य॒त? (पद० १२।५)

अ॒घ॒य॒तऽ इत्यघ । य॒त? (पद० ३।२६)

अरा॑तिय॒तऽ इत्यरा॑ति । य॒तः (पद० १२।५)

ऋ॒त॒य॒तऽ इत्यृ॑त । य॒ते (पद० १३।२५)

[वदीर्घविधानम्]

[३३०] व[5] वृध-वृजोः ॥३।११४॥

व इत्ययं वृध-वृजो[6]र्दीर्घमापद्यते ।

वा॒ वृ॒धे॒ (पद० ७।३७ सं० ७।३९)

प्र[7] वावृजे (पद० ३३।४० सं० ३३।४४)

स्थितोपस्थिते तु[8]—

व॒वृ॒ध॒ऽ इति॑ ववृधे (पद० ७।३७)

व॒वृ॒जऽ इति॑ ववृजे (पद० ३३।४०)

[अद्यशब्द दीर्घविधानम्]

[३३१] अद्य तॅं-हकार[9]-चकार-भवत-वृणीमहे-देवेषु ॥३।११५॥

'अद्य' इत्ययं त[10]मित्यादि षट्सु दीर्घमापद्यते ।

---

१. श्रथयः घ.

२. ऋजूय ज

३. वृषाय क.

४. शत्रूय घ.

५. वावृध ज.

६. जो दी ज. जोदीघ क. घ.

७. प्र नास्ति ख. ग. ज.

८. तु नास्ति ख. क. घ.

९. 'कारेति' सूत्रसमाप्तिः ज.

१०. यन्तमि ज.

अद्या[१] तमस्य (पद० ३३।८७ सं० ३३।९७)

तमिति किम्—

अद्य तेऽ अपरम् (पद० ३३।८४ सं० ३३।९४)

अद्या[२] हुवेम (पद० ८।३९ सं० ८।४५)

हवमद्या[२] च (पद० २१।१ सं० २१।१)

अद्या[२] भवत (पद० ३३।४७ सं० ३३।५१)

अद्या[३] वृणीमहे (पद० ३३।१४ सं० ३३।१७)

अद्या[४] देवाः (पद० ३३।३८ सं० ३३।४२)

[अद्यदीर्घापवादः]

[३३२] न होतरि ॥३।११६॥

अद्य[५] इत्ययं होतरि न[६] दीर्घमापद्यते ।

अद्य होतारम् (पद० २१।५५ सं० २१।५९)

[मकारोदय दीर्घविधानम्]

[३३३] शृणुत त्विषि[७] ध्रजि[८] भवत[९] पिबे-त[१०] स्म तिष्ठ रक्ष[११] मकारे ॥३।११७॥

शृणु[१२]तादि नव ह्रस्वा मकारे दीर्घमापद्यन्ते[१३] ।

शृणुता मऽ[१४] इमम्[२] (पद० ७।३२ सं० ७।३४)

---

१. अद्यो त घ.

२. अघा घ.

३. अवृणी ज. अघा घ.

४. अघा क.

५. अघ क.

६. न होतरि दीर्घ-पाठः घ. क.

७. त्विषीति सूत्रसमाप्तिः ज. त्विषिप घ.

८. ध्रजिप घ.

९. भवतप घ.

१० पिबेत घ.

११. रक्षा क. घ.

१२. शृणुना घ.

१३. घेते ख. घ.

१४. मे नास्ति क. घ. मे ज.

१५. इमम् नास्ति ख. ग. ज.

शृष्पिञ्जरायु[1] त्विषी[2]मते (पद० १६।१७ सं० १६।१७)

व्वातंऽ इव[3] ध्रजी मान् (पद० २९।२२ सं० २९।२२)

इदं शाखा[4]न्तरविषयम्। माध्यन्दिनानां[5] तु दीर्घान्तादेव मतु[6]प्। अत ए[7]वात्र 'अन्तः पद[8]दीर्घीभा[9]व' (ज्यो० ५११ प्रा० ४।१९१) इति स्थितोपस्थितं न।

भवंता मृडयन्तं[10] ÷ (पद० ८।३ सं० ८।४)

पिबा[11] मित्रस्य (पद० ३३।७ सं० ३३।१०)

इता मरुत्तः (पद० ३३।४३ सं० ३३।४७)

हि ष्मना म[12]नवे (पद० ३३।८४ सं० ३३।९४)

तिष्ठा महाँऽसि (पद० ३३।९ सं० ३३।१२)

रक्षा माकिं ÷ (पद० २९।४७ सं० २९।४७)

स्थितोपस्थिते तु—[13]

त्विषिमतऽ इति[14] त्विषिं। मते (पद० १६।१७)

[वत्युदयदीर्घविधानम्]

[३३४] विश्वदेव्य-सोमौ वत्याम् ।।३।११८।।

एतौ ह्रस्वौ वतीशब्दे दीर्घ[15]मापद्येते[16]।

---

१. शष्पिञ्जराय नास्ति ख. ग. ज.
२. त्विषि घ.
३. वात इव नास्ति ख. ग. ज. ध्रजी घ.
४. शाखान्त घ.
५. 'माध्यन्दिनानां' स्थाने 'वाजसनेयिनां' क. घ.
६. मतम् ग. ज.
७. मतरात्र घ.
८. पर ज.
९. दीर्घभा. घ. ज.
१०. उरुनः घ.
११. पिवा घ.
१२ ष्म नवे ज.
१३. तु नास्ति. ख.
१४. त्विषिमत इति नास्ति घ.
१५. दीर्घं ज
१६. मापद्यते घ.

विश्वदे'व्या'वती (पद० ११।५८ सं० ११।६१)

सो'मावती'[2]म् (पद० १२।७२ सं० १२।८१)

स्थितोपस्थिते तु[3]—

विश्वदे'व्य[4]वतीति विश्ववदे'[5]व्य । व्वती (पद० ११।५८)

सोमवतीमिति सोम । व्वतीम् (पद. १२।७२)

वत्यामिति[6] किम्—

सोमंवताम् (पद. २४।१८ सं. २४।१८)

[उषशब्दस्य दीर्घविधानम्]

[३३५] उष[7] महोभि-नंक्के-मी-कारै[8]-कारौ-कार-नकोरभ्यः ।।३।११९।।

महोभिरित्यादित्रि[9]भ्य ईकारादिचतुर्भ्यश्च परः 'उष' इत्ययं ह्रस्वो दीर्घमापद्यते । प्रकरणानुसारादन्त्यस्य, व्याख्या[10] नात् ।

महो'भिः । उषासानक्ता (पद २०।३४ सं० २०।४०-४१)

नक्कोषासा (पद १२।२ सं० १२।२)

आयतीमु षा[11]संम् (पद १५।२१ सं० १५।२४)

द्वेवीऽ उषासौ' (पद २८।१४।सं० २८।१४)

उपा'[12]केऽ उषासानक्ता' (पद २९।३१ सं० २९।३१)

योना'ऽ उषासानक्ता' (पद २७।१६ सं० २७।१७)

गोमंतीर्न्नऽ[13] उषासं[14] (पद ३४।४० सं० ३४।४०)

---

१ व घ.

२. म् नास्ति ज.

३. तु नास्ति ख. क. घ.

४. व घ.

५. श्वर्देव्य घ.

६. इति न ख. ज. ग

७. उप घ.

८. कारै नास्ति क.

९. तृभ्य ख.

१०. माख्या क. भारत्यनात् घ.

११. मुखा ज.

१२. उषा के घ.

१३. तीर्त ज.

१४. नैतदुदाहरणम् घ. क.

अव्यवहितस्यासम्भवाद्[1] व्यवधानेऽपि । स्थितोपस्थिते—

उषसानक्तेत्युषसा । नक्ता (पद २०।३४, २९।३१, २७।१६)

नक्तोषसेति नक्त[2] । उषसा (पद १२।२)

[3]उषसमित्युषसम्[4] (पद १५।२१)

उषसावित्यु षसौ (पद० २८।१४)

उषसऽ इत्यु षसः (पद ३४।४०)

एतेभ्यः किम्—

अग्रंऽ उषसाम् (पद)

[पुरुषशब्दीर्घविधानम्]

[३३६] [5]पूरुषोऽवसाने ।।३।१२०।।

'पुरुष' इत्ययमादिदीर्घो निपात्यते[6], अवसाने चेत् ।

सनवंथ[7] पूरुषम् (पद १२।७० सं० १२।७९)

ज्यायांश्च पूरुषः[8] (पद ३१।३ सं० ३१।३)

स्थितोपस्थिते तु[9]—

पुरुषमिति पुरु[10]षम् (पद १२।७०)

पुरुषऽ इति पुरुषः[11] (पद० ३१।३)

अवसाने किम्—

उदै[12]त्पुरुषः (पद० ३१।४ सं० ३१।४)

पुरुषऽ एव[13] (पद० ३१।२ सं० ३१।४)

---

१. द् नास्ति ज.

२. नक्तो उषसा घ. नक्तोषसा क. ज. ग.

३. षा घ.

४. त्य घ.

५. पु घ. ज.

६. नित्यायते घ.

७. वप घ.

८. ख एवैतत्.

९. तु नास्ति ख. ज.

१०. रषम् ज.

११. ख एवैतत्.

१२. उदे घ.

१३. ख एवैतदुदाहरणम्.

[अत्रशब्दस्य दीर्घविधानम्]

[३३७] पूष्णो-जहीम-स्तेष्वत्र ॥३।१२१॥

'अत्र' इत्ययं ह्रस्वः पूष्ण इत्यादिषु त्रिषु[1] दीर्घमापद्यते ।

अत्रा' पूष्णः[2] (पद० २५।२५ सं० २५।२७)

अत्रा जहीमः (पद ३५।९ सं० ३५।१०)

अत्रा' ते भद्रा? (पद० २९।१६ सं० २९।१६)

[यत्रशब्द दीर्घविधानम्]

[३३८] नरः[3]-सप्त ऋषीन्-नस्[4]-[5]त आहु-र्नियुद्भिष्षु[6] यत्र ॥३।१२२॥

'यत्र' इत्ययं ह्रस्वो नर इत्यादिषु पञ्चसु दीर्घमाप[7]द्यते ।

यत्रा नरः (पद० २९।४८ सं० २९।४८)

यत्रा' सप्तऽ ऋषीन्[8] (पद० १७।२३ सं० १७।२६)

यत्रा नश्चक्रा[9] (पद० २५।२० सं० २५।२२)

यत्रा' तऽ आहुः (पद० २९।१५ सं० २९।१५)

त आहुः किम्—

यत्र ते य[10]यु? (पद० २३।१४ सं० २३।१६)

यत्रा' नियुद्भिः (पद० १३।१३ सं० १३।१५)

[सहतेर्दीर्घविधानम्]

[३३९] अभिमाति-पृतनासु[11]-सपत्न-धू-र्विश्व-समत्सु-पृतना-व्रातेभ्यः सहेः ॥३।१२३॥

---

१. त्रिषु क एव.

२. पूष्याः घ.

३. रस ज.

४. निति० इत्येतावत्सूत्रसंकेतः ज.

५. त नास्ति घ.

६. ष्पु घ.

७. भापद्यते घ. मापते ज.

८. नैतदुदाहरणम् ग. ज.

९. चक्र क. घ.

१०. जयुः ख.

११. नास्विति सूत्रसंकेतः ज.

'अभिमाति' इत्यादिभ्य[1] अष्टभ्यः सहधातोर्ह्रस्वो दीर्घमापद्यते। अन्त्यस्यासम्भवादनन्त्यस्य। तत्र द्वयोः प्राप्तौ 'सन्निकृष्ट-विप्रकृष्ट' (   ) इत्या[2]देः।

अभिमातिषाहं÷ (पद० १२।१०४ सं० १२।११३)

पृतंनासु सासहिम् (पद० ११।७१ सं० ११।७६)

सपत्नसाही (पद० ५।१० सं० ५।१०)

[3]इतंन्धूर्षाहौ (पद० ४।३३ सं० ४।३३)

व्विश्श्वासाहमंवसे[4] (पद० ७।३४ सं० ७।३६)

[5]समत्सु' सासहं÷ (पद० ५।३६ सं० ५।४०)

पृतनाषाह्या'य च[6] (पद० १८।६२ सं० १८।६८)

[7]व्व्रातसाहा? (पद० २९।४६ सं० २९।४६)

स्थितोपस्थिते—

अभिमातिसहऽ इत्त्यंभिमाति। सहं÷ (पद० १२।१०४)

ससहिमितिं। ससहिम् (पद० ११।७१)

सपत्नसहीतिं सपत्न। सही (पद० ५।१०)

धूःसहावितिं धूः। सहौ (पद० ४।३३)

व्विश्श्वसहमितिं व्विश्श्व[8]। सहंम् (पद० ७।३४)

ससहऽ इतिं स[9]। सहं÷ (पद० ५।३६)

पृतनासह्यायेतिं पृतना। सह्यांय (पद० १८।६२)

व्व्रा[10]तसहाऽ इतिं व्व्रात[11]। सहा? (पद० २९।४६)

---

१. त्यादि अष्ट क.
   त्याद्यष्ट घ.
   त्यादिभ्योऽष्ट ज. ग.
२. द्वेति आदेः घ.
३. इतं नास्ति ख. ग. ज.
४. अवसे नास्ति ख. ग. ज.
५. सिमत्सु साहः क. सिमत्सु घ.
६. च नास्ति क. घ. ख.
७. प्रात घ.
८. विश्वा घ.
९. सासहः घ.
१०. व्रोतसाहा घ.
११. व्राता साह्याः घ.

[शसतेदीर्घविधानम्]

[३४०] उक्थाच्च[1] शसेः ।३।१२४।।

उक्थ[2]शब्दात् परः[3] शसे[4]र्ह्रस्वो दीर्घमापद्यते ।

उक्क्थशासं[5]श्चरन्ति[6] (पद० १७।२८ सं० १७।३१)

स्थितोपस्थिते तु[7]—

उक्क्थशसऽ इत्यु[8]क्क्थ । शसं ÷ (पद० १७।२८)

[चतुर्णां दीर्घविधानम्]

[३४१] एवा-च्छ-चक्रमा- थ।३।१२५।।

एतेषां चतुर्णां [9]ह्रस्वा दीर्घमाप[10]द्यन्ते । संहिताधिकारादवसाने न[11] ।

एवा नो दूर्व्वे (पद० १३।१८ सं० १३।२०)

[12]'एव' शब्दोऽत्र उपमार्थ एव, व्याख्यानात् ।

अवधारणार्थस्य तु न—

तदेव शुक्रम् (पद० ३२।१ सं० ३२।१)
स एव जातः (पद० ३२।४ सं० ३२।४)
अच्छा व्वदामसि (पद० १६।४ सं० १६।४)
चक्रमा व्वयम् (पद० ३।४४ सं० ३।४५)
अथा नऽ इन्द्र[13] (पद० ७।२४ सं० ७।२५)

अवसाने तु—

ता नोऽ अच्छ (पद० ३३।६९ सं० ३३।७८)

---

१. च्य घ.
२. क्थ्य क.
३. परे घ.
४. शसो ख. शसोह्र ज.
५. शाष घ.
६. चरन्ति नास्ति ख. ग. ज.
७. तु नास्ति क. घ.
८. इति उक्थ ज. उक्थ्य क.
९. हृस्वा घ.
१०. माद्यन्ते ख.
११. च क. ग. ज.
१२. 'एवं'''इत्यारभ्य' 'जातः' पर्यन्तो पाठः 'अथा न इन्द्र' इत्यनन्तरं वर्तते क. घ. एवा घ.
१३. इन्द्र नास्ति ख. ग. ज.

[विद्याशब्ददीर्घविधानम्]

[यज्ञप्रकरणनिमित्तकदीर्घविधानम्]

[३४२] विद्मासौत्रा[1]मण्याम् ।३।१२६।।

'विद्म' इत्ययं ह्रस्वो दीर्घमापद्यते सौत्रामणीमन्त्रान् वर्जयित्वा ।

विद्मा ते'ऽ अग्ने[2] (पद० १२।१८ सं० १२।१९)

असौत्रामण्यां किम्—

वि[3]द्म धाँऽ उं च न प्रं[4] विद्म (पद० १९।६५ सं० १९।६७)

[अधशब्ददीर्घविधानम्]

[३४३] अधायत्-स्म[5]-ग्ना-वायुषु ।३।१२७।।

'अध' इत्ययं ह्रस्वो दीर्घमापद्यते, 'यत्-स्म-ग्ना-वायु' एताञ्छ[6]ब्दान् वर्जयित्वा ।

अधा सपत्नान् (पद० १७।५९ सं० १७।६४)

अधा ह्य[7]ग्ने (पद० १५।४१ सं० १५।४५)

अयदित्या[8]दि किम्—

अध यत् (पद० २७।९ सं० २७।९)

अध स्मा[9] ते[10] व्रजनम् (पद० १५।५१ सं० १५।६१)

अध ग्ना? (पद० ३३।४४ सं० ३३।४८)

अध व्वायुस् (पद० २७।२३ सं० २७।२४)

[अष्टसप्ततिषु दीर्घनिपातनम्]

[३४४] (१) पिबा सोमं, (२) पि[11]बा सुतस्य,[12] (३) स्था मयोभुवो,[13] (४) नू रणे, (५) शमी[14]ष्व, (६) मा महानो, (७)

---

१. सौत्र ज.
२. अग्ने नास्ति ख. नैतदुदाहरणम् ज.
३. उद्म क.
४. प्रविद्म ग. ज एव.
५. स्य क.
६. शब्दान् नास्ति क. ख.
७. स्वग्ने क.
८. त्यदि क.
९. स्म क. ज.
१०. ते व्रजनं नास्ति ख. व्रजनं नास्ति ज.
११. विबा घ.
१२. स्य" इत्यादि ३।१३० ज.
१३. भुवो नास्ति ख.
१४. शीष्व घ.

मामहन्ताम्, (८) शीतम[1], (९) रीरिषो, (१०) रीरिषित, (११) यामयन्ति, (१२) हिष्माते, (१३) वर्धयारयि[2]म्, (१४) श्रुधी हवं, (१५) चरा सोम, (१६) सूय वसिनी, (१७) श्रोता ग्रावाणो, (१८) धर्षा मानुषः, (१९) पाथा दिवो, (२०) यु[3]क्ष्वा हि, (२१) गमयातमः (२२) सिञ्च[4]ता सुतम्, (२३) परीवाप, (२४) उक्था शस्त्राण्य-(२५)-ता हवींष्या, (२६) च्याजानु, (२७) क्षामारे रिहत्, (२८) क्षामा[5] भिन्दन्तो, (२९) रुहेमा स्वस्तये, (३०) जनयथा च, (३१) धारया मयि, (३२) तरामृधो, (३३) बोधामे, (३४) विचृता बन्ध,-(३५) भव[6]ता हवेषु, (३६) शृणुधी गिरो, (३७) रक्षातोकं, (३८) चर्ष[7] णीसहां (३९) चर्षणी[8]धृतो, (४०) येना समत्सु, (४१) वने मात, (४२) ऋध्यामा ते, (४३) शिक्षा सखि[9]भ्य, (४४) स्तत्रारथन्, (४५) दीया रथेन (४६) ताजयता, (४७) वर्धया त्वं (४८) प्र[10]ब्रवामा घृ[11]-तस्या (४९) जगन्था परस्या, (५०) ररिमा हि, (५१) पुरी तता, (५२) [12]प्लोहाकर्ण्ण,[13] (५३) शुण्ठाकर्णो, (प्रकृति दीर्घा वित्येके) (५४) नीकाशा, (५५) अनूकाशेन, (५६) चक्रा जरसं, (५७) मिथूक-(५८) स्तरता सखायः, (५९) सास-

---

१. तम् घ.

२. रयिं श्रु क. घ.

३. यक्ष्वा घ.

४. सिञ्चता घ.

५. क्षाभा घ.

६. मपता घ.

७. र्षणी घ.

७. र्षणा घ.

९. सख्वि घ.

१०. पन्न घ.

११. घृत घ.

१२. पमीहा घ.

१३. कर्णः घ.

ह्वा॑न्-(९०) या[२] मार्गो-(९१) भयादत, (९२) ऋतीष ह-(९३) मभीषु,-(९४) सुष्टरीमा जुषाणो, (९५) यजो देवान्,[३] (९६) येनापावका-(९७) श्चायन्तो, (९८) यदी सरमा, (९९) स्वदया सुजिह्व, (७०) निषद्या दधिष्व, (७१) सदतना र[४]णिष्टन (७२) भरा चिकित्वांश्-(७३) चिचकित्सा गविष्ठा[५]-(७४) ववाददद्रक्षा[६] चा,-(७६) युनक्, (७७) सृजा रराणः, (७८) सादन्य मिति च ।३।१३०॥

---

[३४४] सूत्रे निपातितानामष्टसप्ततिरूपाणां ज्योत्स्नायां सूत्रत एव वेदाध्यायिनां कृते स्पष्टत्वात् प्रसङ्गोद्धरणं न कृतम्, परमनभ्यस्तमन्त्राणां जिज्ञासूनां स्थलनिर्देशमन्तरा सन्तोषो न स्यादिति नीचैः रूपसङ्ख्याया अग्रे पदपाठ-संहितापाठयोः स्थलानामङ्कनिर्देशः क्रियते—

१. सासहह्वा घ
२. यामार्गो घ.
३. न ये घ
४. नणि क. घ.
५. ष्टा ख
६. वादद्रक्षा क. घ.

१. सं. २६।४ पद. १६।४
२. सं. ७।३८ पद. ७।३६
३. सं. ३३।७० पद. ३३।६३
४. सं. ११।५० पद. ११।४७
५. सं. १।१५ पद. १।१५
६. सं. १७।५५ पद. १७।५१
८. सं. ३३।४२ पद. ३३।३८
८. सं. २।२० पद. २।२०
९. सं. १६।१५ पद. १६।१५
१०. सं. २५।२२ पद. २५।२०
११. सं. २५।३९ पद. २५।३७
१२. सं. ३।४६ पद. ३।४५
१३. सं. ३।१४ पद. ३।१४
१४. सं. २१।१ पद. २१।१
१५. सं. ४।३७ पद. ४।३७
१६. सं. ५।१६ पद. ५।१६
१७. सं. ६।२६ पद. ६।२४

पिबा-सोममित्यादीनि अष्टसप्ततिरूपाणि कृतदीर्घाणि निपात्यन्ते। यत्र तु पदद्वय-पाठस्तत्र यथोक्ते[1] दीर्घः, अन्यत्र तु एकपदस्थः।

'प्लीहाक[2]र्ण-शुण्ठाकर्णौ प्रकृतिदीर्घौ' (५२-५३ पदौ) इति के[3]षाञ्चिन्मतम्, माध्यन्दिनानां तु निपातनाद्दीर्घः।

हि ष्मेति (१२ पदम्) किम्—
<u>अर्ध स्म ते</u> (पद० १५।५१ सं० १५।६२)

१८ सं. ६।८ पद. ६।७
१९. सं. ८।३१ पद. ८।२६
२०. सं. ८।३४ पद. ८।२९
२१. सं. ८।४४ पद. ८।३८
२२. सं. १९।२ पद. १९।२
२३. सं. १९।२१ पद. १९।१९
२४. सं. १९।२८ पद. १९।२६
२५. सं. १९।५९ पद. १९।५७
२६. सं. १९।६२ पद. १९।६२
२७. सं. १२।६ पद. १२।६
२८. सं. १९।६९ पद. १९।६७
२९. सं. २१।६ पद. २१।५
३०. सं. ११।५२ पद. ११।४९
३१. सं. ११।५८ पद. ११।५५
३२. सं. ११।७२ पद. ११।६७
३३. सं. १२।४२ पद. १२।३५
३४. सं. १२।६३ पद. १२।५४
३५. सं. १७।४३ पद. १७।४०
३६. सं. १३।५२ पद. १३।४७
३७. सं. १३।५७ पद. १३।४७
३८. सं. २८।१ पद. २८।१
३९. सं. ७।३८ पद. ७।३१
४०. सं. १५।४० पद. १५।३६
४१. सं. १५।४० पद. १५।३६
४२. सं. १५।४४ पद. १५।४०
४३. सं. १७।२१ पद. १७।२०
४४. सं. २९।४५ पद. २९।४५
४५. सं. १७।३६ पद. १७।३३
४६. सं. १७।४६ पद. १७।४३
४७. सं. १७।५२ पद. १७।४९
४८. सं. १७।९० पद. १७।८३
४९. सं. १८।७१ पद. १८।६८
५०. सं. १८।७५ पद. १८।६८
५१. सं. २५।८ पद. २५।८
५२. सं. २४।४ पद. २४।४
५३. सं. २४।४ पद. २४।४
५४. सं. २४ १८ पद २४।१८
५५. सं. २५।२ पद. २५।२
५६. सं. २५।२२ पद. २५।२०
५७. सं. २५।४३ पद. २५।४१
५८. सं ३५।१० पद. ३५।९
५९. सं. ३९।७ पद. ३९।७
६०. सं. ३५।११ पद. ३५।१०
६१. सं. ३१।८ पद. ३१।८
६२. सं. २६।११ पद. २६।१०
६३. सं. २७।४० पद. २८।४०
६४. सं. २९।४ पद. २९।४
६५. सं. ३३।३ पद. ३३।३
६६. सं. ३३।३२ पद. ३३।२८
६७. सं. २७।३६ पद. २७।३५
६८. सं. ३३।५१ पद. ३३।५२
६९. सं. २९।२६ पद. २९।२६
७०. सं. २६।२३ पद. २६।२२
७१. सं. २६।२४ पद. २६।२३
७२. सं. ३४।१४ पद. ३४।१४
७३. सं. ३४।२३ पद. ३४।२३
७४. सं. ३४।३६ पद. ३४।३५
७५. सं. ३४।२७ पद. ३४।२७
७६. सं. २९।१३ पद. २९।१३
७७. सं. २७।९१ पद. २७।२०
७८. सं. ३४।३१ पद. ३४।२१

१. क्ति घ.
२. कर्णा क. घ.
३. केषां आरभ्य 'च इति' पर्यन्तं नास्ति क. ख.

'इति च' इति चकारोऽनुक्तसमुच्चयार्थः । तेन[1]

नि[2] यच्छ देवायुर्वम् (पद० ३७।९ सं० ३७।१६) इति ।

यच्छेति किम्—

य॒ज्ञप॑तिन्देव॒युव॑म् (पद० १।१२ सं० १।१२)

पुरीततेति (५१ पदम्) विभक्तिरविवक्षिता[3] ।

पुरी॑तत् (पद० ३९।९ सं० ३९।९)

इत्यपि भवति । स्थितोपस्थिते—

श॒मि॒ष्व्वेति॑ शमिष्व (पद० १।१५ सं० १।१५)

म॒म॒हा॒नऽ इति॑ ममहान्? (पद० १७।५१ सं० १७।५५)

म॒म॒ह॒न्ता॒[4]मिति॑ ममहन्ताम् (पद० ३३।३८ सं० ३३।४२)

अ॒शि॒त॒मेत्य॑शि । तम (पद० २।२० सं० २।२०)

रि॒रि॒षऽ इति॑ रिरिषः (पद० १६।१५ सं० १६।१५)

रि॒रि॒षतेति॑ रिरिषत[5] (पद० २५।२० सं० २५।२२)

य॒म॒य॒न्तीति॑[6] यमयन्ति (पद० २५।३७ सं० २५।३९)

सु॒ य॒[7]व॒सिनीति॑ सु । य[7]व॒सिनी॑ (पद० ५।१६ सं० ५।१६)

परि॒वाप॒ऽ इति॒ परि॒ । व्वाप॒ ÷ (पद० १९।२६ सं० १९।२८)

उ॒क्थशस्त्राणी[8]त्यु॑क्थ । श॒स्त्राणि॑ (पद०)

च॒र्ष॑णि॒सहा॒मिति॑ चर्षणि॒ । सहा॑म्[9] (पद० २८।१ सं० २८।१)

च॒र्ष॑णि॒धृ॒तऽ इति॑ चर्षणि । धृतः (पद० ७।३१ सं० ७।३१)

पु॒रि॒ततेति॑ [10]पुरि॒ । तता॑ (पद० २५।८ सं० २५।८)

---

१. तेन नास्ति ग. ज. ख.

२. न नास्ति क. घ.

३. क्षित घ.

४. हन्मा ज.

५. षत् ज.

६. यमयन्तीति नास्ति क. घ.

७. पव घ. क.

८. उक्थशस्त्राणि इत्येव क.
उक्थशस्मा इत्येव घ.

९ चर्षणि । सहाम् इत्येव क. घ.

१०. तता पुरि घ.

पु॒रि॒तदिति॑ पुरि[1] । तत् (पद० ३९।९ सं० ३९।९)

प्ली॒ह॒[2]कर्ण्ण॒ऽ[3] इति॑ प्लीह । कर्ण्णं॑ ÷ (पद० २४।४ सं० २४।४)

शु[4]ण्ण॒ठकर्ण॒ऽ इति॑ शु[5]ण्ठ । कर्ण्ण॑ ÷ (पद० २४।४ सं० २४।४)

ब॒भ्रुर्नि॑काशा॒[6]ऽ इति॑ ब॒भ्रु । नि॑काशाः॑ (पद० २४।१८ सं० २४।१८)

अ॒नु का॒शेनेत्य॑नु । का॒शेन॑ (पद० २५।२ सं० २५।२)

स॒स॒ह्वानि[7]ति॑ स॒स॒ह्वान् (पद० ३९।७ सं० ३९।७)

अ॑पमा॒र्ग्गेत्य॑प[8] । मार्ग्गः (पद० ३५।१० सं० ३५।११)

उ॒भ॒यदंत॒ऽ इत्यु॑भ॒य[9] । दंत॑ (पद० ३१।८ सं० ३१।८)

ऋ॒ति॒[10]सह॒मित्यृ॑ति॒[11] । सह॑म् (पद० २६।१० सं० २६।११)

अ॒श्व॒यन्त॒ऽ इत्य॑श्व॒ । यन्तं॑ ÷ (पद० २७।३५ सं० २७।३६)

अ॒यु॒ नगित्य॑यु॒ नक् (पद० २९।१३ सं० २९।१३)

स॒द॒न्न्य॑मिति॑ स॒द॒न्न्य॑म् (पद० ३४।२१ सं० ३४।२१)

दे॒ व॒यु॒व॒मिति॑ देव॒[12] । यु॒वं॑म् (पद० ३७।९ सं० ३७।१६)

'अ[13]कारोपधो यकारम्' (ज्यो. १९ प्रा. ३।१४३) इति सूत्रस्या[14]पि एतदध्याय-

स्थत्वात् स्थितोपस्थिते—

व्वृष्टि॒मानि॒वेति॑ वृष्टि॒मान् । इ॑व (पद० ७।३८ सं० ७।४०)

॥ इति दीर्घप्रकरणम् ॥

---

१. पुरी घ.
२. प्लीहा ज.
३. कर्णा घ.
४. शण्ठ ज.
५. शुण्ठ कर्णः इत्येव घ.
६. श ज.
७. मिति क. घ.
८. त्यपा घ.
९. भयः घ.
१०. ऋती क. घ.
११. त्यती क. घ.
१२. देवा घ.
१३. आका क. ज.
१४. सूत्रमेतदध्या क. घ.

❋द्विर्वचनप्रकरणम्❋

[द्विरुक्तौ औत्सर्गिकविधिः]

[३४५] स्वरात् संयोगा[1]दिर्द्विरु[2]च्यते सर्वत्र ।।४।१००।।

स्वरात् परः संयोगादि[3]र्वर्णः प[4]दान्त-मध्या-दिषु द्विरुच्यते ।

अनु॒ष्टुप्प्ते'[5] (सं० १३।५७ पद० १३।५२)

इ॒षे त्त्वा' (सं० १।१ पद० १।१)

आ[6]च्च्या॒ जा'नु (सं० १९।६० पद० १९।६२)

स्वरात् किम्—

श्रु॒धि श्श्रु॒त्कर्ण्ण (सं० ३३।१५ प० ३३।१२)

[रेफ-हकारयोर्द्वित्वनिषेधः, परस्य द्वित्त्वं च]

[३४६] परं तु रेफ-हकाराभ्याम् ।।४।१०१।।

तु ए[7]वार्थः। रेफ-हकाराभ्यां परं व्यञ्जनमेव द्विरुच्यते, न रेफ-हकारौ ।

सूर्य्य' ÷ (पद० ३१।१२ सं० ३१।१२)

पूर्व्वः (पद० १३।४ सं० १३।५)

प्रवाहय्या[8]य (पद० १६।४३ सं० १६।४३)

बा॒[9]ह्वोः॑ (पद० २४।१ सं० २४।१)

---

१. गा नास्ति क.
 सयोगा ज.
२. द्विरु ज.
 द्रुंरु घ.
३. दिवर्णः क. घ.
४. पन्दान्त ज.
 पदातान्त घ.
५. अनुष्टुमे क.
 अनुष्टुभ घ.
 अनुसे ज.
६. अच्या घ.
७. एवार्थे क.
 रावार्थे घ.
८. ल्या ज.
९. बाह्वोः घ. ज.

रेफ-हकारयोः प्रत्यक्षश्रुति[1]निमित्त[2]त्त्वेन सामान्य[3]प्राप्तकार्य[4]बाधः, तेन -र-हभिन्नव्य[5]ञ्जनस्यै[6]वानेन द्वित्वम् ।

अतिह्रस्वम् (पद० ३०।२० सं० ३०।३२)

अर्हतः (पद० २८।१८ सं० २८।१९)

अत्रैतयोर्न द्वित्वम्। स्वरे परे (?) तु[7] रेफात् परेषा[8]मूष्मणामनेन न[9] द्वित्वम्, [10]तत्र रेफस्य [11]एकारसहितोच्चारणविधानद्रेफ[12]धर्माभावात् ।

दर्शतम् (पद० ११।३४ सं० ११।३७)

वर्षाः[13] (पद० १०।१२ सं० १०।१२) [इत्यादौ]

य[14]त्र तु [15]हल्परत्वं तत्र विधानाभावाद् द्वित्वं भवत्येव ।

व्वस्व्वैः (पद० २५।१ सं० २५।१)

व्वष[16]ड्र्याय (पद १६।३८ सं० १६।३८)

अतएव पाणिनिना '[17]शरोऽचि' (पा० ८।४।४९) इति द्वित्व[18] निषेधः कृतः ।

उक्तं च शिक्षायाम्—

'परं रेफ-हकाराभ्यां व्यञ्जनं [19]तूष्मवर्जितम् ।

द्वित्वमापद्यते रेफ-हकारौ[20] तु न कुत्रचित् ॥'

---

१. श्रुत ख. श्रुतंज.
२. मित ज.
३. न्यं पादा घ.
४. कार्यित्वबाधः क. घ.
५. ब्य घ
६. स्यैव वा क. घ.
७. तु नास्ति. क. घ.
८. उष्म घ. ज.
९. न नास्ति. क. घ. ज.
१०. त्तत्र घ.
११. यकारसा घ.
१२. रेफे ख.
१३. वर्षो ज. वर्षा क. घ.
१४. पत्र घ.
१५. 'हल्' स्थाने 'स्म' घ
१६. वर्ष्रा घ
१७. शिरो घ.
१८. द्वित्वं ज.
१९. तुषः घ.
२०. कारो न तु कत्रचित् घ.

[स्पर्शोदयानामूष्मान्तस्थानां द्वित्वनिषेधः]

[३४७] ऊ[1]ष्मान्तस्थाभ्यश्च स्पर्शः ।४।१०२।।

च एवार्थो[2] भिन्नक्र[3]मः। ऊष्मभ्योऽन्त[4]स्थाभ्यश्च परः स्पर्श एव द्विरुच्यते, न ऊष्मान्तस्थाः ।

[5]अश्म्मन्नूर्ज्ज॑म् (पद० १७।१ सं० १७।१)
पूष्ण्ण॑÷ (पद० १।१० सं० १।१०)
हस्त्ते॑ (पद० ११।११ सं० ११।११)
द[6]धिक्काव्ण÷ (पद० २३।३० सं० २३।३२)
शल्म्मलिः (पद० २३।११ सं० २३।१३)

[विसर्जनीयात्परस्य व्यञ्जनोदयस्पर्शस्य द्वित्वम्]

[३४८] विसर्जनीयाद् व्यञ्जनपरः ।४।१०६।।

विसर्जनीयात् परः स्पर्शो द्विरुच्यते, व्यञ्जनपरश्चेत्[7] ।
व्विष्ण्णोः क्क्रमं÷ (पद० १२।५ सं० १२।५)
हिर॑ण्ण्[8]यपाणिः प्प्रतिगृभ्ण्णा[9]तु (पद० १।२० सं० १।२०)

व्यञ्जनपरः किम्—

न्यङ्कु÷ कक्क[10]टः (पद० २४।३२ सं० २४।३२)
गौरमृगः पिद्वः (पद० २४।३२ सं० २४।३२)

[ङकार-नकारयोर्विशेषद्वित्वविधिः]

[३४९] ङ्नौ चेद् ध्रस्व[11]पूर्वौ स्वरे प[12]दान्तौ ।।४।१०७।।

---

१. उष्मा ज.
२. र्थां ज.
३. ऋमः घ.
४. न्नस्था
५. ऊर्ज्जम् नास्ति ख. ज. ग.
६. रधिक्रादृणः घ.
७. चेति ज.
८. हिरण्य नास्ति ख. ग. ज.
९. ह्णातु घ.
१०. कक्कुटः क. कक्कुरः घ. कक्कटः ज.
११. ह्रस्व क. घ.
१२. पादा घ.

प[1]दान्तस्थौ ङकार-नकारौ स्वरे परे ह्रस्व[2]पूर्वौ चेद्[3] द्विरुच्येते[4]।

युङ्ङ्सि (पद० १०।२२ सं० १०।२४)

अक्षन्नमी॑मदन्त (पद० ३।५० सं० ३।५१)

ह्रस्वपूर्वौ[5] किम्—

सुप्प्राङ्जः॒ (पद० २५।२३ सं० २५।२५)

कुटरूनालभते (पद २४।२३ सं० २४।२३)

[ऊष्मान्तस्थयोः द्विर्वचने विशेषः]

[३५०] नास्वरपूर्वा [6]ऊष्मान्तस्थाः ।४।१०५।।

अ[7]स्वरेति पर्यु[8]दासः। तेन स्वसदृशस्य[9] वर्णस्य ग्रहणम्। ये[10] ऊष्माणोऽन्तस्थाश्च व्यञ्जनपूर्वास्ते द्विर्वचनस्य निमि[11]त्तं न भवन्ति[12]।

[13]व्वर्ष्मन् (पद० ५।१७ सं० ५।१७)

पार्ष्ण्या॑ वा[14] (पद० २६।३८ सं० २५।४०)

व्यञ्जनेति किम्—

[15]अन्ह॑÷ (पद० ८।४२ सं० ८।४८)

इन्नप्प्त्रे॑ (पद० ५।२१ सं० ५।२१)

[हेतुतः परस्य द्वित्वप्राप्तौ न पूर्वाक्षरस्य द्वित्वम्]

[३५१] यैस्तु परं तैर्न पूर्वम् ।४।१०४।।

यैर्हेतुभूतैः परस्य यस्य[16] द्विर्भावः[17] क्वचिदुक्तस्तैः संयुक्तं पूर्वं तद्[18] व्यञ्जनं न द्विरुच्यते।

---

१. पादा घ.
२. ह्रस्वः पूर्वश्चे ज.
३. चेद् नास्ति घ.
४. च्यते घ.
५. पूर्वो ज.
६. उष्मा ज.
७. अस्व ख.
८. पय्यु ज.
९. स्य नास्ति ज.
१०. य उष्मा ज. ये नास्ति घ.
११. मिन्नं घ.
१२. वति ज.
१३. वष्मन् ज.
१४. वा नास्ति ख. ग. ज.
१५. नैवदुदाहरणम् ख. ग. ज.
१६. यमस्य घ. क.
१७. र्भावे ख.
१८. तत् ख.

कृत्स्_न[1]हृदयेन (पद० ३९।८ सं० ३९।८)

स[2]कारस्य ऊ[3]ष्मत्वात् स्पर्शद्विर्भावस्य निमि[4]त्तत्वेतेन संयुक्तः पूर्वः स्पर्शस्तकारो न द्विरुच्यते। अत्र पू[5]र्वस्यानेन[6] (४।१०४) निषेधः परस्य पूर्वेण (४।१०५)

"य[7]त्र चोभयतः[8] स्पर्शैः संयुक्ताः श-ष-साः[9] सहाः।
सत्र नाद्यः क्रमो ज्ञेयो नापरो बोधितो बु[10]धैः॥"

❀ परिभाषासूत्रम् ❀

[आगन्तुकाक्षरस्य स्वरूपनिर्देशः]

[३५२] प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः ।४।१०६।।

द्वितीयाः प्रथमैः सह, चतुर्थास्तृतीयैः सह द्विरुच्यन्ते[11]। परिभाषेयम्।
यत्र द्वितीयानां चतुर्थानां च द्विर्भावः[12] प्राप्त[13]स्तत्रेदमुपतिष्ठते।
व्विक्रव्यायं (पद० ११।१७ सं० ११।२०)
शीग्घ्यू'य[14] (पद० १६।३१ सं० १६।३१)
परमे_ष्ठी (पद० ८।४८ सं० ८।५४)
[15]विष्ष्फुरन्ती' (पद० २९।४१ सं० २९।४१)

---

१. कृत्सन घ.
२. सहका घ.
३. ङष्म ज.
४. त्वेन घ. ख.
५. पूर्व ज क. घ. पूर्वस्य अने ख.
६. स्यानेनैव ग. ज.
७. कारिकेयं नास्ति ख. ग. ज.
८. भयः तः घ.
९. शसाः घ.
१०. बुधैः घ.
११. च्यते घ.
१२. द्विभविः क.
१३. प्राय घ.
१४. शीग्घ्या ज.
१५. ष्पुर क. ज. स्फुर घ.

[यमलक्षणम्]

[३५३] अन्तः पदेऽपञ्चमाः[1] पञ्चमेषु विच्छेदम् ।४।१६२।।

पदमध्ये विद्यमानाः पञ्चमभिन्नाः स्पर्शाः पञ्चमेषु यममापद्यन्ते । 'विच्छेद' इति यमसंज्ञा ।

रु॒क्क्म॒? (पद० १२।१ सं० १२।१)
अ॒ग्नि॒? (पद० १।२२ सं० १।२२)
व्वा॒त्र्त्रं॑घ्न[2]म् (पद० १०।८ सं० १०।८)
त॒नु॒च्चि्म॒ (पद० १।४ सं० १।४)
य॒ुनज्जि्म॒[3] (पद० ६।७ सं० ६।९)
आ॒त्क्मा (पद० ४।१५ सं० ४।१५)
वि॒द्द्मा[4] ते॑ (पद० १२।१८ सं० १२।१९)
सि॒ध्म्मलम्[5] (पद० ३०।१५ सं० ३०।१७)
पा॒प्प्मने॑ (पद० ३०।३ सं० ३०।५)

अत्र 'स्वरात् संयोगादिर्द्विरु[6]च्यते' (ज्यो० ३४५ प्रा० ४।१००) इति द्वित्वे जाते— 'विकारी यथासन्नम्' (ज्यो० १५ प्रा० १।१४२) इति प्रतिवर्गमाद्या[7]नां जित्संज्ञकत्वात्प्र[8]-थमो यमः । द्वितीयानां जित्संज्ञकत्वात् सो[9]ष्मसंज्ञकत्वाच्च द्वितीयः । तृतीयानां धिसंज्ञ-कत्वात् तृतीयः । चतुर्थानां[10] धिसंज्ञकत्वात् सोष[11]मसंज्ञकत्वाच्च[12] चतुर्थः । एवं चत्वारः । अत एव—

'चत्वारश्च यमाः स्मृताः ।' (पा०शि० ४ श्लो०)इति पाणिनीयशिक्षायामुक्त[13]म् ।
एते ज्ञेयाः, न त्वेषामुच्चारणम्—
'अशरीरं यमं प्राहुः'[14] (या० शि० २।९२)—इति शिक्षायामुक्तत्वात् ।

---

१. ञ्चमः क. घ.
२. त्र्घ्नम् घ. ज.
३. ज्नि ख. आत्मा ज. क.
४. 'विध्म' इत्येव ख. ग. ज.
५. धिध्म क. सिद्धमत्मम् घ. सिध्यलम् ज.
६. द्विरुच्यते इति नास्ति. ख. ग. ज.
७. माधानां घ.
८. त्वाप्र क. घ.
९. सोष्म''''कत्वात् नास्ति. घ.
१०. थानां ज.
११. सीष्म घ.
१२. त्वाच्या घ.
१३. युक्तम् घ.
१४. 'प्राहुः' स्थाने 'विद्यात्' इति मुद्रित या० शि० पाठः ।

[अनुस्वारस्य द्वित्वनिषेधः]

[३५४] नानुस्वारः ।४।११०।।

अनुस्वारो न द्विरुच्यते ।

इमꣳ स्तनम् (पद० १७।८० सं० १७।८७)

[सवर्णाक्षरयोगे द्वित्वनिषेधः]

[३५५] सवर्णे ।४।१११।।

सवर्णे परे[1] व्यञ्जनं द्विर्न भवति ।

सँव्यौ॑मि (पद० १।२२ सं० १।२२)

यन्ते॑ (पद० १२।५६ सं० १२।६५)

[ऋवर्णोदयाक्षरस्य द्वित्वनिषेधः]

[३५६] ऋवर्णे ।४।११२।।

ऋवर्णे परे[2] द्विरुक्तिर्न[3] भवति ।

अनिंष्टृत[4]ꣳ (पद० २७।४ सं० २७।४)

'ऊष्मान्तस्थाभ्य' (ज्यो० ३४७ प्रा० ४।१०२) इति प्राप्तम् ।

[यमस्थले द्वित्वनिषेधः]

[३५७] यमे ।४।११४।।

यमे परे[5] द्वित्वं न ।

य॒[6]क्क्ना (पद० ३९।८ सं० ३९।८)

'अन्तः पद' (ज्यो० ३५३ प्रा० ४।११०) इति कात्परे यमे जा[7]ते ककारस्य संयोगादित्वात् प्राप्तं द्वित्वं न ।

[विसर्गस्य द्वित्वनिषेधः]

[३५८] विसर्जनीयः ।४।११५।।

न द्विरुच्यते ।

---

१. परे इत्यनन्तरम्—'पूर्वोऽनुस्वारो व्यञ्जने' इत्यधिकः पाठः ज.

२. परे नास्ति ख. परे न द्वि. ज.

३. न—नास्ति ज.

४. ष्टृनः घ.

५. यमे न द्वित्वं ख.

६. 'यक्ना' इत्यारम्य 'परे द्वित्वं न' इत्यन्तः पाठो नास्ति क. घ. यन्का ज.

७. आते ज.

द्विवः ककुत् (पद० ३।१२ सं० ३।१२)
'स्वरात् संयोगादिः' (ज्यो० ३४५ प्रा० ४।१००) इति प्राप्तम् ।

[वर्गीयोत्तमस्य स्ववर्गीयानुत्तमोदये द्वित्वनिषेधः]

[३५९] स्ववर्गीये चानुत्तमे ।४।११६।।

उत्तमभिन्ने स्ववर्गीये वर्णे परे द्वित्वं न ।
यन्ते'[1] (पद० १२।५६ सं० १२।६५)
तद्दे वानाम् (पद० ३३।१४ सं० ३३।१७)
अनुत्तमे किम्—
तन्नं[2] ÷ (पद० ३३।३८ सं० ३३।४२)

[अवसाने द्वित्वनिषेधः]

[३६०] अवसितं च ।४।११७।।

अवसानगतं व्यञ्जनं न द्विरुच्यते ।
ऊक् (पद० १८।९ सं० १८।९)
'परं तु रेफहकार' (ज्यो० ३४६ प्रा० ४।१०१) इति 'ऊष्मान्तस्था' (ज्यो० ३४७ प्रा० ४।१०२) इति वा ककारस्य द्वित्व[3] प्राप्तिः ।

।। इति द्विर्भावप्रकरणम् ।।

❀ अथ द्वियकारप्रकरणम् ❀

[द्वियकाराधिकारसूत्रम्]

[३६१] द्वियकारम् ।४।१५१।।

इ[4]त्यधिकारः ।

[दश द्वियकारपदानि]

[३६२] आप्याय्यमानो यमो, रय्यै,[5] धाय्या रूपं, श्रवाय्यं, नृपाय्यं, पौरुषेय्या, हृदय्या, सहरय्या, निचाय्य,[6] सान्नाय्य,[7] सन्ता[8]-य्येति च ।४।१५२।।

---

१. यत्ते घ. ज.
२. तन्न घ.
३. द्वित्व इति ज; एव.
४. वृत्तिरियं नास्ति. ख. ज. ग.
५. 'रय्यै इत्यादि' सूत्ररूपं ज.
६. निचाप्य्य घ. क.
७. सान्नाय्य नास्ति ख.
८. सन्ना घ.

इमानि दश रूपाणि द्वियकाराणि निपा[1]त्यन्ते। चकारोऽनुक्तसमुच्चयार्थः। तेन[2]—

र॒य्या पोषे॑ण (पद० १२।७ सं० १२।७)
आ॒प्प्या॒य्यमा॑नो य॒म॒? (पद० ८।५१ सं० ८।५७)[3]
यम इति किम्—
आ॒प्प्याय्य॑मानो अ॒मृता॑य सोम[4] (पद० १२।१०४ सं० १२।११३)
[5]र॒य्यै॑ त्वा॒ पोषा॑य त्वा (पद० १४।१८ सं० १४।२२)
यजेति॑ धाय्या रू॒पम् (पद० १९।२२ सं० १९।२४)
तन्नो॑ गी॒र्भिः? श्र॒वाय्य॑म् (पद० १९।६२ सं० १९।६४)
व्व॒र्त्ती रु॑द्द्रा नृ पाय्य॑म् (पद० २०।७२ सं० २०।८१)
पौरु॑षेय्या गृभः? (पद० २१।४० सं० २१।४३)
नेमो॑ हृदय्या॒य च (पद० १६।४४ सं० १६।४४)
स॒ह र॒य्या निव॑र्त्त॒स्वा (पद० १२।१० सं० १२।१०)
अ॒ग्नेज्ज्योति॑र्न्नि॒चाय्य॑ (पद० ११।१ सं० ११।१)
शर॑सि सन्ता॒य्यमा॑ने (पद० ३९।५ सं० ३९।५)

॥ इति द्वियकारप्रकरणम् ॥

❋ द्विकारप्रकरणम् ❋

[३६३] द्विसकार ँ शास्स्व-रास्स्वेति ।४।१४६॥

इमे द्वे द्विसकारे। 'स्वरात् संयोगादिः' (ज्यो० ३४५ प्रा० ४।१००) इति द्वित्वे प्राप्ते द्विसकारत्वविधानं ज्ञापकं 'सामान्यतः अन्तः स्थासु[6] सकारस्य द्वित्वं न' इति[7]। उक्तं च शिक्षायाम्—

'सकारस्य द्विरुक्तिर्या सा द्वयोरेव नान्यतः।
आ च शास्स्वा च, रास्स्वेति[8] सकारोऽत्र द्विरुक्तिजः॥'

---

१. निया घ.
२. तेन.....षेण इति नास्ति ज.
३. अत्र 'रय्या पोषेण' इति ज.
४. सोम नास्ति ख. ग. ज.
५. इत उत्तरमुदाहारणानि न सन्ति ख. ज.
६. स्थापु घ.
७. इति नास्ति. ख. ग. ज.
८. राश्वेति ज.

अत एव केशवेनापि—

'न सोर्व्यो[1]श्च' (नवाङ्कसूत्रम्)

इति सूत्रमकारि।

[2]शास्स्व० (पद० २१।६० सं० २१।६१)

रा॒स्स्व॒ (पद० ४।१६ सं० ४।१६)

[द्वित्वापवादः]

[३६४] न क्ष-वृ-चि-श्वि-स-त-येभ्यस्त्रैकम् ।६।२७।।

क्षादिभ्यः[3] सप्तभ्यः[4] 'त्र' इत्यत्र एकमेव व्यञ्जनं न द्वे।

क्ष॒त्रस्य॑[5] (पद० १०।८ सं० १०।८)

[6]क्षत्रम् (पद०   सं०   )

वृ॒त्रं व्वंधेत्[7] (पद० १०।८ सं० १०।८)

चि॒त्रं दे॒वाना॑म्[8] (पद० ७।४० सं० ७।४२)

श्वि॒त्रऽ आ॑दि॒त्या[9]ना॑म् (पद० २४।३९ सं० २४।३९)

स॒त्रस्य॒ऽ ऋद्धिः॑[10] (पद० १८।४६ सं० १८।५२)

लो॒के तत्र॑[11] (पद० १३।२९ सं० १३।३९)

'सचन्त॒[12] यत्र पूर्व्वे' (पद १३।२९ सं० १३।३९)

---

१. सोव्यो ज. घ.

२. उदाहरणद्वयमेतत् क एव.

३. रिभ्यः घ.

४. भ्यः परस्मिन् त्र इतिं ज.

५. उदाहरणमेतत् क; घ.

६. उदाहरणमेतत् ख. ग. ज.

७. वधेत् नास्ति ज. ख. ग.

८. देवानां नास्ति ख. ग. ज.

९. आदित्यानाम् न ख. ग. ज.

१०. ऋद्धिः नास्ति ख. ग. ज.

११. लोके नास्ति ख. ग. ज.

१२. यत्र इत्येवोदाहरणं ख. ग. ज,

[अर्थवशेन द्वित्वनिषेधः]

[३६५] वीद्[1]ध्य्याय-वाद्ध्र्रीं[2]नसोद्रा[3]श्चराश्चेत् ।६।२८॥

एते[4]षां त्र[5]याणां द्वित्वं न प्राणिवाचकाश्चेत् ।

नमो[6] व्वीद्ध्य्या॑य च (पद० १६।३८ सं० १६।३८)

वाद्ध्र्री॑[7]नसस्ते मत्यै (पद २४।३९ सं० २४।३९)

अपामु द्रोमा[8]साम् (पद २४।३७ सं० २४।३७)

चराः[9] किम्—

समु द्राय॑ शिशु मारा॑न् (पद २४।२१ सं० २४।२१)

एतत्प्रकरणं ज्ञानार्थं क्वचिदुच्चारणार्थं ।

'न व्यञ्जनपरस्यैकस्या[10]नेकस्या[11]वोच्चारणे विशे[12]षोऽस्तीति'

श्रीभाष्योक्तेः ।

[अङ्गत्व विचारः]

[३६६] स्वरोऽक्षरम् ।१।९९॥

'सहाद्यैर्व्यंज्ञनैः' (ज्यो० १५९ प्रा० १।१००) 'उत्तरैश्चावसितैः' (ज्यो० १६० प्रा० १।१०१) इत्युक्तम् । तत्र स्वरयोर्मध्ये यत्रानेकं व्यञ्जनं तत्र किं पूर्वस्याङ्गं[13] किं परस्येति निर्णयार्थमाह—

[संयोगे प्रथमवर्णस्य पूर्वाङ्गत्वम्]

---

१. ईध्य्याय घ. विध्र्या ज.
२. वाध्द्री ज. वार्ध्री घ.
३. द्रा नास्ति घ.
४. एषां क. घ. ग.
५. त्रयाणां घ.
६. नमो नास्ति ख. ग. ज.
७. वाध्री ज. वार्ध्रनिसस्ते घ. नसस्मे क. नसो मत्यै ख.
८. मासां नास्ति ख ग. ज.
९. चयः घ.
१०. कस्था ख.
११. स्योच्चा क. घ.
१२. विशोस्ती क. विशोषोस्नी शि.
१३. ङ्गं नास्ति ख.

[३६७] संयोगादिः पूर्वस्य १।१०२ ॥

संयोगस्यादि[१]वर्णः पूर्वस्याङ्गं भवति ।

इ॒षे[२]त्वा॑ (पद १।१ सं १।१)

अत्र द्वित्वे द्वौ तकारौ । तत्र प्रथमस्तकारः पूर्वस्य, द्वितीयस्तकारो वकारश्च परस्य ।

[यमाक्षरस्य पूर्वाङ्गत्वम्]

[३६८] यमश्च ।१।१०३ ॥

यमश्च पूर्व[३]स्याङ्गम् ।

रु॒क्क्म? (पद १२।१ सं १२।१)

अत्र ककारो यमश्च पूर्वस्य[४], मकार उत्तरस्य ।

[द्वित्वोत्पन्नाक्षरस्य पूर्वाङ्गत्वम्]

[३६९] क्रमजं च ।१।१०४।।

संयोगादेः परस्य द्वित्वेन जातं व्यञ्जनं क्रमजं, तच्च पूर्वस्याङ्गम् ।

पा॒श्श्व्यंम् (पद ३९।९ सं ३९।९)

रेफः एकः[५] शकारः पूर्वस्य, द्वितीय शकार[६]-वकार-यकारा[७] उत्तरस्य ।

वष्ष्या॑य (पद १६।३८ सं १६।३८)

रेफः एकः[८] षकारः पूर्वस्य । द्वितीय-ष[९]कार यकारौ उत्तरस्य ।[१०]

बा॒ह्वो? (पद १६।५३ सं १६।५३) ।

हकारः एको वकारः पूर्वस्य, द्वितीयो वकार उत्तरस्य ।

---

१. स्यादि वर्णः ख. घ. शि. स्यादिर्वणः क.

२. ईष त्वा घ.

३. पूर्वास्या घ.

४. स्याङ्गम्, शि०

५. एक ज.

६. शकारः घ.

७. कार ज.

८. एक ज एकः शका घ.

९. शकाखकारयकारा घ. क.

१०. इतउत्तरम्—'वष्ष्याय । रेफ एकः, षकारः पूर्वस्य, द्वितीयषकारमकारौ परस्य' इति पुनः पाठः घ. क.

[स्पर्शोदयस्य क्रमजोत्तरव्यञ्जनस्य पूर्वाङ्गत्वम्]

[३६९] तस्माच्चोत्तर ँ स्पर्शे ॥१।१०५॥

क्रमजादुत्तरं व्यञ्जनं स्पर्शे परे पूर्वाङ्गं भवति ।

पा[1]र्ष्ण्यां (पद० २५।३८ सं० २५।४०)

अत्र[2] रेफो द्वौ षकारौ पूर्वस्य । ण[3]कार य[4]कारौ परस्य ।

वर्ष्मं न् (पद० ५।१७ सं० ५।१७)

रेफो द्वौ षकारौ पूर्वाङ्ग[5]म्, मकारः पराङ्गम् ।

यदर्थं पूर्वाङ्गपरा-ङ्गत्वविचारस्तदाह—

[पूर्वाङ्गपराङ्गचिन्ताफलम्]

[३७०] व्यञ्जन ँ स्वरेण सस्वरम् ॥१।१०७॥

यद् व्यञ्जनं यस्य उदात्तादेः[6] स्वरस्य[7] अङ्गं तत्[8] तत्स्वरयुक्तं स्यात् । उक्तान्युदाहरणानि । उक्तं च—

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ।
स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥ [या० शि० २।२९ पृ० ९५]

[ह्रस्वस्वराणां गुरुत्वम्]

[३७१] संयोगपूर्वा[9] व्यञ्जनान्ता[10] अवसानगताः स्वरा द्विमात्राः ॥४।१०८॥

---

१. पार्ष्ण्यौ घ. पार्ष्णाय क.
२. अत्र नास्ति क. घ. ज. चि.
३. एकार क.
४. स्यकारौ घ.
५. र्वागम् ज.
६. दात्तादेः घ.
७. स्वस्या घ.
८. तत्तत् क. घ. तत् नास्ति ख. ज.
९. पूर्वव्य क. घ.
१०. नात्ताव क. घ.

द्विमात्रा[1] इति ह्रस्वा[2]पेक्षया किंचित् कालाधिक्य[3]स्योपल[4]क्षणं न तु दीर्घत्वस्य । उक्तं च शिक्षायाम्—

स्वराः संयोगपूर्वा ये व्यञ्जनान्तास्तथान्तगाः ।
एषां कालो द्विमा [5]त्रः स्यान्न तु दीर्घा हि ते स्मृताः ॥

अ॒ग्नि॒? (पद० २३।१७ सं० २३।१७)
तत् (पद० ३२।१ सं० ३२।१)
जा॒तः? (पद० ३।१४ सं० ३।१४)
तम् (पद० १।८ सं० १।८)
उत्[6] (पद० १।१२ सं० १।१२)
च॒ (पद० १।२५ सं० १।२५)

॥ इति सामान्य विकाराः[7] ॥

अथ स्वरप्रकरणम्

[सामान्यतः पदस्यैकोदात्तत्वम्]

[३७२] स्वरितवर्ज्जमेकोदात्तं पदम् ॥२।१॥

स्वरित[8]मक्षरं अस्ति यस्मिन्[9] तत् स्वरितम् स्वरितवत् । त[10]त्पदं वर्जयित्वा एकोदात्तं[11] पदं स्यात् । एकः स्वरः पदे उदात्तः[12] स्वरितो वा भवति । उत्सर्गोऽयम् । द्व्युदात्तादीनि[13] तु वाचनिकानि[14] वक्ष्यति ।

अवशिष्टं तु[15]—

---

१. मात्र ज.
२. ह्रस्व घ.
३. धिक घ.
४. पलुक्ष घ.
५. द्विमात्रं ख.
६. उत शि. उत्त क. उक्ताः घ.
७. विकरणाः ज.
८. रितवजमक्ष ज.
९. यस्मिंस्तत् शि.
१०. तत् नास्ति. ख. ग. ज. शि. स्वरितवेत्यदं घ.
११. दानं घ.
१२. उद्यात्तं घ.
१३. द्व्युदात्तानि क. घ.
१४. वाचिकानि घ. वाचकानि क.
१५. अवशिष्टं तु—नास्ति क. घ.

[विहितशिष्टस्य अनुदात्तत्वम्]

[अधिकारसूत्रम्]

[३७३] अनुदात्तम् ॥२।२॥

अनुदात्तः[१] अस्ति य[२]स्मिन् त[३]दनुदात्तम् । त[४]त् स्वरविशिष्टं स्यात् ।

सादन्यम् (पद० ३४।२१ सं० ३४।२१)

वीर्यम्[५] (पद० २।८ सं० २।८)

दवां[६] ÷ (पद० २।२१ सं० २।२१)

अनमीवा? (पद० १।१ सं० १।१)

अनुदात्तमित्यधिकारः ।

[अस्मदो विकाराणामनुदात्तत्वम्]

[३७४] नो नौ मे मदर्थे त्रि-द्वेय-केषु ॥२।३॥

नः नौ मे एतानि पदानि अनुदात्तानि स्युः ।

आनं ÷ (पद० २५।१२ सं० २५।१४)

त[७]न्नो (पद० ४।३४ सं० ४।३४)

यन्मे (पद० ३६।२ सं० ३६।२)

'त्रि-द्वये-केष्वि'[८]ति स्पष्टार्थम् । 'मदर्थे' इत्युत्तरार्थम् । 'सन्देहे साहच[९]र्यं० नियामकम्' इति सर्वादेशस्यैव ग्रहणं तेन 'शे'[१०] इत्यादेश विशिष्टस्य न ।

[११]रायो मे (पद० ४।२२ सं० ४।४४)

---

१. अनुदात्तोस्त्यस्मिन् शि.

२. अस्मि ज. ग.

३. तत् नास्ति. ग.

४. तत् नास्ति. क. ख. ग. ज. शि.

५. वीर्यः घ.

६. देवः घ. नैतदुदाहरणं शि.

७. नन्नो क.

८. केष्विमं कि घ.

९. चर्य घ. ज.

१०. शे नास्ति घ. क.

११. एयो क.

[३७५] मा च ॥२।४॥

मा इत्येतत्पदमस्मदर्थे विद्यमानमनुदात्तं स्यात् ।

प्र मा' तिर (पद० ५।३३ सं० ५।३३)

मदर्थे किम्—

मा नो' मित्रः (पद० २५।२२ सं० २५।२४)

[युष्मदो विकाराणामनुदात्तत्वम्]

[३७६] वो वां ते त्वदर्थे ॥२।५॥

वः वाम् ते इमानि पदानि युष्मदर्थे वि[1]द्यमानानि अनुदात्तानि स्युः ।

दे॒वो वं[2] ÷ (पद० १।१ सं० १।१)

सं व्वाम् (पद० १२।५० सं० १२।५८)

मा ते' (पद० १।१ सं० १।१)

त्वदर्थे किम्—

[3]ते नो' अवन्तु (पद० ४।११ सं० ४।११)

[4]ते नो॒ अर्व्वन्त' ः (पद० ९।१६ सं० ९।१७)

[३७७] त्वा च ॥३।६॥

इदम[5]नुदात्तं स्यात् ।

भू॒ताय त्वा (पद० १।११ सं० १।११)

ग॒न्ध॒र्व्वस्त्वा (पद० २।३ सं० २।३)

[अन्वादेशस्यानुदात्तत्वम्]

[३७८] पूर्ववानानुदेशः ॥२।७॥

पूर्वोक्तार्थवाचकं यत्[6] पश्चादुच्चारितं पदं तद[7]नुदात्तं स्यात् ।

घा॒सम॒स्मै (पद० ११।७० सं० ११।७५)

एषां कृणुहि (पद० १०।३० सं० १०।३२)

आ[8]स्मिन् (पद ३।१ सं० ३।१) ।

---

१. वर्तमानानि ख. ज. ग.

२. देवो वः घ.

३. इदमुदाहरणं क. घ.

४. ख. ग. ज. एव

५. म् अ, ख.

६. यत् नास्ति ख. ज.

७. 'द' नास्ति घ., 'तत्' न क. ग. ज. ख.

८. अ क. घ,

पूर्ववानिति किम्—

अस्मै क्षत्राय (पद० ७।२० सं० ७।२१)

एषां पशूनाम् (पद० १६।४७ सं० १६।४८)

अस्मिन्सधस्थे[1] (पद० १५।५४ सं० १५।५४)

[सामान्यतः 'असि' पदस्य अनुदात्तत्वम्]

[३७९] असि ।।२।८।।

इदमनुदात्तं स्यात् ।

वेष्योसि[2] (पद० १।३० सं० १।३०)

कृष्णोसि (पद० २।१ सं० २।१) ।

[यथा पदस्यानुदात्तत्वम्]

[३८०] यथा गृभो-भुवोऽग्निभ्यः[3] ।।२।९।।

गृभ इत्यादि त्रिभ्यः[4] य[5]थेति पदमनुदात्तं स्यात् ।

जीवं गृभो' यथा (पद० १२।७६ सं० १२।८५)

अक्षि भुवो' यथा (पद० २३।२७ सं० २३।२९)

अग्नयो' यथा (पद० ८।३५ सं० ८।४०)

एभ्यः किम्—

करद्यथा (पद० ३।५७ सं० ३।५८) ।

[गिर्वणः इत्यस्यानुदात्तत्वम्]

[३८१] गिर्वणः[6] ।।२।१०।।

इति पद[7]मनुदात्तं स्यात् ।

परित्वा[8] गिर्वणः[9] (पद० ५।२९ सं० ५।२९) ।

---

१. 'स्थे' क. ज., 'स्त्वे' घ.

२. वेदोऽसि क. ख. ज., वेष्योसि घ.

३. भ्याः घ.

४. त्रितस्य घ.

५. परं यथेति ज. एव

६. गिवर्ण घ., गीर्वणः ज.

७. 'इति पद' स्थाने 'इद' क. ख. ज.

८. 'त्व' ज.

९. गिवर्णः घ., गीर्वणः ज.

['घृतेन' पदस्वरः]

[३८२] अग्ने घृतेनेति च ॥२।११॥

अग्ने इत्येतत्पूर्वकं[1] घृतेनेत्येतद[2]नुदात्तं स्यात् ।

अग्ने घृतेन (पद० १७।४७ सं० १७।५०)

अग्ने किम्—

अङ्गिरो घृतेन (पद० ३।३ सं० ३।३) ।

['चिकितः' इत्यस्यानुदात्तत्वम्]

[३८३] प्र-चिकितश्च ॥२।१२॥

प्र इत्येतत्पूर्वकं चिकित इत्येतत्पदमनुदात्तं स्यात् ।

प्रचिकितो मनीषा (पद० १९।५० सं० १९।५०)

['एनस्' इत्यस्य अर्थभेदेन स्वरभेदः]

[३८४] एनोऽपापे ॥२।१३॥

एन[3] इत्येतत्पदमनुदात्तं पापं अविद्यमानं[4] चेत् ।

उदेनम् (पद० १७।४७ सं० १७।५०)

मैनाम् (पद० १२।१४ सं० १२।१५)

अप्स्वे[5]नत् (पद० १२।३० सं० १२।३५)

आविशेषात् सर्वलिङ्गम् ।

अपापे किम्—

यदेनश्च[6] कृमा[7] (पद० ३।४४ सं० ३।४५) ।

['श्रुतम्' इत्यस्य विशिष्टस्थलेऽनुदात्तत्वम्]

[३८५] इह पूर्वं ॐ श्रुतम् ॥२।१४॥

---

१. 'क' ज.
२. 'त्पदम' ख. ज., 'त्यनुदात्तं' घ. ज.
३. त. क.
४. ने ज.
५. स्वे क. ख.
६. 'एनश्च' ज.
७. म ज.

इहे[1]त्येतत्पूर्वं श्रुतमित[2]येत[3]त्पदमनुदात्तम्[4]।

ममे[5]दि[6]ह श्रु॑तु ॐ हवं॑म्[7] (पद० ७।८ सं० ७।९)

एतस्याख्यातत्वाद् 'अनुदात्तमाख्यातम्' (ज्यो० प्रा० ६।१) । इत्यनेनानुदात्तत्वे सिद्धे विधानं ज्ञापकम् 'श्रुधातोराख्यातस्य तेन नानुदात्तत्वम् ।' इति[8] तेन

वरुण श्रु धी हवं॑म् (पद० २१।१ सं० २१।१)

इत्यस्य न निघा[9]तः । इह किम्—

ष॒ वा॒ना श्रुतम् (पद० २१।८ सं० २१।९)

[विशेषस्थले मन्ये पदस्यानुदात्तत्वम्]

[३८६] मन्ये पद पूर्वं सर्वत्र ॥२।१५॥

पदपूर्वं मन्ये इत्येतत्पद[10]म[11]नुदात्तं स्यात्[12] ।

होतारं मन्ये॒ (पद० १५।४३ सं० १५।४७)

'सर्व[13]त्र[14]' इति 'यदवृत्तोपपदाच्च' (ज्यो० ४४९ प्रा० ६।१४) इति निषेध-बाधनार्थम् ।

तं[15] मन्ये॒ ष:[16] (पद० १५।३७ सं० १५।३७)

---

१. ह घ.
२. म न ख.
३. त न घ.
४. इत्यनन्तरं 'स्यात्' इति पदं ज.
५. 'ममे' न ख. ज.
६. 'इ' ख. ज.
७. 'हवम्' न ख ज.
८. 'इति' न ज.
९. पा ख.
१०. 'द' नास्ति ख.
११. 'म' नास्ति क. ख.
१२. नास्ति क. ख. घ.
१३. व ज.
१४. त्रे घ.
१५. 'तत्' घ.
१६. च: घ.

[चतुर्दश निपातानामनुदात्तत्वम्]

[३८७] [1]वाच-क-मु-चित्-समस्माद्[2]-घह-स्म-त्व [3]ईम् मर्य्या-अरे-स्विन्-निपा[4]ताश्चेत् ॥२।१६॥

वा इत्यादयश्चतुर्दश शब्दा अनुदात्ताः [5]स्युः निपाताश्चेत्[6] ।
वातो' वा (पद० ९।७ सं० ९।७)
अग्निश्च (पद० ४०।८ सं० ४०।९)
इमा नु कम् (पद० २४।४४ सं० २५।४६)
य उ सम्भू'त्या[7]म् (पद० ४०।८ सं० ४०।९)
हृदयाविध[8]श्चित् (पद० ८।१९ सं० ८।२३)
[9]अघायत? समस्मात् (पद० ३।२६ सं० ३।२६)
आघाघे (पद० ७।३० सं० ७।३२)
दधेह गर्भ'म् (पद० २३।५६ सं० २३।६३)
हिष्मांते (पद० ३।४५ सं० ३।४६)
पीयंति[10] त्वी अनु'त्वः (पद० १२।३५ सं० १२।४२)
का ईमरे (पद० २३।४८ सं० २३।५५)
आविर्म'र्य्या[11] (पद० १०।९ सं० १०।९)
अजारे' पिशङ्गिला[12] (पद० २३।५० सं० २३।५७)
कः स्वित् (पद० २३।७ सं० २३।९)

निपाताः किम्—
चिदसि (पद० ४।१९ सं० ४।१९)
द्रविण मष्टु[13] य' कं (पद० ८।५४ सं० ८।६०)

---

१. वाचकमुचिदित्यादि इति ज. सूत्रसङ्केतः.
२. त् घ.
३. इम् घ.
४. निपाता घ.
५. स्युः नास्ति. क. घ.
६. श्चेदा क.
७. भूत्याम् घ.
८. विपश्चि ज.
९. आघा ज.
१०. पोयति नास्ति ख.
११. मया ज.
१२ गिला घ.
१३. ष्टु य क ज.

अन्ये निपाता आद्युदात्ताः[1]—

'इतिं' (पद० ४।२४ सं० ४।२४)

'अथो' (पद० ३।४२ सं० ३।४३)

'निपाता आद्युदात्ताः' (फि० सू० ३।५) इत्यु[2]क्त्वात् ।

[विशेषस्थले आमन्त्रितस्यानुदात्तत्वम्]

[३८८] पदपूर्वमामन्त्रित[3]मनानार्थेऽपादादौ ॥२।१७॥

पादादौ अविद्यमानं पदपू[4]र्वं सम्बो[5]धनविभक्त्यन्तमनुदात्तं स्यात्, तत्पदमामन्त्रितं च परस्प[6]रानन्वितं न चेत् ।

अरा॑तिमग्ग्ने (पद २।७६ सं० २।७६)

रोद॑सी व्विष्ण्णो (पद० ५।१६ सं० ५।१६)

नियुद्भि॑र्व्वायो (पद० २७।३२ सं० २७।३३)

तवे॑ पूरुष[7] (पद० १२ । ८० सं० १२।८२)

पदपूर्वं किम्—

अ॒ग्ग्ने । व्र॒त॒पः॒?[8] (पद० ४।१६ सं० ४।१६)

व्वायो॑ अ॒स्म्मिन् (पद० २७।२७ सं० २७।२८)

पूष॒न् तव॑ (पद० ३४।४० सं० ३४।४१)

अनानार्थं किम्—

अग्ग्नि॑र्हि देवा॑ँ (पद० २२।१८ सं० २२।१९)

अपादादौ किम्—

व्वृष॒[9]न्नग्ग्ने (पद० १५।२६ सं० १५।३०)

[आमन्त्रितसंबद्धषष्ठ्यन्तस्य एकपदवद्भावः]

[३८९] तेनानन्तरा षष्ठ्येकपदवत् ॥२।१८॥

---

१. दाताः घ.

२. इत्युक्त्वात् घ.

३. मामन्त्रित इति द्विः ख.

४. पूव ज पूर्वे घ.

५. सम्बन्धन ख.

६. परस्य ए ज.

७. रुषः घ. रुषा ज.

८. व्रतपते इति घ. ज.

९. वृषभने घ.

आमन्त्रितेन अर्थतो[1] देशत[2]श्च संबद्धं षष्ठ्यन्तम् एकपदवत् स्यात् ।
व्विश्श्वा॑सां भुवाम्पते॒ (पद० ३७।११ सं० ३७।१८)
उ[3]त्तिं॑ष्ठ ब्ब्रह्मणस्प्पते (पद० ३४।५५ सं० ३४।५६)
देशतः पूर्वं[4] परं च । अत एव—'न पृथिवि' (ज्यो० ३९०-३९२ प्रा० २।१९-२२) इत्यादि निषेधः कृतः ।

अनन्तरं किम्—
पते॒ त्वम॒स्य (पद० ३४।५७ सं० ३४।५८)
यस्स्यौ॑षधीः (पद० १२।७७ सं० १२।८६)
—अत्र 'य[5]स्य' इति 'अङ्गमङ्गम्[6]' (पद० १२।७७ सं० १२।०६) इत्यनेन सम्बद्ध्यते ।

[एकपदवद्भावापवादः]

[३९०] न (१) पृथिवि देवयजन्योषध्या[7] (२) देव भूरेः[8] (३) पवित्रपते पवित्रपूतस्या (४) पान्नपात् प्रतिरक्षन्[9] (५) नृणान्नृपते (६) सोमाग्नेः (७) सोमेन्द्रस्य (८) सोम सुवीर्यस्य (९) सोम विश्वे[10]षां देवानां (१०) प्रजापते यस्य (११) यस्य देवा—(१२) ग्ने तवा—(१३) ग्ने वाज[11]स्या—(१४) ग्ने वरुणस्या—(१५) पो अस्माकम् ।।२।१९।।

एतानि पञ्चदश षष्ठ्यन्तानि नैकपदवत् स्युः । (४) प्रतिरक्षन्निति किम्—
अपा॑न्नपा॒द्यो व॑÷ (पद० ६।२५ सं० ६।२७)

---

१. तः ख.
२. शनः घ.
३. उत् नास्ति ख. ज.
४. पूवं ज.
५. य नास्ति घ.
६. ङ्गत्य घ.
७. षध्याः देव क. घ.
८. भूरेः इत्यादि एव सूत्रनिर्देशः.
९. प्रतिरक्षन्नृणां इति नास्ति घ.
१०. विश्वैपां क.
११. वाजस्याग्ने नास्ति घ.
ज्योत्स्नायामेतान्युदाहरणानि स्पष्टत्वान्न पुनरावृत्तानि । परमस्माभिरनुसन्धातृणां सौकर्यायैतेषां स्थलनिर्देश । उपास्थप्यते—
इमान्येकोनत्रिंशदामन्त्रितानि चतुर्दश स्थलान्येवाधिकुर्वन्ति यथा—

[३९१] (१) सुमङ्गल (२) सत्यराजन्[1] (३) विकिरिद्र[2] (४) विलोहित (५) दरिद्र (६) नीललोहित (७) श्रेयस्कर (८) भूयस्करा (९) म्बेऽ (१०) म्बिकेऽ (११) म्बालिके (१२) श[3]रव्ये (१३) ब्रह्मस[4] ऍ शिते (१४) मरुतो (१५) अश्विना (१६) [5]यव्ये (१७) गव्ये (१८) द्यावापृथिवी (१९) उरो (२०) अग्ना[6]३ई (२१) पत्नीवँल् (२२) लाजीं३ (२३) च्छाची[7]३न्[8] (२४) मीढुष्टम (२५) शिवतम (२६) सहस्राक्ष (२७) शतेषुधे (२८) वसुपते (२९) वसुदावन् ॥२।२०॥

एतान्येकोनत्रिंशदामन्त्रितानि नानुदात्तानि स्युः[9]। अत्र यानि अपूर्वाणि

१. पृथिवि देवयजन्योषध्यास्ते (सं० १।२५)
२. वामस्य हि क्षयस्य देव भूरेः (सं० ८।१९)
३. तस्य ते पवित्रपते पवित्रं पूतस्य (सं० ४।४)
४. अपान्नपात्प्रतिरक्षन्न सुर्य्यम् (सं० ८।२४)
५. त्वन्नृणान्नृपते जायसे शुचिः (सं० ११।२७)
६. उशिक् त्वं देव सोमाग्नेः (सं० ८।५०)
७. वशी त्वं देव सोमेन्द्रस्य (सं० ८।५०)
८. अच्छिन्नस्य ते देव सोम सुवीर्य्यस्य (सं० ७।१४)
९. अस्मत्सखा त्वं देव सोम विश्वेषां देवानाम् (सं० ८।५०)
१०. नो भुवनस्य पते प्रजापते यस्य (सं० १८।४४)
११. यस्य देव दधिषे पूर्व्यं पेयम् (सं० ७।७)
१२. अग्ने तव श्रवो वयः (सं० १२।१०६)
१३. अग्ने वाजस्य गोमतः (सं० १५।३५)
१४. त्वन्नोऽअग्ने वरुणस्य विद्वान् (सं० २१।३)
१५. आपोऽअस्माकं मन्तरुदरे सुशेवाः (सं० ४।१२)

१. सुश्लोक सुमङ्गल सत्यराजन् । [सं० २०।४]
२. विकिरिद्र विलोहित नमस्ते । (सं० १६।५२)
३. अन्धसस्पते दरिद्र नीललोहित । (सं० १६।४७)
४. बहुकार श्रेयस्कर भूयस्कर (सं० १०।२८)
५. अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन । (सं० २३।१८)
६. परापत शरव्ये ब्रह्मसंशिते । (सं० १७।४५)
७. इता मरुतोऽअश्विना (सं० ३३।४८)
८. यव्ये गव्यऽएतदन्नं मत्त देवाः । (सं० २३।८)
शेषमग्रिमपृष्ठे

पा[9]दादीनि वा तेषामनुदात्तत्वा[10]भावः सिद्ध एव, अन्येषामनेन[11] निषेधः ।

[३९२] इडोत्तराणि नव, स्वानोत्तराणि षड[12]-ग्न्युत्तराणि चत्वारि भगोत्तराणि [13]चेन्द्रोत्तरमेक ँ सिनीवाल्युत्तरं[14] च प्रजापतये ब्रह्मन्नि[15]ति च ॥ २।२१॥

इडा[16]शब्दादुत्तराणि नव । स्वानशब्दादुत्तराणि षट् ।

अग्निशब्दादुत्तराणि चत्वारि । भगशब्दादुत्तराणि चत्वारि ।

इन्द्रशब्दादुत्तरमेकम् । सिनीवालि[17]शब्दादुत्तरमेकम् ।

प्रजापतये शब्दादुत्तरे[18] ब्रह्मन्निति । —एतानि षड्विंशतिरामन्त्रितानि नानुदात्तानि स्युः ।

---

९ द्यावा पृथिवीऽउरोऽ अन्तरिक्ष । (सं० ४।७)

१०. अग्ना ऽ३इ पत्क्नी वन्सजू? (सं० ८।१०)

११. भूभुवह स्वर्ल्लाजी३ न्छाचीडेन् । (सं० २३।८।)

१२. मीढुष्टम शिवतम शिवो न ÷ (सं० १६।५१)

१३. धनुष्ट्वठं० सहस्राक्ष शतेषुधे (सं० १६।१३।)

१४. मघवा वसुपते वसुदावन् । (सं० १२।४३।)

---

१ जन् इत्यादि' सूत्रसङ्केतः ज.

२. रुद्र घ.

३. सख्ये घ.

४. सशिते घ.

५. यत्ये घ.

६. अन्नाई ख.

७. छाचीन् घ लाजीन्छा ख.

८. स्युः नास्ति घ.

९. पदादी घ. ख.

१०. त्वा नास्ति ख.

११. मन्येन ख.

१२. षट् इत्यादि सूत्र संकेतः ज.

१३. च ख.

१४. रश् ख.

१५. नि घ.

१६. ड ख.

१७. ली ज.

१८. र ज.

इडे॒ रन्ते॒ हव्ये॒ काम्ये॒ चन्द्रे॒[1] ज्योते[2] दि॑ति॒[3] सर॑स्वति॒[4] महि[5] विश्रु॑ति [९] (पद० ८।३७ सं० ८।४३)

स्वान॒ भ्राजा—ङ्घा[6]॑रे॒ बम्भा[7]॑रे॒ हस्त॒ सुह॑स्त॒ कृशा॑नो [६] (पद० ४।२७ सं० ४।२७)

अग्न॒ऽ इन्द्र॒ व्वरु॑ण॒ मित्र॒ देवा॑ः [४] (पद० ३३।४४ सं० ३३।४८)

भग॒[8] प्रणे॑त॒—र्भग॑[9] सत्य॑राधो॑ भग॑ [४] (पद० ३४।३५ सं० ३४।३६)

इन्द्र॒ गोम॑न् [१] (पद० २६।४ सं० २६।४)

सिनी॑वालि॒[10] पृथु॑ष्टुके [१] (पद० ३४।१० सं० ३४।१०)

प्र॒जाप॑तये॒ ब्रह्मन्[11] (पद० २२।४ सं० २२।४)

[भूतिशब्दस्याप्युदात्तत्वम्]

[३९३] भूतिराद्युदात्तम्[12] ॥२।२२॥

अथ आद्युदात्ताधिकारः।
भूतिः इत्येतदाद्युदात्तं स्यात्।
भूति॑श्च मे (पद० १८।१४ सं० १८।१४)
नमो॒[13] भूत्यै॒ ये॑दम् (पद० १२।५६ सं० १२।६५)

['कदा' शब्दस्वरविधानम्]

[३९४] कदा न रिष्येम पूर्वम् ॥२।२३॥

'न रिष्येम' इत्येतत् पूर्वं 'कदा' आ[14]द्युदात्तं स्यात्।
न रि॑ष्येम॒ क॒दा॑ च॒न (पद० ३४।४० सं० ३४।४१)

---

१. द्रे ख.
२. ति घ.
३. मि घ.
४. ती ज.
५. ही ज.
६. अंघारे क.
७. म्बा क.
८. गः ज.
९. नास्ति क. ज.
१०. ली ज.
११. अत्र 'प्रभूत्यै चेदम्' क.
१२. इति सूत्रं नास्ति क.
१३. नमो न ख. ज.
१४. अ ग.

'न रिष्येम' किम्—

कुदा चुन स्तुरी[1]? (पद० ३।३२ सं० ३।३२)

[आमन्त्रितस्याद्युदात्तविधिसूत्रम्]

[३९५] आमन्त्रितं च ।।२।२४।।

सम्बोधन[2]विभक्त्यन्तमाद्युदात्तम् ।

अग्ने' गृहपते (पद० ३।३९ सं० ३।३९)

'ते नान[3]न्तरा[4]' (ज्यो० ३८९ प्रा० २।१८) इत्येकपदातिदेशाद्—'ऊर्ज्जो' नपात्[5]' (पद० १२।९९ सं० १२।१०८) इत्यत्र 'ऊर्ज्ज' शब्दः आद्युदात्तः। वस्तुतः[6] ऊर्ज्जशब्दस्तु अन्तो[7]दात्तः। ऊर्ज्जो नपा'तुम्(पद० १५।२८ सं० १५।३२) पदपूर्वमिति तु एतस्यापवादः। तस्य अप्राप्तिनिषेधविषयश्चात्रोदाहरण[8]म् ।

[कृष्णशब्दस्वरविचारः]

[३९६] कृष्णो[9] मृगसंयोगे ।।२।२५।।

कृष्णशब्द आद्युदात्तः स्यात्, पशुवाचकस्य विशेषणं चे[10]त् ।

कृष्णो'सि (पद २।१ सं० २।१)

कृष्णो रात्र्यै (पद० २४।३६ सं० २४।३६)

मृगेति किम्—

श्वा कृ॒ष्णः (पद० २४।४० स० २४।४०)

अत्र 'श्वा' इत्यस्य 'कृष्ण' इति विशेषणम् ।

---

१. रोः क.
२. नं ख.
३. न क. घ.
४. रो घ.
५. नपात् घ.
६. तस्तु ज.
७. त्तो घ.
८. णे ज.
९. ष्णे क.
१०. 'न चेत्' क. घ.

[अन्तः शब्दस्वरविचारः]

[३९७] व्ययवांश्चान्तः ॥२।२६॥

विकारवान् अन्तः शब्द आद्युदात्तः स्यात् ।
परोऽ अन्तं ÷ (पद० २३।५५ सं० २३।६२)

व्यय[1]वान् किम्—
अन्तम॑र्मंहृति (पद० २३।५६ सं० २३।६३)

—अ[2]यमव्ययम् ।
अन्तं ÷ [3] (पद० ७४ सं० ७४)
वचनादिकृतो विकारो न ।

[परशब्दस्वरविचारः]

[३९८] परः प्रधाने ॥२।२७॥

अयमाद्युदात्तः स्यात्[4] प्रधानवाचकश्चेत् ।
जातः परोऽ अन्यः (पद० ८।३१ सं० ८।३६)
परोऽ अन्तं ÷ (पद० २३।५५ सं० २३।६२)

प्रधाने किम्—
पुरो दिवा (पद० १७।२६ सं० १७।२९)
अत्र 'पर[5]' शब्दोऽन्यवचनः ।

[मात्राशब्दस्वरविचारः]

[३९९] मात्रा च परिमाणे ॥ २।२८॥

मात्राशब्दः आद्युदात्तः परिमाणवाचक[6]श्चेत् ।
कस्य मात्रा (पद० २३।४२ सं० २३।४७)

परिमाणे किम्—
विभूर्म्मात्रा (पद० २२।१८ सं० २२।१९)
—इदं 'मातृ' शब्दस्य तृतीयैकवचनम् ।

---

१. व घ.
२. इद ख. ज.
३. तो ज.
४. ज. एव
५. रः क. ख.
६. वच क. वचन घ.

[दक्षिणाशब्दस्याद्युदात्तस्वरविचारः]

[४००] दक्षिणा च ॥२।२९॥

अयमाद्युदात्तः ।

दक्षिणामारोह (पद० १०।११ सं० १०।११)

[दक्षिणाशब्दस्याद्युदात्तस्वरापवादः]

[४०१] न दश विश्व[१]कर्मा निषद्येन्द्रस्य पातुः सदः सद्भ्येषु ।२।३०॥

दशेत्यादिसप्तसु दक्षिणाशब्द आद्युदात्तो न । निषद्यादिषु[२] त्रिषु अव्यवहितस्या[३]सम्भवेऽपि निषेधो भवत्येव । 'तस्मिन् (ज्यो० ८० प्रा० १।३४) इति व[४]र्णं सप्तमीनिर्देशविषयम्, 'पदे च' (ज्यो० २६० प्रा० ३।३६) इति ज्ञापकात् ।

दक्षिणा दश (पद० १६।६३ सं० १६।६४)

दक्षिणा विश्वकर्मा (पद० १३।५० सं० १३।५५)

दक्षिणतो निषद्य[५] (पद० १९।६० सं० १९।६२)

दक्षिणतऽ इन्द्रस्य (पद० ३७।५ सं० ३७।१२)

दक्षिणतः पातु (पद० ५।११ सं० ५।११)

'तसि[६]लादिषु' (पा० ६।३।३५) इति पुंवद्भावः । अत्र दीर्घान्तत्वाभावात् पूर्व[७]सूत्रस्याप्राप्तौ निषेधो ज्ञापकः ।

यत्किञ्चिदवयवभेदेऽपि का[८]र्यं प्रवर्तत एवेति । अत एव 'एनोऽपापे[९]' (ज्यो० ३८४ प्रा० २।१३) इति—

अप्स्त्रेनत् (पद० १२।३० सं० १२।३५) इत्यत्र भवत्येव ।

दक्षिणासदं (पद० ९।३५ सं० ९।३३)

दक्षिणासद्भ्यं (पद० ९।३४ सं० ९।३५)

---

१. इत्यादि सूत्रम् ज.

२. विश्वादिषु ख. ज.

३. स्य ज.

४. ववर्ण ख., वर्णा घ.

५. द्या ज.

६. शि ख.

७. वं ख.

८. र्य ज.

९. प ख.

[कर्णशब्दस्वरविचारः]

[४०२] कर्णः स्वाङ्गे ।।२।३१।।

कर्णशब्द आद्युदात्तः स्वाङ्गवाचकश्चेत् ।

कर्णौ[1] तेदनी[2]म् (पद० २५।२ सं० २५।२)

स्वाङ्गे किम्—

कर्णा गर्द्दभ६ (पद० २४।४० सं० २४।४०)

[महःशब्दस्वरविचारः]

[४०३] महो नपुंसके ।।२।३२।।

मह इत्येतदाद्युदात्तं नपुंसकलिङ्गं चेत् ।

महस्त्थ (पद० ३।२० सं० ३।२०)

महश्च मे (पद० १८।५ सं० १८।५)

नपुंसके किम्—

महोऽ अग्ग्ने[3]ः (पद० ३३।१४ सं० ३३।१७)

—अयं पुल्लिङ्गः ।

[श्रवः शब्दस्वरविचारः]

[४०४] श्रवश्च ।२।।३३।।

अयं च[4] आद्युदात्तो[5] नपुंसकश्चेत् ।

तव श्श्रव६ (पद० १२।९७ सं० १२।१०६)

नपुंसके किम्—

श्श्रवश्च मे (पद० १८।१ सं० १८।१)

—अयं पुंसि ।

['अन्धः' शब्दस्वरविचारः]

[४०५] अन्धो वीर्ये ।।२।३४।।

'अन्ध' शब्द आद्युदात्तो वीर्यवाचकश्चेत् ।

अन्ध[6]स्त्थ (पद० ३।२० सं० ३।२०)

---

१. र्णै घ.

२. तेदनी

३. ग्ने ज.

४. च न ज

५. त्तः ज.

६. अन्तस्या ज.

वीर्ये[1] किम्— अ॒न्धन्तम॒ः (पद० ४०।९ सं० ४०।९)
—अत्र अन्धशब्दो निबिडार्थः।

['एता' शब्दस्वरविचारः]

[४०६] एता वर्णे ।।२।३५।।

अयमाद्युदात्तो वर्णवाचकश्चेत्।
एता॑ऽ ऐन्द्राग्नाः (पद० २४।८ सं० २४।८)
—एताः[2] = (श्वि)चित्राः। वर्णे किम्[3]—
ए॒ता मे॑ (पद० १७।२ सं० १७।२)

['रोहित' शब्दस्वरविचारः]

[४०७] रोहित[4]श्च केवलः ।।२।३६।।

केवलो[5] 'रोहित' शब्द आद्युदात्तः।
रोहि॑तः (पद० २४।२ सं० २४।२)
केवलः किम्—
धू॒म्ररो॑हितः (पद० २४।२ सं० २४।२)

['यन्त्री' शब्दस्वरविचारः]

[४०८] यन्त्री राट् ।।२।३७।।

'यन्त्री' [6]शब्द आद्युदात्तो राट्शब्दः[7] परश्चेत्।
यन्त्री॒ राट् (पद० १४।१८ सं० १४।२२)
राट् किम्—
य॒न्त्र्यसि॒[8] (पद० १४।१८ सं० १४।२२)

---

१. वीर्ये ज.
२. एतः घ.
३. एतदनन्तरं 'एताश्चित्राः' इति ज.
४. त नास्ति घ.
५. केवलरोहित इति ग. ज अतिरिक्तेषु
६. यन्त्रीराट् शब्द इति घ. शब्दो ज.
७. : नास्ति घ.
८. यन्त्र्यसि घ.

['ओषधी' पदस्वरविचारः]

[४०९] ओषधीरनामन्त्रिते ।।२।३८।।

अनामन्त्रित 'ओषधी' शब्द आद्युदात्तः।

याऽ ओषधीः (पद० १२।६६ सं० १२।७५)

अनामन्त्रिते[1] किम्—

यस्यौषधीः (पद० १२।७७ सं० १२।८६)

[सर्वाद्यष्टशब्दानामाद्युदात्तविधानम्]

[४१०] सर्वं विश्व[2] मानुषा—शाः स्वाहा वाजः पयो नमः ।।२।३९।।

सर्वाद्यष्टशब्दा आद्युदात्ताः।

सर्व्वं यत् (पद० ३१।२ सं० ३१।२)

यत्र विश्वम् (पद० ३२।८ सं० ३२।८)

धर्षा[3] मानुषः (पद० ६।७ सं० ६।८)

विश्वाऽ आशाः (पद० २७।७ सं० २७।७)

स्वाहा य[4]ज्ञम् (पद० ४।६ सं० ४।६)

व्वाज[5]श्च मे (पद० १८।१ सं० १८।१)

पयः पृथिव्याम् (पद० १८।३५ सं० १८।३६)

नमः पूर्णा[6]यं (पद० १६।४६ सं० १६।४६)

['असि' पदस्य आद्युदात्तस्थलानि]

[४११] असि शिवा-सुष[7]दा[8]-पयस्वतोयत्ते - मधुमती - वर्चस्वानो[9]-जिष्ठो[10]-भ्राजिष्ठः[11]-शुष्मिणी-भद्रवाच्याय-वन्द्यो- मेध्यो-यम-आदित्य-स्त्रितः-सोमेन-स्वसेत्येतेषु ।।२।४०।।

---

१. तेति ज.

२. —इति सूत्रम् ज.

३. र्वे ज.

४. व ख.

५. च क; त ज.

६. र्ण क.

७. ख ज.

८. दा इत्यादि' सूत्रं ज.

९. हं क.

१०. ष्ठ ख.

११. ष्ठ ख.

शिवादिषु सप्तदशसु 'असि' शब्द आद्युदात्तः स्यात् ।

असिं शिवा (पद० १।२७ सं० १।२७)

असिं सु षदा' (पद० १।२७ सं० १।२७)

असि पर्यस्वती च (पद० १।२७ सं० १।२७)

अ[1]सि ध[2]त्ते (पद० ५।९ सं० ५।९)

भा[3]गोसि[4] मधु'मतीन्न'हं (पद० ७।१२ सं० ७।१२)

असि व्वर्च'स्स्वानहम्[5] (पद० ८।३२ सं० ८।३८)

अस्स्योजिंष्ठ्रो'ह[6]म् (पद० ८।३३ सं० ८।३९)

असि ब्भ्राजिंष्ठो'हम्[7] (पद० ८।३४ सं० ८।३९)

असिं शु ष्मिमणी (पद० १९।५ सं० १९।७)

असिं भद्द्रवाच्च्याय (पद० २१।५७ सं० २१।६१)

असि व्वन्दर्च[8]श्च्च (पद० २९।३ सं० २९।३)

असि मेद्ध्यंश्च्च (पद० २९।३३ सं० २९।३३)

असिं ध म? (पद० २९।१४ सं० २९।१४)

अस्स्यांदित्य? (पद० २९।१४ सं० २९।१४)

असिं ति त्रतः? (पद० २९।१४ सं० २९।१४)

असि सोमे'न (पद० २९।१४ सं० २९।१४)

असि स्स्वसा (पद० ३४।३२ सं० ३४।३३)

अत्र[9] 'सन्निकृष्टविप्रकृष्टयोः' (ज्यो० ९४ प्रा० १।१४४) इत्यनेन व्यवहितस्य—

अंसि स् स्योना (पद० १।२७ सं० १।२७)

---

१. म. घ.

२. यत्तो ज.

३. भ घ.

४. 'असि' न क., ख. ज.,

५. अहं न ख. ज.

६. अहं न ख. ज.

७. इत्युदाहरणं न ज.

८. न्च घ.

९. अत्र न ख. ज.

इत्यसिशब्दस्य 'सु[१]षदा' परत्वेऽपि आद्युदात्तं[२] न, 'पयस्वती' सहचरितत्वात् ।

सु॒षदा॑ चा॒सि (पद० १।२७ सं० १।२७)

इति[३] सुषदाशब्दस्य आद्युदात्तनिमित्तत्वम्, तेन असहचरितस्य—

स्योनासि॑ सु॒षदा॑सि (पद० १०।२६ सं० १०।२६) इति सुषदाशब्दे परे असिशब्दो

ना[४]द्युदात्तः ।

[४१२] धनदा-रत्नधा[५]भ्यां च ॥२।४१॥

आ[६]भ्यां च परः असि शब्द आद्युदात्तः ।

ध॑न॒दा असि॑ (पद० ९।२७ सं० ९।२८)

र॑त्न॒धा असि॑ (पद० २६।२० सं० २६।२१)

[४१३] रायो ऽ पोषे ॥२।४२॥

राय[७] इत्येतत्पदमाद्युदात्तं स्यात् पोष शब्दः परो न चेत् ।

रा[८]यो॒ मे (पद० ४।२२ सं० ४।२२)

तो[९]तो॒ राय॑÷ (पद० ४।२२ सं० ४।२२)

अपोषे किम्—

रा॒यस्पो॑षम् (पद० ३।२० सं० ३।२०) ।

[४१४] न भागे[१०] शिष[११]योः[१२] ॥२।४३॥

एतयोः परयोः[१३] राय इत्येतदाद्युदात्तो[१४] न ।

---

१. शुषदाशब्दपर ज.
२. त्तत्वं ज.
३. सुषदाचासीति न ज.
४. न आ ख. उदाहरणस्य द्विर्लेखनं घ. ज.
५. दा क. घ.
६. अ ज.
७. 'राय' न घ.
८. र घ.
९. त क. घ.
१०. गमी क., गेमी घ.
११. ष्ट घ.
१२. यो घ., —(मिशिषयोः) = ज.
१३. परयोः ज. एव नान्यत्र
१४. त्तं क. घ. ज.

रायो भागम् (पद ३४।२३ सं० ३४।२३)

रायऽईशिषे (पद० १७।६५ सं० १७।७१)

[त्रिधा' पदस्वरविचारः]

[४१५] त्रिधा बद्ध[1]-हितयोः ॥२।४४॥

एतयो स्त्रिधा शब्द आद्युदात्तः ।

त्रिधा बद्धः (पद० १७।८४ सं० १७।९१)

त्रिधा हितम् (पद० १७।८५ सं० १७।९२) ।

[सुकृत शब्दस्वरविचारः]

[४१६] सुकृतं भूते ॥२।४५॥

सुकृत पदमाद्युदात्तं भूतकालवाचकं चेत् ।

पृथुः सुकृतः (पद० ७।३७ सं० ७।३९)

भूते किम्—

सुकृतं च मे (पद० १८।५ सं० १८।५)

अयं पुण्य वाचकः ।

[द्विरुदात्ताधिकारसूत्रम्]

[४१७] द्विरुदात्तानि ॥२।४६॥

अधिकारोऽयम् ।

[४१८] बृहस्पतिर्वनस्पतिर्न[2]राशंं.[3] सस्तनूनप्त्रे तनूनपान्नक्तोषासोषा-सानक्ता द्यावापृथिवी द्यावाक्षामा क्रतूदक्षाभ्यामेतवा अनन्वेतवा इति च ॥२।४७॥

चकारादु[4]त्तर सूत्राद[5]नामन्त्रितानी[6]त्यपकृष्यते । अनामन्त्रितानि बृहस्पतिरित्यादि द्वादशपदानि द्विरुदात्तानि भवन्ति[7] ।

१. घ ख.
२. नरा ज.
३. शमित्यादि सूत्रम् ज.
४. त् उ ख.
५. त् अ ख. ज.
६. नि अपकृष्यते ज.
७. ति ज.

अनामन्त्रितानि किम् —

तनू॑नपात्पथ॒ (पद० २९।२६ सं० २९।२६)

बृहस्पते अति (पद० १७।३७ सं० १७।४०)

वन॑स्पते वी॒ड्व॑ङ्ग॒ँ (पद० २९।५२ सं० २९।५२)

द्यावा॑पृथि॒वी उरो॑ (पद० ४।७ सं० ४।७)।

[अनामन्त्रित देवताद्वन्द्वपदानां द्विरुदात्तत्वम्]

[४१९] देवता द्वन्द्वानिचानामन्त्रितानि ।।२।४८।।

आमन्त्रितानि वर्जयित्वा देवताद्वन्द्ववाचकानि पदानि[२] द्विरुदात्तानि ।

अ॒ग्नी षोम॒ौ (पद० २।१५ सं० २।१५)

मि॒त्रावरु॑णौ (पद० २।३ सं० २।३)

'देवता' इति किम्—

दी॒क्षा॒त॒पसो॒ँ (पद० ४।२ सं० ४।२)

'अनामन्त्रितानि' किम्—

धे॒नुर्मि॑त्रावरुणा (पद० ७।१० सं० ७।९)।

[त्रीणि त्र्युदात्तपदानि]

[४२०] इन्द्रा बृहस्प[३]तिभ्यामिन्द्रा बृहस्पती इति त्रीणि ।।२।४९।।

अनयोः शब्दयोस्त्रीणि अ[४]क्षराण्यु[५]दात्तानिस्युः[६] ।

इन्द्रा॒बृह॒स्पतिभ्यां॑ त्वा दे॒वाव्य॒म् । (पद० ७।२२ सं० ७।२३)

इन्द्रा॒बृह॒स्पती॑ ऊ॒रुभ्या॑म् । (पद० २५।६ सं० २५।६)।

[सर्वोदात्तपदानि]

[४२१] सर्वमग्ना[७]३ ई लाजी॑३ञ्छाचीनिति त्रिमात्राणि च ।।२।५०।।

---

१. वीण्ड्वङ्गः क.

२. 'पदानि' नास्ति ज.

३. तीति सूत्रमेतावत् ज.

४. ण्य ख. ज.

५. णि उ ख.

६. इत उत्तरमुदाहरणानि न सन्ति ज.

७. ०' इत्येव सूत्रम् ज.

'अग्ना ३[1] ई' इत्यादिपदत्रयं सर्वमुदात्तं स्यात्। त्रिमात्रः[2] अस्ति येषु तानि त्रमात्राणि = त्रिमात्रस्वरविशिष्टानि, निपा[3]त्यन्ते।

अग्ना ३ ई (पद० ८।९ सं० ८।१०)

शाची ३ न् (पद० ८।१ सं० ८।१)

लाजी ३ न् (पद० २३।६ सं० २३।८)

[प्रणव स्वरः—उदात्तः]

[४२२] प्रणवश्च ॥२।५१॥

अयं च सर्वोदात्तः त्रिमात्रश्च स्यात्।

मादयन्ता[4]मों[5] ३ प्रतिष्ठ (पद० २।१३ सं० २।१३)

ॐ३क्र[6]तो (पद० ४०।१४ सं० ४०।१७)।

[प्लुतान्तस्यविवेशपदस्यसर्वानुदात्तत्वम्]

[४२३] विवेशा३ इति चानुदात्तम् ॥२।५२॥

'उत्तरं' 'पूर्वं' इत्युत्तरसूत्राभ्याम् (ज्यो. ४२४, ४२५ प्रा. २।५३-५४) अपकृष्यते। अव[7]साने विद्यमानमनुदात्तं विवेशा३ इति पूर्वं त्रिमात्रस्वरविशिष्टं निपात्यते।

विश्वम्भुवनमाविवे[8]शा३ (पद० २३।४४ सं० २३।४९)

उत्तरं किम्—

आविवेश का[9]न्यन्तः (पद० २३।४६ सं० २३।५१)

अनुदात्तं किम्—

येषु विश्वम्भुवनमाविवेश (पद० २३।४५ सं० २३।५०)

---

१. ३ न ख.

२. त्रिभागः घ.

३. या घ.

४. मादयन्ताम् न ख, ज.

५. मो घ.

६. ऋतो घ.

७. शा ज.

८. न क. घ.

९. 'कान्यन्तः इत्यारभ्य 'ये विवेश' इत्येतावान् पाठः नास्ति ज.

'हिरण्यगर्भं' (सं० २३ अ) इत्यध्याये 'विवेश' पदस्य चतुर्वारं[1] एकस्मिन् सन्दर्भेपठितत्वात्, पूर्वत्व[2]स्य सापेक्षत्वादध्यायस्थस्यैव प्लु[3]त[4]त्वम् । तेनान्यत्र—

अवंरां३ [5] आविंवेश[6] (पद० १७।१७ सं० १७।१७)

अभि[7]संविंवेश, (पद० ३२।११ सं० ३२।११)

इ[8]त्यादौ न ।

[विचारार्थकस्य द्वितीयस्य आसीत् पदस्य सर्वानुदात्तत्वम्]

[४२४] आसीदिति चोत्तरं विचारे ।।२।५३।।

विचारे वर्तमान[9] मवसानस्थं आसीदिति पदमनुदात्तं प्लु[10]तविशि[11]ष्टं निपात्यते ।

उपरिंस्विदासी३[12]त् । (पद० ३३।६५ सं० ३३।७४)

विचारे किम्—

सिंवत् कथासींत् (पद० १७।१८ सं० १७।१८)

❋ अन्तोदात्तपदाधिकारः ❋

[विचारार्थस्य प्रथमस्य आसीत् पदस्यान्तोदात्तत्वम्]

[४२५] पूर्वमन्तोदात्तम् ।।२।४४।।

विचारे वर्तमानं पूर्वं[13] मन्त्रमध्य[14]स्थं आसीत् इति पदमन्तोदात्तं स्यात् त्रिमात्रं च निपात्यते ।

---

१ वा ज.
२. × ज.
३. ह्लु ज.
४. तत्व घ.
५. रा २ ख. ज.
६. शे ज.
७. मी ज.
८. न घ.
९. मवसानमवस्थानस्थं ज.
१०. ह्लु ज.
११. सि ज.
१२. ३ न ख.
१३. वं ख. ज.
१४. ध्ये ज.

अ॒धः॒? स्वि॑दा॒सी३ त् । (पद० ३३।६५ सं० ३३।७४)

विचारे किम्—

अन्तोदात्त[2]म् इत्यधिकारः ।

कास्विंदासीत् (पद० २३।९ सं० २३।११)

[द्वन्द्वसमासे अन्तोदात्तस्थलानि]

[द्विरुदात्तत्वापवादः द्र० ४०३ सू०]

[४२६] द्वन्द्वं[3] चेन्द्रसोमपूर्वं पूषा[4]ग्निवायुषु ॥२।५५॥

पू[5]षादित्रिषु उत्तरपदभूतेषु इन्द्रसोमपूर्वपदकं द्वन्द्वम[6]न्तोदात्तं स्यात् ।

इ॒न्द्रापू॒ष्णो? (पद० २५।२३ सं० २५।२५)

इ॒न्द्रा[7]ग्नीतम (पद० २।१५ सं० २।१५)

इ॒न्द्र॒वा॒यु[8]भ्या॑म् (पद० ७।६ सं० ७।८)

सौ॑मौपौ॒ष्ण? (पद० २४।१ सं० २४।१)

[४२७] अग्निश्चेन्द्रे ॥२।५६॥

इन्द्रशब्दे उत्तरपदे सति अग्निपूर्वो द्वन्द्वः अन्तोदात्तः स्यात् ।

अ॒ग्नी॒न्द्राभ्या॑म् (पद० ७।३० सं० ७।३२)

[४२८] ऋक्सामिन च[9] ॥२।५७॥

सामशब्दे उत्तर[10]पदे[11]सति ऋक्पूर्वो[12] द्वन्द्वः अन्तोदात्तः स्यात् ।

ऋ॒क्सा॒म॒यो॑ शिल्पे[13] । (पद० ४।१ सं० ४।१)

---

१. ३ न ख.
२. त्ता घ.
३. द्वं घ., न्द्वे ज.
४. खा ज.
५. पु ज.
६. -अ ख.
७. न्द्रागी ज.
८. यू ज.
९. न क. घ., 'ऋक् च साम्नि' इति ज.
१०. रे क. ख.
११. 'पदे' न क. ख.
१२. र्वौ ज.
१३. 'शिल्पे' न ख. ज.

[यतः पदस्य स्वरविचारः]

[४२९] यतो गतौ ॥२।५८॥

यत इत्येतत्पदमन्तोदात्तं स्यात् गत्यर्थकं चेत् ।

स्वंर्ध्‌_तोधिया (पद० ११।२ सं० ११।३)

गतौकिम्—

यतो जात? (पद० २३।५६ सं० २३।६२)

[विशः पदस्य स्वरविचारः]

[४३०] पायोर्विशः ॥२।५९॥

पायुशब्दात् वि[1]शइत्यय[2]मन्तोदात्तः स्यात् ।

पायुर्विशः (पद० १३।१० सं० १३।११)

पायोः[3] किम्—

दैवीर्विशः (पद० १७।७९ सं० १७।८६)

[आयुशब्दस्य स्वरविचारः]

[४३१] आयुरर्य्यमोर्व[4]श्यस्तिभ्यः ॥२।६०॥

अर्यमादिभ्यः त्रि[5]भ्यः परः आयुशब्दः[6] अन्तोदात्तः स्यात्[7] ।

अर्य्‌_मायुरिन्द्रः[8] (पद० २५।२२ सं० २५।२४)

उर्वश्यं स्यायु? (पद० ५।२ सं० ५।२)

विधानसामर्थ्याद् व्यवधानेऽपि ।

कृष्णमस्ति । (पद० १५।५१ सं० १५।६२)

आयोष्ट्वा । (पद० १५।५२ सं० १५।६३)

---

१. विं ज.
२. तं अ० घ.
३. यो घ.
४. व ज.
५. न क. घ.
६. द्वो ख.
७. न क. घ. ज.
८. रिन्द्र न क. ख. घ. ज.

एभ्यः किम्—

आयु र्मे । (पद० १४।१३ सं० १४।१७)

[अस्य पदस्य स्वरविचारः]

[४३२] अस्यरोचना[1]सौ बौधा मे पारम् पुर एतारोदिवः कोऽहं त्वं महीं यईश ईशानेभ्यः ॥२।६१॥

रोचनादि द्वादशभ्यः परः अस्यशब्दोऽन्तोदात्तः स्यात्[2] ।

रोचनास्य (पद० ३।७ सं० ३।७)
अ[3]सावस्य पिता (पद० १०।१८ सं० १०।२०)
बोधा मे अस्य (पद० १२।३५ सं० १२।४२)
तमसस्पारमस्य (पद० १२।६४ सं० १२।७३)
पुरएतारो अस्य (पद० १७।१३ सं० १७।१४)
दिवो अस्य पृष्ठम् (पद० २३।५० सं० २३।५०)
को[4]ऽ अस्यव्वेद (पद० २३।५२ सं० २३।५९)
व्वेदाहमस्य (पद० २३।५३ सं० २३।६०)
त्वमस्यब न्ता (पद० ३४।५७ सं० ३४।५८)
महीमस्य स्तोत्रे (पद० ३३।२६ सं० ३३।२९)
यऽईशेऽअस्य (पद० २३।२ सं० २३।३)
[5]ईशानमस्य (पद० २७।३४ सं० २७।३५)

[४३३] प्रत्नां यज्ञस्य हविषः[6] पाहीत्पातं मध्वो यजमानस्य होतुरजरासो लोकेषु[7] च[8] ॥२।६२॥

प्रत्ना[9]मित्याद्येकादशसु अस्येत्यन्तोदात्तं स्यात् ।

अस्य प्रत्नाम् (पद० ३।१६ सं० ३।१६)
अस्य[10]य ज्ञस्योदृचः (पद० ४।९ सं० ४।९)
अस्य हविषत्क्मना (पद० ६।९ सं० ६।११)

---

१. सावित्यादि सूत्रमेतावत् ज.
२. 'स्यात्' न क. घ. ज.
३. 'असा''''पुर एतारो अस्य' पर्यन्तं केवलं ज. एव
४. करे घ.
५. इ ज.
६. ०इति 'सूत्रमेतावत् क.
७. लाकोषु घ.
८. न ख.
९. त्न ख.
१०. अस्य न. घ.

सु मनां अस्य पांहि (पद० २६।२२ सं० २६।२३)
अस्येदिन्द्रो'व्वावृधे (पद० ३३।८७ सं० ३३।९७)
अस्य पांतम्[१] (पद० ७।२९ सं० ७।३१)
अस्यमध्वं÷पि[२]बतम् (पद० ९।१७ सं० ९।१८)
अस्य यजमानस्य (पद० २२।२० सं० २२।२२)
अस्य होतु ÷ प्रदिशि[३] (पद० २९।३६ सं० २८।३६)
अस्याजरासः (पद० ३३।१ सं० ३३।१)
अस्यलोके सु तावंतः[४] (पद० ३५।१ सं० ३५।१)

[४३४] अनुदात्तमन्यत् ।।२।६३।।

उक्तपदादन्यत्[५] अस्येतिपद मनुदात्तम् ।
कत्यस्य विष्ठा[६]? (पद० २३।५० सं० २३।५७)
षडस्य विष्ठा?[७] (पद० २३।५१ सं० २३।५८)

[आख्यातस्य अनुदात्तत्वम्]

[४३५] अनुदात्तमाख्यातमामन्त्रितवत् ।।६।११।।

तिङन्त[८]मामन्त्रितवत् पदपूर्वमपादादौ विद्यमानं परस्प[९]रान्वितार्थकं चेदनुदात्तम् ।
पशून् पाहि (पद० १।१ सं० १।१)
हव्य ँ रक्ष (पद० १।४ सं० १।४)
पदपूर्वं किम्—
व्यन्तु व्वयं÷(पद० २।१६ सं० २।१६)
विदेदग्निः (पद० ५।९ सं० ५।९)
अपादादौ किम्—
अरांतीः सहस्वा (पद० १२।८० सं० १२।९९)
परस्प[१०]रान्वितार्थकं किम्—
विंष्णो पाहि पाहि यज्ञम् (पद० २।६ सं० २।६)

---

१. 'अस्य' पातमित्यनन्तरं 'अस्य यन्ता' क. ख. घ. ज
२. पिबता न ख. ज.
३. 'प्रदिशि' नास्ति ख.
४. 'सुतावतः' नास्ति ख. ज.
५. उक्तपदादन्यपदस्येति क., उक्तपदान्यस्येति घ., उक्तादन्यत ज.
६. विष्ठाः नास्ति ख. ज.
७. विष्ठाः नास्ति ख.
८. त ख.
९. स्य अ ज.
१०. स्य अ ज.

[उपसर्गसङ्ख्यानम्]

[४३६] परोपापावप्रतिपर्यन्वप्यत्यध्याङ्प्रसन्निर्दुरुन्निविस्वभि ।६।२४।।

परा, उप, अप[1], अव, प्रति, परि, अनु, अपि, अति, अधि, आङ्, प्र, सम्, निर्, दुर्, उत्, नि, वि, सु, अभि-एते विंशतिरुपसर्गाः ।

तथा चोक्तम्—

विंशतेरुपसर्गाणामुच्चाएकाक्षरानव ।

आद्युदात्ता दशैतेषामन्तोदात्तस्त्व[2]भिस्त्वयम् ।। [उव्वटभाष्ये प्रा० ६।२४]

[उपसर्गस्वरविचारः]

[४३७] उपसर्ग उपसर्गे ।६।२।।

उपसर्ग उपसर्गे परे अनुदात्तः स्या[3]त् ।

सुम्प्रच्यवध्वम् (पद० १५।४८ सं० १५।५३)

सुम्प्रयात (पद० १५।४८ सं० १५।५३)

[द्विरुच्चारितोपसर्गस्वरविचारः]

[४३८] आम्रेडिते चोत्तरः ।।६।३।।

द्विरुच्चारणेप[4]र उपसर्गोऽनुदात्तः ।

प्रप्रंय्ज्ञपतिम् (पद० ५।३८ सं० ५।४१)

सᳪसमित् (पद० १५।२६ सं० १५।३०)

[कृदन्ताऽख्यातपरोपसर्गस्वरविचारः]

[४३९] कृदाख्यातयोश्चोदात्तयोः ।।६।४।।

उदात्तः अस्ति ययोः = उदात्तवति कृदन्ते, उदात्तवति आख्याते च परे उपसर्गोऽनुदात्तः स्या[5]त् ।

विभ्रा[6]जमानः (पद० १५।४७ सं० १५।५२)

सुम्भरन्ति (पद० २५।२७ सं० २५।२९)

---

१. पा ज.

२. म क., स्भीत्ययम् घ.

३. 'स्यात्' ज. एव

४. 'पर' न क. घ.

५. 'स्यात्' न घ.

६. भा ज.

उदात्तयोः किम्—

उत्पु॑नामि (पद० १।१२ सं० १।१२)

अवं॑धूतम् (पद० १।१४ सं० १।१४)

[आख्यातपरस्य एकाक्षरस्य अभेरुपसर्गस्य च स्वरविचारः]

[४४०] नाभ्येकाक्षरश्चस्वरे सन्धे॑येऽकृति ॥६।५॥

अभिरेकाक्षरश्चोपसर्गः[2] स्व[3]रात्मके उ[4]पसर्गे उपसर्गेण सन्धिमति कृदन्तभिन्ने परे अनुदात्तो[5] न[6] स्यात् ।

अ॒भ्याद॑धामि[7] ।पद० २०।१९ सं० २०।२४)

अ॒भ्यषि॑ञ्चन् (पद० १०।१ सं० १०।१)

व्याक॑रोत् (पद० १९।७५ सं० १९।७७)

न्यसी॑दत् पि॒ता (पद० १७।१६ सं० १७।१७)

व्यद॑धु॒ (पद० ३१।१० सं० ३१।१०)

अकृति किम्—

ए[8]ज्या॒ इषं॑ ÷ (पद० २१।४३ सं० २१।४७)

["आ"उपसर्गस्य स्वरविचारः]

[४४१] आ पूतजातयोः ॥६।६॥

'आ' इत्ययमुपसर्गः पूतजातयोः परयो[9]रनुदात्तो न स्यात् ।

आपू॒त? (पद० ४।२ सं० ४।२)

आजा॒त? (पद० १२।१३ सं० १२।१३)

---

१. न्भ्ये क.

२. र्गे ख.

३. 'स्वरात्परे' इति क. घ.

४. 'उपसर्गे' न क. घ.

५. त्तः ख.

६. 'न' नास्ति ख.

७. नि घ., 'अभिरेकाक्षर' इत्यारभ्य 'अभ्यादधामि' इति पर्यन्तं द्विरुक्तिः क.

८. पू घ.,—'रात्र्या इव' ज.

९. 'परयोः' न ज.

[अधि-नि-प्र-प्रत्युपसर्गाणां पदविशेषे परे स्वरविचारः]

[४४२] अधि-नि-प्र-प्रति-श्रिता-त्रिणं[1]-भानवः[2] पचतेषु ।६।७।।

अधीत्यादयश्चत्वारः यथासंख्यं श्रिता[3]दिषु चतुर्षु नानुदात्ताः ।

अधिश्रिताः (पद० २०।२६ सं० २०।३२)

विश्वं[4] न्यत्रिणंम् (पद० १७।१५ सं० १७।१६)

प्रभानवं? सिस्रते (पद० १५।२१ सं० १५।२४)

प्रतिपचताग्[5]भीषत (पद० २१।५६ सं० २१।६०)

['अनु' उपसर्गस्य पदविशेषपरकत्वे स्वरविचारः]

[४४३] उज्जेषमावर्त्तं आपनीफण[6]त् सनिष्यदत् संवतं प्रयाणं सञ्चरन्तं सं[7]रमध्वं प्र[8]सितिं विक्रमस्वेत्येते[9]ष्वनु ।६।८।।

उज्जेषमित्यादि[10] दशसु अनुः[11] अनुदात्तो न ।

अनू[12]ज्जे॑षम् (पद० २।१५ सं० २।१५)

अन्वावर्त्ते (पद० २।२७ सं० २।२७)

अन्वापनी॑फणत् (पद० ९।१३ सं० ९।१४)

अनु॑स॒ꣳसनिंष्यदत् (पद० ९।१३ सं० ९।१४)

अनु॑सं॒वतंम् (पद० ११।१० सं० ११।१२)

अनु॑प्रयाणंम् (पद० १२।३ सं० १२।३)

अनु॑सञ्चरंन्तम् (पद० १३।४ सं० १३।५)

---

१. ण घ.
२. व क. घ. ज.
३. त घ.
४. श्वा क. घ.
५. ग्र घ.
६. —दिति सूत्रमेतावत् ज.
७. संभ ख.
८. 'प्रसिति' नास्ति घ.
९. ते नास्ति ख.
१०. षु ज.
११. अनु ख.
१२. नु ज., त्र क.

अनु सꣳरभध्वम् (पद० १७।३५ सं० १७।३८)

अनु प्रसितिम् (पद० १३।८ सं० १३।९)

अनु विक्रमस्व (पद० १२।५ सं० १२।५)

[उपसर्गं उपसर्गे इत्यस्यापवादप्रकरणम्]

[प्रोपसर्गपरयोः 'आ' 'उप' उपसर्गयोः स्वरविचारः]

[४४४] ओप प्रोदात्ते ॥६।९॥

'आ' 'उप' एतौ उदात्ते प्रशब्दे नानुदात्तौ ।

आप्रयच्छ (पद० ५।१९ सं० ५।१९]

उ[1]प प्रयाहि (पद० १५।४७ सं० १५।५२)

उ[2]प प्रागात् (पद० २९।२३ सं० २९।२३)

[परिगणितस्थलेषु उपसर्गसमुदाये स्वरविचारः]

[४४५] अभिप्रेह्यु[3]पसंप्रयात प्रत्यातनुष्वासुषाव ॥६।१०॥

अभिप्रेहीत्यादी[4]नि चत्वारि निपात्यन्ते ।

[5]अभिप्रेहि (पद० १७।४१ सं० १७।४४)

उपसं प्रयातम् (पद० १५।४८ सं० १५।५३)

प्रत्यातनुष्व (पद० १३।११ सं० १३।१२)

आसु षाव (पद० १९।२ सं० १९।२)

[आख्यातस्य प्रकृतिस्वरप्रकरणम्]

[आख्यातपूर्वाख्यात स्वरविचारः]

[४४६] प्रकृत्याख्यातमाख्यातपूर्वम् ॥६।११॥

नानुदात्तम् ।

पिबन्तु मदन्तु व्यन्तु हो[6]तर्यज (पद० २१।३९ सं० २१।४२)

---

१. नेदमुदाहरणं क. ख. घ. ज.

२ नेदमुदाहरणं क. घ.

३. ह्यु ज.

४. अभिप्रेहीत्यादि क. ख. घ.

५. उदाहरणानि न क. घ

६. 'होतर्यज' नास्ति क. ख. ज.

[उदात्तामन्त्रितपूर्वस्याख्यातस्य प्रकृतिस्वरविधानम्]

[४४७] उदात्ताच्चामन्त्रितादनन्तरम्[1] ॥६।१२॥

उदात्तं[2] अस्ति यस्मिन्नुदात्तवतः[3] आमन्त्रितात्परम् आख्यातं नानुदात्तम् ।

अग्ने॒ पवस्व॒ (पद० ८।३३ सं० ८।३८)

होत॒ र्व[4]जं (पद० २१।२९ सं० २१।२९)

[४४८] एकान्तरादपि ॥६।१३॥

ए[5]कपदान्तरितादपि उदात्तवतः आमन्त्रितात्परम् आख्यातं नानुदात्तम् ।

ब्रह्म॒न्नश्वं[6] भ॒[7]न्त्स्यामि (पद० २२।४ सं० २२।४)

अपि शब्दात् क्वचिदनुदात्तम् ।

इन्द्रायाहि (पद० २०।७८ सं० २०।८७)

एत[8]न्निर्णये सम्प्रदाय एव शरणम् ।

[यद्वृत्तसंबद्धाख्यातस्वरविधानम्]

[४४९] यद्वृत्तोपपदाच्च ॥६।१४॥

च:[9] अप्यर्थे । यदा यच्छब्देन वृत्तं = सम्पादितं यं[10] यत् यदि यतः यत्र यथा ये इत्यादि सर्वविभक्त्यन्तं य[11]द्वृत्तं तद्[12] उपपदं अ[13]र्थतः सम्बद्धं येन पदेन तस्मादपि परम् आख्यातं नानुदात्तम् । अपिना यद्वृत्तादपि ।

यमा॒हुः (पद० १५।४४ सं० १५।४९)

---

१. 'तादनन्तरम्' इत्येव सूत्रं घ.
२. त्तः ज.
३. त् घ.
४. षर्जं ज.
५. रा घ.
६. स्वं ज.
७. भन्त्स्यामि क., भर्नस्यामि घ.
८. तं ज.
९. च क.
१०. 'यं' न क. घ.
११. 'यद्वृत्तं' न ज.
१२. त् ख.
१३. अर्थतः ज. एव.

यत्राऽऋषयो जु[1]ग्मुः (पद० १८।५४ सं० १८।५८)
य[2]तो जा[3]तोऽ अरो[4]चथाः (पद० ३।१४ सं० ३।१४)
यथा समुद्र ए[4]जति (पद० ८।२७ सं० ८।२८)
य उपरास ईयुः (पद० १९।६६ सं० १९।६८)
दूरस्थस्यापि अर्थतः[5] सम्बन्धो ग्राह्यः।

तथा चोक्तम्—

"यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य तत्।
अर्थतो ह्य[6]समर्था[7]नामानन्तर्य[8]म[9]कारणम्।"[10]

[उव्वट भाष्ये ६।१४]

[हिशब्दसन्निहिताख्यातस्वरविधानम्]

[४५०] हेश्च ।।६।१५।।

हिशब्दादुत्तरमाख्यातं नानुदात्तम्।

आपोहिष्ठा[11] (पद० ११।४७ सं० ११।५०)

[४५१] उत्तरेऽपि ।।६।१६।।

हि[12]शब्दे[13]परे च[14] आख्यातं नानुदात्तम्।

वामु शन्तिहि (पद० ७७ सं० ७८)

---

१. य ज.
२. या ज.
३. यातो ज.
४. रा ज.
५. तो क.
६. स्व क.
७. 'समानानाम्' ख. ज.
८. यं ख. ज.
९. 'न कारणम्' ख. ज.
१०. ।।३।। ख.
११. ष्ठ क.
१२. पि ख.
१३. 'शब्दे च' ज.
१४. नास्ति ज.

[नेत्पदपूर्वाख्यातस्वरविधानम्]

[४५२] नेत् ॥६।१७॥

अस्मान्निपातसमुदायात्परमाख्यातं नानुदात्तम् ।

नेत्त्वदंपचे तयांतै'[1] (पद० २।१७ सं० २।१७)

[समनसः पूर्वाख्यातस्वरविधानम्]

[४५३] समनसस्करत् ॥६।१८॥

समनस इत्यस्मात्परं क[2]रदिति आख्यातं नानुदात्तम् ।

असुपत्ना? समनसस्करत् (पद० ७।२४ सं० ७।२५)

[समुच्चयार्थस्थले पूर्वाख्यातस्वरविधानम्]

[४५४] द्वयोः पूर्वं समुच्चये ॥६।१९॥

द्वयोराख्यातयोः समुच्चयेवर्तमानयोः पूर्वं नानुदात्तम् ।

शर्मं चस्थोवर्मं चस्थ६ (पद० ११।२७ सं० ११।३७)

शं[3] चं वक्ष्व[4]परिंचव्वक्ष्व (पद० ८।२२ सं० ८।२६)

समुच्चये किम्—

तं तु[5]मिद्धंतं व[6]ज्रेणतं तमिद्धंतम् (पद० ८।४७ सं० ८।५३)

॥ इति प्रकृतिस्वराः ॥

❀ पदपाठप्रकरणम् ❀

[पदसंज्ञासूत्रम्]

[४५५] अर्थः पदम् ॥३।२॥

अर्थः अस्ति यस्मिन् = अर्थवाचकः अक्षरसमुदायोऽक्षरं वा पदं स्यात् ।

एष? (पद० २।१७ सं० २।१७)

स? (पद० १।६ सं० १।६)

---

१. तौ घ.

२. 'करदिति' नास्ति ख.

३. सं ज.

४. क्ष्य घ.

५. 'तमिद्धं' घ.

६. 'वज्रेण' घ

तत् (पद० १।५ सं० १।५)

उत् (पद० १।१२ सं० १।१२)

त्वा (पद० १।१ सं० १।१)

आ (पद० १।४ सं० १।४)

अवतु (पद० १०।१० सं० १०।१०)

[४५६] तच्चतुर्धा ॥८।४८॥

तत्पदं चतुः प्र[1]कारं स्यात् ।

उक्तञ्च—

[४५७] क्रियावाचकमाख्यातमुपसर्गोविशेषकृत् ॥
सत्वाभिधायकं नाम निपातः[2] पादपूरणः[3] ॥८।५६॥

अ[4]र्पयतु (पद० १।१ सं० १।१)

प्राहि (पद० १।१ सं० १।१)

इत्यादि आख्यातम् ।

परा (पद० ३।४९ सं० ३।४९)

उप[5] (पद० १।५ सं० १।५)

इत्यादयो विंशतिरूपसर्गाः (ज्यो० ४।२६ प्रा० ६।२४) ।

देवः (पद० १।१ सं० १।१)

सविता (पद० १।१ सं० १।१)

इत्यादीनि नामानि ।

वा (पद० ५।१९ सं० ५।१९)

च (पद० १।२५ सं० १।२५)

उत (पद० ३।२५ सं० ३।२५)

उत् (पद० १।१२ सं० १।१२)

इत्यादयो निपाताः ।

---

१. प्रकारकं ज.

२. ताः ख.

३. णाः ख.

४. 'अपर्यंतु' घ.

५. पा ज.

[पदपाठस्वरूपनिरूपणम्]

[४५८] पदविच्छेदोऽसंहितः ।।१।१५६।।

पदे पदे विच्छेदे विलम्बेनो[1]च्चारणम् असंहितः = न संहिता यस्मिन्, सः पदपाठः स्यात् ।

[संदिग्धपदनिर्णयप्रकरणम्]

[विसर्गान्तस्वरान्तपदसंदेहनिर्णयप्रकरणम्]

घिसंज्ञकेषु विसर्गस्य लोपाद् विसर्गान्तत्व स्वरान्तत्व निर्ण[2]यार्थं संदिग्धानि लिख्यन्ते—

[४५९] [3]विश्वा ऊष्मान्तं, परिद्विषस्-त्वं-त्वां-यदजयो-विराजत्य-निरा-अवीवृधन्-परिष्ठाः सुक्षितयऽ-आशाऽ-ओषधी-राभा-ह्यमीवा-हिमायास्-ते-ऽसीत्येतेषु ।।४।२६।।

विश्वापदम्—

यदजंयुः (पद० १९।६९ सं० १९।७१)

विरांजति (सं० २०।८६ पद० २०।७७)

इति पद[4]द्वये ऊष्मान्तम् । ऊ[5]ष्मा विसर्गः ।

अन्यत्रस्वरान्तम्—

वि[6]श्वां रूपाणि (सं० १२।३ पद० १२।३)

[४६०] पृथिव्या स्वरान्तं सम्भवः शुक्रो मन्थी पृथिवी परोदेवेभिरित्येतेषु ।।४।२७।।

पृथिव्यापदं सम्भवादिषु[7] स्वरान्तमन्यत्रोष्मान्तम्—

पृथिव्याम्त्रं (सं० ४।१ पद० ४।१)

---

१. ना घ; विरम्योच्चारणमिति पाठो युक्तः ।

२. निर्पायार्थं क. घ.

३ स्थान द्वये ज. अनुचितमेतत् ।

४. नास्ति पदपद्वयम् ज.

५. नोदाहरणम् ज.

६. विश्वा ऊष्मा''''इत्यारभ्य 'हिन्वन्तु' (ज्यो० ४६२) इत्यन्तः पाठः घ पुस्तके नास्ति । ग. ज. पुस्तके तावत्पर्यन्तं सूत्राणि न सन्ति केवलं वृत्तिः ।

७. मन्थोत्यस्मिन् ख. ग. घ.

[४६१] च विश्वावोब्रह्मविश्वाहरीयुक्तास्ते शफानां जजान नु कमित्यये तेष्विमा ।।४।२८।।

इमा पदं[1] च, विश्वाः, वः, ब्रह्म, विश्वा, हरि[2], युक्ता[3], जजान, नु, कम्, इति[4] स्वरान्तम्, अन्यत्रविसर्गन्तिम्—

इमा रुद्राय (सं० १६।४८ पद० १६।४८)

[४६२] विष्णो-ते-बभूव-नासत्त्या-भिषजा-नऽ आवोढं-यादेवा-हविषो-नोमृडातो-नोऽ अच्छ-विमुञ्चेत्त्येतेषु ता ।।४।३०।।

विष्णो ते[5] । बभूव । नासत्त्या । भिषजा[6] । न[7] आवोढ[8]म् । यादेवा[9] । हविषा[10] । नोमृडातः । नो अच्छ । विमु[11]ञ्च । इत्येतेषु दशसु 'ता' इति स्वरान्तम्, अन्यत्रोष्मान्तम्—

ता? । नः[12] । हिन्वन्तु (सं० ६।२४ पद० ६।२२)

['दा' शब्दस्य विसर्गान्तत्वस्वरान्तत्वनिर्णयः]

[४६३] हविर्दम्पत्योः साध्यादा ।।४।३२।।

इति यथासंख्यं स्वरान्ते ।

या[13]हि साध्याहविरंदन्तु (पद० २९।११ सं० २९।११)

यदाशीर्दादम्पती (पद० ८।४ सं० ८।५)

अन्यत्रविसर्गान्ते ।

आशीर्दावसुभिः (पद० १८।५२ सं० १८।५६)

१. द ज.

२. री ज.

३. क्ताः ज.

४. इति सप्तसु घ. ख.

५. ते नास्ति घ.

६. जाम् ज.

७. तः ज.

८. ढ घ. ख

९. वाः ज.

१०. षः ज.

११. विमञ्च ज.

१२. नुः ज.

१३. इमे उदाहरणे न क. घ. ज.

[धिष्ण्याशब्दस्य विसर्गान्तत्व स्वरान्तत्वनिर्णयः]

[४६४] धिष्ण्या वरिवोविदं धिष्ण्या युवमिति च[1] ॥४।३३॥

वरिवोविदं युवमित्यनयोः प[2]रयोर्धिष्ण्या स्वरान्तम्, अन्यत्रविसर्गान्तम्—
धि[3]ष्ण्याः॑ ये (सं० १२।४९ पद० १२।४२)

[मर्तमर्त्यशब्दस्थलनिर्णयः]

[४६५] मर्तो वुरीत, मर्त्तेष्वग्निः, परोमर्तं, स्ते मर्तं इति च ॥४।१६१॥

एतेषु चतुर्षु मर्तशब्दः अयकारः । अन्यत्र—
मर्त्यं÷ (पद० ३३।७७ सं० ३३।८७)

॥ इति पदपाठप्रकरणम् ॥

[अवग्रहपदेषु क्रमातिदेशः]

[४६६] क्रमोक्तावृत्तिः पदेषु ॥४।२०॥

क्रमप्रकरणे उक्ता आवृत्तिः पदपाठे स्याद[4]वसानव[5]र्जम् ।
तद्यथा—
'पू[6]र्वस्योत्तरसंहितस्य स्थितोपस्थितमवगृह्यस्य'[7] (ज्यो० ५४२ प्रा० ४।१८९)
'अन्तःपददीर्घी[8]भावे' (ज्यो० ५०८ प्रा० ४।१९२)
'विनामे' (ज्यो० ५०९ प्रा० ४।१९३)
'प्रगृह्ये'[9] (ज्यो० ५१० प्रा० ४।१९४)
'रिफिते नि[10]रुक्ते' (ज्यो० ३।१३ प्रा० ४।१९५)

त[11]त्र अवग्रहवतः पदस्य स्थितोपस्थितं स्यात् । ये विधयः स्थितोपस्थिते न

---

१. नास्ति ज.
२. 'परयो' न क. घ.
३. 'धिष्ण्या ये' न क. घ.
४. त् अ ख ज.
५. वंर्जम् ज.
६. पू०....स्य नास्ति ख. ज.
७. स्यः ज.
८. घी क.
९. स्वे क.
१०. द्वि घ., रि. क.
११. अ घ.

भवन्ति ते तत्प्रकरणे[1] एव दर्शि[2]ताः ।

कुत्र अवग्रहः कर्तव्यस्तदाह—

[अवग्रहप्रकरणम्]

[समासावग्रहविधानम्]

[४६७] समासेऽवग्रहो ह्रस्वसमकालः ॥५।१॥

समास इत्यधिकारः ।

[3]समासे अ[4]वग्रहः ह्रस्वसमकालः = एकमात्राकालो विरामः स्यात् ।

स च चर्चायां प्रदर्शनीयः सम्प्रदायात् ।

अन्तं पार्श्व्यमित्यन्तं । पार्श्व्यम् (पद० ३९।९)

अनु रूपऽइत्यनु । रूपं (पद० १९।२२ सं० १९।२४)

व्र[5]तपतऽ इति व्रत । पते (पद० १।५ सं० १।५)

पु रोगाऽ इति पुरं । गां (पद० ८।४३ सं० ८।४९)

मणिवालऽ इति मणि । व्वा[6]लं ÷ (पद० २४।३ सं० २४।३)

ऋवसामाभ्यामित्यृक् । सामाभ्याम् (पद० ४।१ सं० ४।१)

'अवग्रह' इत्यधिकारः ।

[तरतमयोरवग्रहविधानम्]

[४६८] तरतमयोश्चातिशये[7]ऽदक्षिणप्रत्यासङ्गे[8] ॥५।२॥

समासाभावादा[9]रम्भः । अतिशये विद्यमानयोस्तरतमयोः परयोरवग्रहः स्यात् । दक्षिणशब्दः[10]प्रतियोगी[11] न चेत् ।

---

१. ण ज.

२. शि ज.

३. समा····ल नास्ति क. घ.

४. अ····ल न ज.

५. 'प्रतयत' घ

६. बा. ज.

७. यो ज.

८. क्ते ख., सक्ते (संगे) ज.

९. दम्भः क.

१०. द्वं ज.

११. गो ज.

पू णंतंर्‌मिति' पू णंतंरम् (सं० १८।१० पद० १८।१०)

पप्रितममिति पप्रितमम् (सं० १।८ पद० १।८)

अदक्षिणे[1]त्यादि किम्—

द्यावांपृथिव्योर्द[2]क्षिणं पार्श्वम्[3] विश्वे'षां दे वानामुत्तंरम् ।(सं० २५।५ पद० २५।५)

इत्यत्र उत्तरमित्येव ।

अतिशये किम्—

कारोतर? (सं० १९।१६ पद० १९।१४)

[समस्ततमान्तशब्देसमासनियमेन शब्दकृतोऽवग्रहो न तमकृत इति विधानम्]

[४६९] वीतमहूतमसूतम गोपातमरत्नधातमवसुधातमाः पूर्वेण ।।५।३।।

एतेशब्दाः पूर्वेणाव[4]गृह्यन्ते ।

दे ववीतंममिति'देव । व्वीतंमः (सं० ११।३७ पद० ११।३४)

दे वहूतंममिति'देव । हूतंमम् (सं० १।८ पद० १।८)

सु [5]सूतंम मिति' सु । सूतंमम्[6] (सं० ६।३० पद० ६।२८)

सु गोपातंम इति' सु । गोपातंमः (सं० ८।३१ पद० ८।२६)

रत्नधातममिति रत्न । धातमम्[7] ।

वसु धातंमइति' वसु । धातंम[8] (सं० २७।१५ पद० २७।१४)

[पूर्वपदावग्रहस्थलम्]

[४७०] सर्पदेवजनेभ्य ।।५।४।।

इदञ्च पूर्वेणावगृह्यते ।

सर्प दे वजनेभ्य इति' सर्प । देवजनेभ्यः (पद० ३०।६ सं० ३०।८)

---

१. णो घ.

२. द ज.

३. श्वं ज.

४. य घ.

५. स घ.

६. नास्ति क.

७. एतदुदाहरणं माध्यन्दिनीयसंहितायां न दृश्यत इति स्थल सङ्केतो न दत्तः । ऋग्वेदे १।१।१ इत्यत्र तु पदमेतदुपलभ्यत एव ।

८. म घ.

[उत्तरपदावग्रहस्थलनिर्देशः]

[४७१] तूणवध्ममुत्तरेण ॥५।५॥

इदमुत्तरेणावगृह्यते ।[1]

तू ण॒ऽव॒ध्ममिति॑ तूणव॒ध्मम् (पद० ३०।१८ सं० ३०।२०)

[४७२] रायस्पोषदे विजावेति च ॥५।६॥

एते[2] पदे[3] उत्तरेणावगृह्यें॑ते ।

रा॒य॒स्पो॒ष॒द इति॑ रायस्पोष॒ । दे (पद० ५।१ सं० ५।१)

वि॒जावेति॑ वि॒जा । वा॑ (पद० १२।४४ सं० १२।५१)

[समासबहुत्वस्थले उत्तरकालिकसमासेनावग्रहविधानम्]

[४७३] बहु प्रकृतावागन्तुना पर्वणा[5] ॥५।७॥

बहुपदसमासे प[6]श्चात् कालिकेन पदेना[7]वग्रहः स्यात् ।

प्र॒जाप॑ति॒रिति॑ प्र॒जा । प॑तिः (पद० ३१।१९ सं० ३१।१९)

सु प्र॒जा इति॑ सु । प्र॒जा? (पद० ३।३७ सं० ३।३७)

[मत्वर्थीयपदे वत्पदान्तघटितपदे चावग्रहविधानम्]

[४७४] तद्वति तद्धिते न्यायसꣳहितं चेत् ॥५।८॥

वती[8]ति तन्त्रेणद्विरुच्चारितम् । तत् अस्ति यस्मिन् सः[9] त[10]द्वान्, तस्मिन् = मत्वर्थेविद्यमाने तद्धितेवति प्रत्यये च परे अवग्रहः स्यात्, शास्त्रोक्तसन्धिमत्प[11]दं चेत् ।

मधु॑म॒[12]दिति॒ मधु॑ । मत् (पद० १३।२६ सं० १३।२८)

---

१. तूणवध्ममित्यारभ्य 'उत्तरेणावगृह्यते' पर्यन्तं क. नास्ति,

२. इमे ज.

३. च ख., पदे नास्ति ज.

४. ह्य ज.

५. णः घ.

६ पा ज.

७. न अ ख.

८. र्ता घ.

९. त्स. ज.

१०. 'तद्वान्' नास्ति क. घ., 'तद्वां' ज.

११. 'त्ये' ज.

१२. र्मा घ.

सं_वर्तमिति सुम् । वर्तम् (पद० ११।१० सं० ११।१२)

न्यायसंहितं किम्—

मरुत्वान् (सं० ७।३८ पद० ७।३६)

'स्पर्शोऽपंचम' (ज्यो० २०८ प्रा० ४।११९) इति तृतीयः[1] न्या[2]यसिद्धोऽपि नकृतः अतो न भवति ।

[शस्-त्वं-त्र-ताति-प्रत्ययेष्ववग्रहविधानम्]

[४७५] शस्-त्वं-त्रा-तातिषु च ॥५।९॥

शस् त्वं[3] इत्यादिषु[4] चतुर्षु अवग्रहः स्यात् ।

ऋतुशऽइत्यृतु । शः (पद० २३।५० सं० २३।५७)

अमृतत्वमित्यमृत । त्वम् (पद० ३३।५४ पद० ३३।४९)

देवत्रेति देव । त्रा (पद० ६।१८ सं० ६।२०)

ज्येष्ठतातिमिति ज्येष्ठ । तातिम् (पद० ७।११ सं० ७।१२)

[धातुसंज्ञापादकयकारप्रत्ययस्थलेऽवग्रहविधानम्]

[४७६] धात्वर्थे य[5]कारे स्वरपूर्वे ॥५।१०॥

धातुसंज्ञा नि[6]मित्तभूतो यकारः क्यजादिः[7] स्वरपूर्वे तस्मिन् परे अवग्रहः स्यात् ।

वृष[8]यमाण ऽ इति वृषयमाणः (पद० २०।३९ सं० २०।४६)

धात्वर्थे किम्—

जायमानः (सं० २९।१२ पद० २९।१२)

[भूतकालिकार्थकक्सुप्रत्ययेऽवग्रहविधानम्]

[४७७] वा ॐ सौ च भूतकाले स्वरेण ह्रस्वादनुषि ॥५।११॥

---

१. 'तृतीयः' ज. एव.

२. शास्त्र ख. ज.

३. नास्ति क. घ. ज.

४. 'षु' ज. एव.

५. य नास्ति ख.

६. नि नास्ति घ.

७. दि घ.

८. वृषायमाण क., 'वषर्यमाण' घ.

स्वरेण इ[1]ति तृतीया पञ्चम्यर्थे। ह्रस्वस्वरात्परभूते वांस :ब्दे भूतकालार्थे परे अवग्रहः स्यात्। स[2] उ[3]ष्रूप[4]भू[5]तो वां[6]सशब्दो न चेत्।

जु[7]क्षिवा ꣳ सु इतिं जु[8]क्षि। वा ꣳ सं꣡ (सं० ८।१९ पद० ८।१६)

सुसृवा[9] ꣳ सु इतिं ससृवा ꣳ सं÷ (पद० ९।१८ सं० ९।१९)

स्वरेण किम्—

चिकित्वान्[10] (पद० ११।३२ सं० ११।३५)

ह्रस्वात् किम्—

जि[11]गीवाꣳसः। (अ[12]न्यशाखीयम्)।

भूतकाले किम्—

सुविंद्वा ꣳ सु इति सु। विंद्वा ꣳ स꣡ (सं० १७।६८ पद० १७।६३)

अनुषि किम्—

तस्थुषं÷ (पद० ७।४२ सं० ७।४२)

[थाल्प्रत्ययेऽवग्रहविधानम्]

[४७८] प्रत्न-पूर्व-विश्वे-म-तु[13]-म्य-स्था ।।५।१२।।

एभ्यः पञ्चभ्यः[14] 'था'प्रत्यये अवग्रहः स्यात्।

प्रत्नथेतिं प्रत्न थां (पद० ७।११ सं० ७।१२)

पूर्वथेतिं पू र्वथां (पद० ७।११ सं० ७।१२)

---

१. 'इति' ज एव.
२. 'स' ज एव.
३. 'उष्' इत्यारभ्य 'न चेत्' पर्यन्तं न क.
४. पो ज.
५. 'भूतो' नास्ति ख. ज.
६. 'वांस शब्दो' एतत्पदं नास्ति ख. ज.
७. प क.
८. प क.
९. 'वास' इति 'ससृ' इत्यधिकं क.
१०. तु ज.
११. अन्यशाखीयम्। जिगीवा ꣳसः क. घ.
१२. ज. नास्त्येतत्पदम्।
१३. तु ज.
१४. म्य ज.

विश्वथेति विश्व । थां (पद० ७।११ सं० ७।१२)

इ[1]मथेति इम । थां (पद० ७।११ सं० ७।१२)

ऋतुथेत्यृतु । था (पद० २०।५८ सं० २०।६५)

[ह्रस्वस्वर-व्यञ्जनपूर्वभकारादिविभक्तिस्थलेऽवग्रहविधानम्]

[४७९] ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यये ।।५।१३।।

ह्रस्वाद् व्यञ्ज[2]नाच्चपरे भकारादौ विभक्तिसं[3]ज्ञके प्रत्यये प[4]रे अवग्रहः स्यात्।

रथिभ्य इति रथि । भ्यः (पद० १६।२६ सं० १६।२६)

अ[5]ग्निभिरित्यग्नि । भिः ।

धावद्भ्य इति धावत् । भ्यः (पद० १६।२२ सं० १६।२३)

तक्षभ्य इति तक्ष । भ्यः (पद० १६।२६ सं० १६।२७)

समिद्भिरि[6]ति समित् । भिः (पद० ३।३ सं० ३।३)

ह्रस्वेत्यादि किम्—

व्रा[7]तेभ्यः (पद० १६।२५ सं० १६।२५)

पत्नीभ्यः (पद० २४।५ सं० २२।५)

वि[8]भक्तीति किम्—

गर्दभ? (पद० २४।४० सं० २४।४०)

[ह्रस्वस्वरव्यञ्जनपूर्वं सप्तमीबहुवचनविभक्तिस्थलेऽवग्रहविचारः]

[४८०] स्विति चानतौ ।।५।१४।।

ह्रस्वव्यञ्जनाभ्यां अकृतषत्वे 'सु' इति विभक्तिप्रत्यये परे अवग्रहः स्यात् ।

हृत्स्विति हृत् । सु (पद० १७।४१ सं० १७।४४)

अप्स्वित्यप् । सु (पद० १२।३१ सं० १२।३६)

धामस्विति धाम । सु (पद० १२।१०८ सं० १२।११७)

---

१. इमथेप्रीम । था

२. 'व्यजनाच्च' ज.

३. 'संज्ञे' ख. ज.

४. 'परे' न ज.

५. अग्निरित्यग्नि । भिः क. घ. उदाहरणमेतन्माध्यन्दिनोयसंहितायां नोपलभ्यते ।

६. रति क.

७. प्रा घ.

८. विभक्ति प्रत्यये किम् ज.

अन्तौ किम्—

अग्निषु[२] ।

स्नुषु[१] (सं० १७।१४ पद० १७।१३)

विभक्तीति किम्[३]—

असुम्[४] (सं० ८।१९ पद० ८।१६)

ह्रस्वेति किम्[५]—

यासु (पद० ७।११ सं० ७।१२)

[शुक्लादिवर्ण-एकादि संख्यासमासस्थलेऽवग्रहविचारः]

[४८१] वर्णसंख्येऽन्यतरतः ॥५।१५॥

समास इति मण्डूकप्लुत्याऽनुवर्तते । मध्ये तु असंभवान्नसम्ब[६]द्ध[७]यते । वर्णवाचके संख्यावाचके च समासे विकल्पेनावग्रहः स्यात् ।

धूम्ररोहित इति धूम्र । रोहितः (पद० २४।२ सं० २४।२)

पञ्चदशेति पञ्च । दश (पद० १८।२४ सं० १८।२४)

त्रयोदशेति त्रयः । दश (पद० १८।२४ सं० १८।२४)

विभाषितत्वात्—

त्रिनवत्रयस्त्रिंशाविति त्रि[८] नवत्रयस्त्रिंशौ (पद० १०।१४ सं० १०।१४)

अत्र न । व्यवस्थितविकल्पः संप्रदायानुसारेण पठनीयः[९] ।

[आख्यातसंश्लिष्टानुदात्ते उपसर्गस्थले अवग्रहविधानम्]

[४८२] अनुदात्तोपसर्गे चाख्याते ॥५।१६॥

१. नि क. घ.

२. एतदुदाहरणं माध्यन्दिनीय संहितायां नोपलभ्यते ।

३. म घ.

४. म घ.

५. म घ.

६. म्व ज.

७. ध्य ज.

८. 'त्रि' इति पदविभागो न ज. पदपाठेऽपि नात्रविरामः । निर्विरामेऽस्वेष्टकः ।

९. ध्यम् क. ख. ज.

अनुदात्ते उपसर्गे आख्याते[1] परे अवग्रहः स्यात् ।

[2]अव धावं तीत्यव । धावंति (पद० २५।३२ सं० २५।३४)

स[3]म्भरन्तीतिं सम् । भंरन्ति (पद० २५।२७ सं० २५।२९)

[त्र-शपरतोगिरिशब्दस्य अवग्रहविधानम्]

[४८३] गिरि-त्र-शयोः ।।५।१७।।

गिरिशब्दोऽवगृह्य[4]ते त्र-शयोः परयोः ।

[5]गिरित्रेतिं गिरि । त्र (सं० १६।३)

गि[6]रिशेति गिरिं । श (सं० १६।४)

[इवादि चतुष्टयसंश्लेषस्थले अवग्रहविधानम्]

[४८४] इव-कारा-म्रेडिता-यनेषु-च[7] ।। ५।१८।।

इवादिषु[8] चतुर्षु अवग्रहः स्यात् ।

स्रु[9]चीवेतिं स्रु[10]चि । इंव (पद० २०।७० सं० २०।७९)

वषट्कारेभिरितिं वषट् । कारेभिंः (पद० १९।१७ सं० १९।१९)

स ॐ समिति सम् । संम् (पद० १५।२६ सं० १५।३०)

प्रावनेभिरि[11]तिं प्र । अ[12]वनेभिंः (पद० १२।४३ सं० १२।५०)

प्रा[13]यंनायेति प्र । अयंनाय (पद० २२।७ सं० २२।७)

[समीचीशब्दावग्रहस्थलनिर्देशः]

[४८५] एकात्समीची ।।५।१९।।

---

१ त क. घ. ज.

२. उपधावतोत्युप । धावति क. घ. ज. परमिदं माध्यन्दिनीय संहितायां नास्ति ।

३. सम्भरतीति घ.

४. ०ह्येत घ.

५. इदमुदाहरणं द्वितीयत्वेन क. ज.

६. इदमुदाहरणं प्रथमं क. ज.

७. च नास्ति ख.

८. ०षु ज एव ।

९. स्रुचीवेति घ.

१०. स्रुचि घ.

११. ०रति ध., एतदुदाहरणं नास्ति ख. ज.

१२. अयनाय क. प्रायनेभिरिति प्र । अयनेभिः घ. परमेतन्नमाध्यन्दिनीय संहितायामुपलभ्यते ।

१३. एतदुदाहरणं नास्ति क. घ.

एकशब्दात्परः समीचीशब्दोऽवगृह्यते ।

एकम् । समीची इति सम् । ई_ची (पद० १२।२ सं० १२।२)

एकात् किम्—

समीची[1] । उरसा (पद० ११।२८ सं० ११।३१)

[ऐकपदिकानि विशेषावग्रहस्थलानि]

[४८६] त्वायवः शंयो[2]र्बर्हिर्द्धास्मयुं मृण्मयी ॐ सुम्नया शुया साधुया धृष्णुयाविशालमनुया ।।५।२०।।

एतानि एकादशपदानि सावग्रहानि स्युः ।

त्वायव इति त्वा । यवः (पद० २०।७८ सं० २०।८७)

शं[3]योरिति शम् । यो[4]ः (पद० ३।४२ सं० ३।४३)

ब[5]र्हिर्धेति ब[6]र्हिः । धा? (पद० ५।११ स० ५।११)

अस्मयुमित्यस्म । युम् (पद० ११।११ सं० ११।१३)

मृ[7]ण्मयीमिति मृत् । मयीम् (पद० ११।५६ सं० ११।५९)

सु[8]म्नयेति सुम्न । या (पद० १२।५८ सं० १२।६७)

आशुयेत्याशु । या (पद० १३।९ सं० १३।१०)

धृ[9]ष्णुयेति धृष्णु । या (पद० २७।३७ सं० २७।३८)

विशालमिति वि । शालम् (पद० १४।८)

अनुयेत्यनु । या (पद० १५।६ सं० १५।६)

[सावग्रहविशेषसंज्ञापदनिर्देशः]

[४८७] मृगयुमुभयाद[10]तोऽपा[11]मार्गकिम्पु[12]रुषमिति च ।।५।२१।।

---

१. ०चि ज.

२. यो० इत्यादि सूत्रमेतावत् ज.

३. 'शयो' ज.

४. यो घ.

५. व घ. ज.

६. व घ. ज.

७. मृन्मयीमिति क. घ., मृणमयीमिति ज

८. मुम्नायेति ज.

९. घृ० ज.

१०. दे घ.

११. या

१२. स्पु क. घ.

एतानि चत्वारि पदानि अवगृह्यन्ते ।

मृगयुमितिं मृग । युम् (पद० ३०।५ सं० ३०।५)

उभयदंत[1] इत्युंभय । दंतं (पद० ३१।८ सं० ३१।८)

अपंमार्गेत्यपं । मार्गं[2] (पद० ३५।१० सं० ३५।११)

किम्पुरुषमितिं किम् । पुरुषम् (पद० ३०।१४ सं० ३०।१६)

[४८८] अधी[3]वासमित्येके ॥५।२३॥

एकशब्दो मुख्यार्थः ।

एतत्सावग्रहं स्यात् ।

अधिवासमित्यंधि । व्वा[4]सम् (पद० २५।३७ सं० २५।३९)

[अवग्रहापवादप्रकरणम्]

[प्रतिषेधार्थीयनञ्समासे अवग्रहनिषेधः]

[४८९] प्रतिषेधे नाव[5]ग्रहः ॥५।२४॥

प्रतिषेधवाचिनि पूर्वपदे अवग्रहो न स्यात् ।

अरक्षसा (पद० ११।२१ सं० ११।२४)

अनिं[6]राः (पद० ११।४४ सं० ११।४७)

[४९०] उत्तरेण चाकारेण ॥५।२५॥

प्रतिषेधवाचिनः परेण आकारेण अवग्रहो न स्यात् ।

अनांतताय (पद० १६।१४ सं० १६।१४)

अनाधृष्य? (पद० २७।७ सं० २७।७)

[संख्यासमासावग्रहापवादः]

[४९१] द्वापूर्वम् ॥५।२६॥

'द्वा' इति पूर्वं पदं नावगृह्यते ।

द्वादंश (पद० १८।२५ सं० १८।२५)

---

१. त्त. घ.

२. र्गः घ.

३. धि ज.

४. वा क

५. वा. क.

६. रा ज

[प्रकारार्थधाप्रत्ययेसंख्यासमासावग्रहापवादः]

[४९२] संख्यापूर्वश्चधा ।।५।२७।।

संख्यावाचकं[1] पूर्वपदं "धा" इत्येतस्मिन् परे नावगृह्यते ।

त्रिधा (पद० १७।८४ सं० १७।९१)

सप्तधा (पद० १७।७२ सं० १७।७९)

कतिधा (पद० २३।५० सं० २३।५७)

[द्विवचनान्तद्वन्द्वसमासे स्वरान्तपूर्व[2]पदे अवग्रहापवादः]

[४९३] द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्वपदानि ।।५।२८।।

स्वरान्तं पूर्वं[3] पदं येषां तानि द्वन्द्वानि द्विवचनान्तानि ना[4]वगृह्यन्ते ।

मित्रावरुणाभ्याम् । त्वा[5] (पद० ७।८ सं० ७।९)

अग्नी[6]षोमौ (पद० २।१५ सं० २।१५)

स्वरान्ते[7]त्यादि किम्—

ऋक्सामयोरित्यृक् । सामयो॑ः (पद० ४।९ सं० ४।९)

[एकाक्षरपूर्वपदस्य तद्धितवृद्धौ समासावग्रहापवादः]

[४९४] तद्धिते चैकाक्षरवृद्धावनिहिते ।।५।२९।।

तद्धिते सति एकाक्षरस्य पूर्वपदस्य वृद्धौ उत्तरपदेन अव्यवहितायामवग्रहो न स्यात् ।

सौभाग्यम् (पद २।१८ सं० २।१९)

त्रैस्तुभेनेति त्रैस्तुभेन (पद १।२७ सं० १।२७)

अनि[8]हितेति[9] किम्—

साम्राज्यमिति साम् । राज्यम् (पद० ४।२४ सं० ४।२४)

---

१. क घ.

२ ०र्वाणि इति सूत्रम् ज.

३. र्वं ख. ज.

४. न अ ख

५. त्वा नास्ति ख. ज.

६. नि घ.

७. न्त स्यादिति ख.

८. ग्नि घ.

९. ति न ज.

एकाक्षरेति[1] किम्—

आ[2]नु'स्तुभ्मित्या[3]नु' । स्तुभम् (पद १२।५ सं० १२।५)

[कृत्प्रत्ययलोपिविशेषसमस्तपदेऽवग्रहविचारः]

[४९५] अञ्चति-सहत्योः कृल्लोपे ॥५।३०॥

कृल्लोपे सति अञ्चति सहत्यो र्नावग्रहःस्यात् ।

प्राङ् । (पद० १९।२ सं० १९।३)

प्रत्यङ् । (पद० १०।२९ सं० १९।३)

ऋताषाट[4] (पद० १८।३६ सं० १८।३८)

पृतनाषाट्[5] (पद० १७।३६ सं० १७।३९)

कृल्लोपे किम्—

आच्ये[6]त्या । अंच्या[7] । (पद० १९।६० सं० १९।६२)

पृतनासह्येति पृतना । [8]सह्याय । (पद० १८।६२ सं० १८।६८)

[४९६] अनु-रु-सु-भ्याम् ॥५।३१॥

[9]उरु-सुभ्यां कृल्लोपे अञ्चतौ सहतौ च परे अवग्रहनिषेधो न स्यात् ।

उरु व्य[10]ञ्चमिति उरु । व्यञ्चम्[11] । (पद० १५।२२ सं० १५।२५)

उरु व्यचसइत्यु'रु । व्यचसं[8] (पद० २७।१५ सं० २७।१६)

सासहि मतिं सा । सहिम् । (पद ११।७१ सं० ११।७६)

[वत्सरान्तसमासेऽवग्रहविचारः]

[४९७] समिदाभ्यांवत्सरः ॥५।३२॥

---

१. क घ. ति न

२. अ क. घ.

३. त्य क. घ.

४. ड् क. घ.

५. ड् क. उ.

६. चे ज.

७. च्या ज. क. घ. ख

८. सा घ.

९. 'उरु' इत्यारभ्य''''न स्यात्' इति पर्यन्तं नास्ति क. ख. घ

१०. ०न्यंचसमिति घ.

११. व्यञ्च ज.

सम्-इदा-आभ्यां[1]व[2]त्सरे अवग्रहो[3] न स्यात् ।

[4]सुम्वत्सुरः॑ (पद० २७।४४ सं० २७।४५)

इदावत्सुरः॑ (पद० २७।४४ सं० २७।४५)

स[5]मिदाभ्यामि[6]ति किम्—

परिवत्सुरइतिपरि—व्वत्सुरः॑ (पद० २७।४४ सं० २७।४५)

[प्रश्लिष्टसन्धौ स्थलविशेषे अवग्रहनिषेधः]

[४६८] प्राग्निभ्यामनिन्धौ प्रश्लेषे ॥५।३३॥

प्र-अग्नि-इत्ये[7]ताभ्यां प्रश्लिष्टसन्धौ अवग्रहो न स्यात्, इन्धिः परो न चेत् ।

प्राणः॑ (पद ४।१५ सं० ४।१५)

आग्नीध्रम् । (पद० १९।१६ सं० १९।१८)

अनिन्धौ किम्—

प्रेद्धइति प्र-इद्धः (पद० १७।७० सं० १७।७६)

प्राग्निभ्यां किम्—

अपानइत्यंपा[8] आन? (पद० १८।२ सं० १८।२)

वीध्यायेति वि । ईध्यांय (पद० १६।३८ सं० १६।३८)

[विशेषपदेषु अवग्रहनिषेधः]

[४६९] जनयत्या ओषधयो[9] वृषायिषत न[10]हि चना स्मभ्यम जावयोवलगम् ॥५।३५॥

---

१. आभ्या ज,

२. अवत्सरे ज.

३. ह ज.

४. 'संवत्सर इत्यारम्य अग्रिम सूत्रस्य 'परो न चेत्' इत्येतावानशः क नास्ति

५. आभ्यामिति घ.

६. 'इति' न ख. ज.

७. 'आभ्यां' घ., इतः परं ख. ज. पुस्तके इन्ध धातु भिन्ने परे एकीभावसन्धौ अवग्रहो न स्यात् । इति वर्तते, नान्या वृत्तिः ।

८. या ज.

९ य. इत्यादि सूत्रमेतावत् ज.

१० 'नहि' न क. घ.

ज[1]नयत्यै इत्यादीन्यष्टौ नावगृह्यन्ते।

ज[2]नंयत्वै। त्वा। (पद० १।२२ सं० १।२२)

ओषंधय? । प्रति। (पद० ११।४४ सं० ११।४७)

भागम्। आ। वृषायिषत। (पद० २।३० सं० २।३१)

न हि। तेषां म्।[3] अमाचन (पद० ३।३२ सं० ३।३२)

कदा। चन। (पद ३।३४ सं० ३।३४)

पावकः। अस्मभ्यंम् (पद० १७।४ सं० १७।४)

उपंहूताः। अजावयं÷ (पद० ३।४२ सं० ३।४३)

अहं तं वंलगमु[4]त्किंरामि (सं० ५।२३ पद ५।२३)

[प्रकरणविशेषेणाऽवग्रहापवादः]

[५००] समानोऽनश्वमेधे ।।५।३६।।

समानशब्दो ना[5]वगृह्यते अश्वमेधे न चेत्।

सं। समानाः (पद १९।४३ सं० १९।४५)

अ[6]नश्वमेधे किम्—

समान इतिं सम्। आन? (पद २२।२८ सं० २२।३३)

तेजोसीत्य[7]ध्याय[8]: (अ० २२), एतदारभ्य[9] अध्यायचतुष्टय (अ० २२-२५) मश्वमेधसंज्ञकम्।

[अनवगृह्याणि सप्तपदानि]

[५०१] वायुरसरजातः—समुद्र[10]-महोरात्रे[11]-विश्वानरो-विश्वाहाप्रय[12]

१. 'जनत्यै' घ.
२. ज. पुस्तके उदाहरणानि न सन्ति
३. 'अमाचन न ख.
४. उत्किरामि न ख
५. ना गृह्यते
६. अश्वमेधे घ.
७. न्य घ.
८. ये क. ख. ज.
९. म्या ज.
१०. द्रोहो ख.
११. त्र० इत्यादि एतावत्सूत्रम् ज.
१२. क. य नास्ति

णोऽसपत्ना-गोधागोधूमा आशुशुक्षणि-न्यंग्रोधः पु[1]रोडाशः प्राव-णेभिरशीतम तस्करान्[2] म[3]स्मसाश्वत्थ उपस्ति र्माकि र्विश्वा-मित्रो गोपाम् प्रउगमङ्गानि कक्षीवन्तमदधात् पवीरवन् नीहारेण प्रावृता घनाघन ईदृङ् चान्यादृङ् शूघनासः कुयवं कुचरः पियङ्गवो नी[4]वाराएकादश षोडशचन्द्रमा आयुवो व्याघ्रोऽनड्वा[5]न् गविष्ठिरः कपर्दिनें पुलस्तये नि[6]षङ्गिणे कुलालेभ्यः कर्मारेभ्यः पुञ्जिष्ठेभ्यो द्वीप्याय नीप्याय कि ँ शिलायै लवृदाः शूकराय शूकृताय चराचरेभ्यः पारावतान् गोलत्तिका खुरजगरो विपन्यवो दाक्षायणाऽ आयुध ँ सुरामं वृहस्पति र्वनस्पति र्नराशंसः सुरभिर्नरिष्ठायै ॥५।३७॥

एतानि सप्तति पदानि नावगृह्यन्ते ।

इदं दिक् प्रदर्शनार्थ[7]म् ।

अन्यान्यपि[8] एवं विधानि द्रष्टव्यानि ।

[हेतुगर्भः अनवगृह्यपदनिर्देशः]

[५०२] उत्तम्भनम् ॥५।३८॥

आदि संशयात् ।

[५०३] विशौजाः[9] ॥५।३९॥

अन्यायसमासात् ।

---

१. पुडोराशः घ.

२. ०न्' न क. घ. •

३. भ घ.

४. नि० क.

५. ०ड्वन्., घ.

६. निषङ्गिणो घ.

७. ०'म'ृनास्ति ज.

८. प्ये ज.

९. जा क.

[५०४] उगणाः[१] ॥५।४२॥

उपसर्गै[२]कदेशलोपात् ।

[५०५] पुं[३]श्चलम् ॥५।४३॥

अनुनासिकोपधत्वात् ।

[५०६] अवत्तानाम् ॥५।४५॥

धात्वेकदेशलोपात् ।

इत्यादीनि ।

तथा चोक्तम्—

आदिमध्यान्तलुप्तानि समासा[४]न्यायभाञ्जि च ।
नावगृह्य[५]न्ति कवयः पदान्यागमवन्ति च ।
चकारोऽनुक्तसमुच्चयार्थः ।

तेन—

भ्राजी'मान् (पद० २९।२२ सं० २९।२२) इत्यत्र नावग्रहः ।

अत्र सम्प्रदायानुसारिणी व्यवस्था ।

[५०७] अ[६]निता[७]वन्तर्विकारागमं प्रागुक्ता ॥४।२२॥

इति रहितं पदं म[८]ध्यस्थविकारागमसहितं पूर्वमुच्चार्य स्थितोपस्थितं क[९]र्तव्यम् ।

श्रेयंस्कर । श्रेयं ÷ कुरोति श्रेयं ÷ । कर (पद० १०।२६ सं० १०।२८)

आयुष्पा? । आयुः पा इ[१०]त्यायुः । पा? (पद० २२।१ सं० २२।१)

ऋतस्पते । ऋतपत इत्यृत । पते (पद० २७।३३ सं० २७।३४)

---

१. ण च., णः ज.

२. गैं घ.

३. पुश्चलूं क, पुश्चलूम् घ.

४. स घ.

५. ह्य घ.

६. इति पूर्णसूत्रं तथा वृत्तौ 'इति रहितं पदं' इत्येतावत् घ. न.

७. ता क. ज.

८. अनितावन्तर्विकारागसहितं घ.

९. कार्यम् ख ज.

१०. इत्युः

अहर्पतये । अहं पतय इत्यहं । पतये (पद० ९।१९ सं० ९।२०)

दुदुक्षन् । दुधुक्ष[1]न्निति । दुधुक्षन् (पद० ३३।२६ सं० ३३।२८)

[५०८] विश्प[2]तीवेति च ।।४।२३।।

इदं च पूर्वमुक्त्वा स्थितोपस्थितं कर्तव्यम् ।

[५०९] विश्पतीवोपस्थिते ।।४।८९।।

'विश्पती' इदम् 'इव'[3]परे प्रकृत्याभवति उपस्थिते विद्यमानं चेत् ।

विश्पतीव । विश्पतीवेति विश्पती । इव (पद० ३३।४० सं० ३३।४४)

[अवग्रह (पूर्व) पदस्य संहितास्वरविधानम्]

[५१०] संहितावदवग्रहः स्वरविधौ परं च सर्वं चेदनुदात्तम् ।१।१४८।।

अवग्रहः अवग्रहयोग्यं पूर्वं[4] पदं[5] स्वरविधौ संहितावद् भवति, परं च पदं[6] संहितावत्सर्वमनुदात्तं चेत् ।

आखरे स्थऽ इत्याखरे । स्थ? (सं० २।१ पद० २।१)

'नोदात्तस्वरितोदयम्' (ज्यो० १८४ प्रा० ४।१४२) इति निषेधात् प्रचयो न ।

प्रजावतीरिति प्रजा । व्वतीः (सं० १।१ पद० १।१)

अत्र 'उदात्ताच्चा[7]नुदात्तं स्व[8]रितम्' (ज्यो० १७३ प्रा० ४।१३६) इति वकारस्य स्वरितः ।

वह्निंतममिति व्वह्निं । तमम् (पद० १।८ सं० १।८)

अत्र 'स्वरितात्परम्' (ज्यो० १८२ प्रा० ४।१४०) इत्य[9]नेन तममित्यस्य प्रचयो भवति ।

---

१. क्षु क.
२. स्य क, ञ घ.
३. वे ख. ज.
४. र्व ज.
५. द्यं क. ख.
६. सर्वंचेद क. घ., द्यं ख.
७. द घ.
८. स्वरितमिति न ख. ज.
९. त्ये घ.

स्वरविधौ किम्—

धावंद्भ्य् इति धावंत् । भ्यहं (पद० १६।२३ सं० १६।२३)

अत्र संहिताया अभावात् 'स्पर्शोऽपञ्चम' (ज्यो० २०८ प्रा० ४।११९) इति, तृतीयो न ।

सर्वानुदात्तत्वाभावे विशेषमाह—

[५११] इतिपरस्तिर्यङ् नीचाऽन्तोदात्ते मध्योदात्ते पर्वणि काण्वस्य वा ॥१।१४८॥

पर[1]मित्यनुवर्तते ।

अन्तोदात्ते मध्योदात्ते वा पदे इतेः परभूते चर्चापदे परो भागस्तिर्यङ् नीचः = अविकृतः अनुदात्तो यस्मिन् एतादृशः स्यात् ।

विरु रुचुरितिं वि । रुरु चु? (पद० ३।१५ सं० ३।१५)

सान्तपने[2]भ्य इतिं साम् । तपनेभ्यं ÷ (पद० २४।१६ सं० २४।१६)

अत्र —पूर्वसूत्रेण (ज्यो० ५१० प्रा० १।१४८) रु,[3] च, इत्यनयोः प्रचये प्राप्ते अनेन अनुदात्त[4] एव विधीयते ।

[स्थितोपस्थितप्रकरणम्]

[५१२] अन्तःपददीर्घो[5]भावे ॥४।१९१॥

पदमध्यस्थं दीर्घत्वं यस्य पदस्य तस्मिन् स्थितोपस्थितं स्यात् ।

मामहन्ताम् । ममह न्तामितिं ममह न्ताम् (पद० ३३।३८ सं० ३३।४२)

[6]पु रुषः । [7]पुरुष इति पुरुषहं (पद० ३१।३ सं० ३१।३)

इदं पदान्तस्थ[8]त्वाभावोपलक्षणम् ।

आयु नक् । अयु नगित्यंयुनक् (पद० २९।१३ सं० २९।१३)

---

१. द

२. न ख.

३. रुरुच क., रुरुचं घ., रुत ज.

४. अनुदात्तैव ज.

५. र्घो घ.

६. पू क. घ.

७. पू घ.

८. 'स्थ' न ज.

अन्तः पदे किम्—

पिब्रा[1]सोम॑म् (सं० ७।३८) = पि[2]ब॑। सोम॑म् (पद० ७।३६)

[५१३] विनामे ।।४।१९२।।

अन्तः[3] पदे[4] इत्यनुवर्तते।

अन्तः[5] पदे दन्त्यस्य मूर्धन्य[6]भावे सति स्थितोपस्थितं स्यात्।

सु षावं। सु॒सावेति॑ सु॒सा[7]वं (पद० १९।२ सं० १९।२)

सी॒ष॒धाम्। सी॒स॒धामेति॑ सीसधाम (पद० २५।४४ सं० २५।४६)

अन्तः पदे किम्—

आपो॒हिष्ठा॑। = हि[8] स्थ[9] (सं० ११।५० पद० ११।४८)

[५१४] प्रगृह्ये ।।४।१९३।।

प्रगृह्ये पदे स्थितोपस्थितं स्यात्।

द्वे इति॒ द्वे (पद० १७।८४ सं० १७।९१)

द्यावा॑पृथि॒वी इति॒ द्यावा॑पृथि॒वी (सं० २।९ पद० २।९)

इन्द्र॑वायू॒ इतीन्द्र॑वायू॒ (पद० ७।७ सं० ७।८)

च॒मू इति॑ च॒मू (पद० ८।३४ सं० ८।३९)

अ॒स्मे इत्य॒स्मे (सं० ३।११ पद० ३।११)

त्वे इति॒ त्वे (सं० ४।२२ पद० ४।२२)

मे इत्युदात्तस्य प्रगृह्यत्वात्—

मे इति॒ मे। गय॑÷(सं० ४।२२ पद० ४।२२)

---

१. वा घ.
२. व घ., पिब। सोमम न ज.
३. न्त ख.
४. द ज.
५. न्त ख.
६. न्या ख. ज.
७. षा ज.
८. हि न ज.
९. स्थ न ज.

उदात्तं किम्—

मे । वरुण । (सं० २।१।१ पद० २।१।१)

अमीऽ इत्यमी (पद० १३।७ सं० १३।८)

[५१५] प्लु[1]तमितौ ॥४।९१॥

प्लु[2]तम[3]क्षरमितौ प्रकृत्या स्यात् ।

एतस्योदाहरणं तु[4] क्रमप्रकरणे वक्ष्यते ।

'पदान्त पदाद्योः सन्धिः (ज्यो० ११७ प्रा० ३।३) इति नियमात् ।

प्लु[5]तस्य इतौपरे एकपदस्थत्वात् ।

'कण्ठ्यादिवर्णं एकारम्' (ज्यो० ७१ प्रा० १।८४) इत्यस्याप्राप्तौ प्रकृतिभाव विधानं व्यर्थंस[6]त् ज्ञापयति,

'इतौपदान्तकार्यंभवति' ।

तेन—

दुरोणसदिति दुरोण सत् । (पद १०।२२ सं० १०।२४)

इत्यादौ 'नान्तःपद' (ज्यो० २१५ प्रा० ४।११८) इति निषेधाभा[7]वात्

'स्पर्शोऽपञ्चम' (ज्यो० २०८ प्रा० ४।११९) इति तृतीयादिभवति ।

परेण सन्धिस्तु 'उभे संहिते आह' इत्युक्तत्वात् स्थितस्य भिन्नपदत्वात् भवति ।

अपंहतमित्यपं[8] । हतम् (पद० १।९ सं० १।९)

प्रतिज्ञासूत्रस्था धर्मास्तु न भवन्ति, प्रतिज्ञासू[9]त्रशेषभूतायाममोघनन्दिन्याम्' 'अवग्रहः पदान्तवत्[10]' (ज्यो० ९७ प्रा० १।१५३) इनि सिद्धेऽपि अवग्रहे पुनर्ज-कारविधानात् ।

---

१. इति सूत्रं न ज.
२. ह्लुत ज.
३. मि घ.
४. तु न ख.
५. ह्लुतस्य
६. तत ख., तज् ज.
७ भ ज.
८. 'य घ.
९. 'सूत्र' न घ.
१०, वदिति

तेन—

ष॒ [1]ह्वोइति॑। ष॒ [2]ह्वो (पद० १५।३१ सं० १५।३५)

[५१६] ओकारश्च ॥४।९२॥

अयमितौ प्रकृत्या।

वा॒यो इति॒ वायो॑ (पद० ६।१४ सं० ६।१६)

ओकारस्य[3] 'पदान्ते' (ज्यो० १०२ प्रा० १।९४) इत्यनेन प्रगृह्य[4]त्वात्' स्थितोपस्थिते सति प्रगृह्य[5]त्वात् प्रकृतिभावे सिद्धे पुनर्विधानं, नियमार्थम्, इतावेव[6]नान्यत्र।

वि॒ष्णवे॒ते (पद० ५।१६ सं० ५।१६)

वायवि॒ह (पद० २७।३२; सं० २७।३३)

अ[7]नवग्रहः किम्—

गविं॑ष्टा[8]विति॒ गो। इं॑ष्टौ[9]। (पद० ३३।५७ सं० ३३।६३)

अत्र—गोशब्दे स्थितोपस्थितं[10]माभूत्।

'उकारो पृक्त' (ज्यो० १०३ प्रा० १।९५) इत्यनेन प्रगृह्य[11]त्वात्।

स्थितोपस्थिते—

[५१७] उकारोऽपृक्तो[12] दीर्घमनुनासिकम् ॥४।९३॥

इतौ 'उ' इति पदं दीर्घमनुनासिकम्।

---

१. म ज.
२. म. ज.
३. श्च क. ख. ज
४. त्य घ.
५. त्य घ.
६. वं ज
७. 'अवग्रहः' क. घ.
८. ०ष्ठा इति ख, ष्टा इति घ. ष्ठा इति ग. ख
९. ०ष्ठौ क.
१०. ते क.
११. त्य घ.
१२. क्ते ज,

'ॐ' इतिरूपमापद्यते । [1]इतेश्चपरम् (ज्यो० प्रा० ४।९४) इतिस्थितेऽपि ॐ इत्यूम् (पद १।२८; सं० १।२८) [2]इतिसिद्धम् ।

[५१८] [3]रिफितेऽनिरुक्ते ।।४।१६४।।

संहितायामश्रुतरेफे रिंफितसंज्ञके स्थितोपस्थितं स्यात् ।

अन्तस्ते । (सं० ७।५)

अन्तरित्यन्तः (पद० ७।५)

'अनाद्युदात्तम्' (ज्यो० १०९ प्रा० १।१६२) इत्युक्तत्वात् ।

अन्तं ÷। पृथिव्या[4] । (पद० २३।५५ सं० २३।६२)

सु[5]ध्न्यक्कः (पद ३३।५३ सं० ३३।५९) = कु[6]रिति कः ।

'अनुदात्तम्' (ज्यो० १०८ प्रा० १।१६१) इत्युक्तत्वात्—

कः । स्वित् । (पद० २३।७ सं० २३।९)

स्वरिति स्व ÷ । स्तभितम् । (पद० ३२।६ सं० ३२।६)

'पदं' (ज्यो० ११३ प्रा० १।१६६) इत्युक्त्वात्, पदावयवे न ।

राजस्वः इतिं राज । स्वः । (सं० १०।१)

व्वे[7]नः । आवरित्या'वः (पद० १३।२ सं० १३।३)

वरितिं वः ।

'समानर्चि' (ज्यो० १११ प्रा० १।१६४) इत्युक्तत्वात्—

सन्तु । वः (सं० ९।२२ पद० ९।२१)

अन्तःश्लेषइत्यन्तः । श्लेषः (सं० १३।२५)

अत्र पूर्वभागे 'अवग्रहः पदान्तवत्' (ज्यो० ९७ प्रा० १५३) इति स्थितोपस्थितं प्राप्तं, 'न त्वितिकरणम्' (ज्यो० ९८ प्रा० १।१५४) इत्युक्त त्वान्नभवति ।

---

१. 'इति पदम्' क. घ.

२. × × न ज.

३. इति सूत्रं तथा 'अन्तस्ते' पर्यन्तं वृत्तिः न क. घ.

४. इतः परं 'मध्ये । अन्तः' इत्यधिकं ज.

५. सध्यक्कः क., सध्यूक : ज.

६. करोति कः घ.

७. व्वे ज., 'वेनः' न क. घ.

❀ सङ्क्रमप्रकरणम् ❀

[५१९] त्रिपदाद्या[1]वर्तमाने सङ्क्रमः ॥४।१६७॥

त्रिपदादीनां पुनरा[2]वृत्तौ सत्यां सङ्क्रमः। सङ्क्रम्यते इति सङ्क्रमः[3] = आवृत्तानि पदानि[4] अतिक्रम्य अग्रिमप[5]दपठनं कर्तव्यम्।

[५२०] अनन्तरे ॥४।१६९॥

शब्द[6]त[7]श्चा[8]र्थतश्च[9] आनन्तर्ये सङ्क्रमः स्यात्। शब्दत आनन्तर्ये—

गन्धर्वस्त्वा विश्वा[10]वसुः (सं० २।३ पद० २।३)

इत्यत्र—

विश्वस्यारिष्ट्यै (पद० २।३ सं० २।३)

इत्याद्येकदा उ[11]च्चारितं पुनः—

इन्द्रस्य बाहुः (पद० २।३ सं० २।३)

इत्यादौ सङ्क्रम्यते। अर्थतो—

मधुश्च माधवश्च (सं० १३।२५ पद० १३।२३)

इत्यत्रोच्चारितस्य पदसमुदायस्य—

शुक्रश्च शुचिश्च (सं० १४।६ पद० १४।५)

इत्यादौ सङ्क्रमः।

[५२१] द्विपदैकप[12]दान्यप्ये[13]केऽनुवाके ॥४।१६८॥

---

१. द्य घ.
२. : आ ख.
३. इति पर्यन्तं वृत्तेः द्विरावृत्तिः ज.
४. +न्य ज.
५. पदपर्यन्तं क.
६. द्व घ.
७. तो ज.
८. नास्ति ज.
९. श्चानन्तर्ये ज.
१०. स्वा ज.
११. वु क.
१२. ०पदाप्यनुवाके इति सूत्रं क. घ.
१३. प्य ज.

द्वे[1] पदे[2] एकं पदं च एकस्मिन्ननुवाके पुनरावृत्तौ सङ्क्रम्यते। अत्रापि 'अनन्तर' (ज्यो० ५२० प्रा० ४।१६९) इति वर्तते। तेन

या ओषधीः (सं० १२।७५ पद० १२।७३)

इत्यत्र एकपदोच्चारितस्य—

याः (सं० १२।७५ पद० १२।७३)

इत्यस्य—

याः फलिनीः[3] (सं० १२।८९ पद० १२।८५)

इत्यत्रोच्चारणम्।

[५२२] [4]त्रिरावृत्ते ॥४।१७४॥

त्रिरावर्त्तने अयं संक्रमः स्यात्।

वाजः । च । मे । प्रसवः । [5]प्रयतिः । (पद० १८।१ सं० १८।१)

मा । छन्दः । प्रमा । प्रतिमा (पद० १४।१४ सं० १४।१८)

'एक' (ज्यो० ५२१ प्रा० ४।१६९)

इत्यादि किम्—

पवित्रम् । असि । (पद १।२ । सं० १।२)

धूः । असि । (पद १।८ सं० १।८)

शर्म । असि । (पद १।१४ सं० १।१४)

त्रिरावृत्ते (ज्यो० ५२२ प्रा० ४।१७४) किम्—

व्रतम् । कृणुत । व्रतम् । कृणुत । (पद ४।११ सं० ४।११)

इषे । त्वा । ऊर्जे । त्वा । (पद १।१ । सं० १।१)

[५२३] गूढे ॥४।१७५॥

द्विरावर्त्तनेऽपि[6] संक्रमः स्यात्[7]। गूढं नाम द्विवारमुच्चारणीयमुभयाभिप्रायेण मध्ये यद् एकपदं पठ्यते।

---

१. दे ज.

२. नास्ति न ज.

३. इत्यनन्तरं क. घ. पुस्तके 'पुनरावृत्तौ संक्रम स्यात् हिरण्यगर्भ इत्येषः तथा 'तं प्रत्नथा' इति।

४. इति सूत्रामारभ्य 'सँहितायां च' (ज्यो० ५२९) इति सूत्र-वृत्ति पर्यन्तं क. घ. नास्ति पाठः।

५. प्र न ज.

६. —अयं ज.

७. स्यात् न ज.

यन्तासि यमनो ध्रुवोसि धरु'णं (सं० ९।२२)

अत्र—

यन्ता। असि। यमनं। ध्रुवः। धरुणं÷।

संहितायां (९।२२) द्विरावृत्तस्यापि 'असि' इत्यस्य संक्रमो (पद ९।२२) भवति।

या? फलिनी' (सं० १२।८९)

इत्यत्र तु—

याः। च। पुष्पिणी'। (पद १२।८०)

अस्य या शब्दस्य चतुर्वारमुच्चारणीयस्य त्रिवारम् उच्चारितत्वात् अपुष्पा इत्यनेनापि संम्बन्धः[2] धा[3]रयि तुं न संक्रमः।

[५२४] पदसमूहे ॥४।१७६॥

पदानां बहुवारमुच्चारणे संक्रमः स्यात्।

वाजश्च (सं० १८।१) इत्यध्याये—

'च। मे' (पद० १८।१ सं० १८।१)

इति पदद्वयस्य अनुवाकान्तरेऽपि संक्रमः।

[५२५] अपराङ्गे ।४।१७७॥

अपरस्याङ्गे = अपराङ्गत्वेनैव पुनरावृत्तौ[4] संक्रमः स्यात्।

'स्वाहा' यज्ञम्' (सं० ४।६ पद ४।६) इति मन्त्रे

स्वाहा द्यावा'पृथिवीभ्याᳬं स्वाहा वातात्' (पद ४।६ सं० ४।६)

इत्यनयोः स्वाहाशब्दयोः संक्रमः (पदे ४।६)।

आ। रभे'। स्वाहा'' (पद ४।६ सं० ४।६)

इत्यस्य न सङ्क्रमः, अपराङ्गत्वा[5] भावात्।

---

१. र ज.

२. न्धं ज.

३. द्योतयितुं ज.

४. त्ते ज.

५. ०त्वाभावात् जातिरिक्तेषु अपरांगत्वादित्येव।

[५२६] अस्वरविकारे ।४।१७१।।

स्वरभिन्नत्वाभावे संक्रमः स्यात् ।

सु॒क्ष्मा चासि॑ (पद० १।२७ सं० १।२७) इति प्रथमस्य ।

'असि॑' (पद० १।२७)

शब्दस्याद्युदात्तत्वात्

'शि॒वा च॑ासि' (पद० १।२७ सं० १।२७)

इत्यस्यानुदात्तत्वान्न संक्रमः ।

[५२७] अलिङ्गविकारे ।।४।१७२।।

लिङ्गभिन्नत्वाभावे संक्रमः स्यात् ।

'भ॒द्रो नो॑' (सं० १५।३८ पद० १५।३६)

इति मन्त्रे भद्रशब्दस्य भिन्नलिङ्गत्वात् न संक्रमः ।

'अ॒ग्नेर्भ॒र्गो॒सि' (पद० १४।१९ सं० १४।२४)

इत्यनुवाके नपुंसकस्य 'स्पृत' शब्दस्य संक्रमः ।

वात॑÷ । स्पृ॒त? (पद० १४।१९ सं० १४।२४)

गर्भा॑ ँ । स्पृ॒ता? (पद० १४।२० सं० १४।२५)

दि[१]शं॑÷ । [२]स्पृता? (पद० ४।२० सं० ४।२५)

इत्येतेषु पुल्लिङ्ग-स्त्रीलिङ्गत्वान्न संक्रमः ।

'सन्ते॒ पया॑ꣳसि' (सं० १२।११३ पद० १२।१०४)

इति मन्त्रे प्रथमस्य 'सम्' शब्दस्य नपुंसक विषयत्वात् द्वितीयस्य पुंल्लिङ्ग विषयत्वान्न संक्रमः ।

[५२८] असमाने ।४।१७३।।

असमाने[३] विषये पुनरावृत्तौ[४] संक्रमः स्यात् ।

'आयु॑र्य॒॑ज्ञेनं (सं० ९।२१ पद० ९।२०)

इत्यत्र आयुरादेर्यज्ञक्लृप्तेरसमानत्वात् सङ्क्रमः ।

'यज्ञस्य' तु यज्ञक्लृप्तेः समानविषयत्वान्न सङ्क्रमः (पद ९।२०)

---

१. ज, नास्ति

२. ज. नास्ति.

३. न ज.

४. त्ते ज.

[५२९] सᳪं हितायां च[1] ।४।१७७।।

आर्ष्यां च संहितायां पुनरावृत्तौ सङ्क्रमः स्यात् ।

हिरण्यगर्भऽ इत्येष? (सं० ३२।३)

तम्प्रत्क्नथा (सं० ३३।३३, ४७)

इत्यादिप्रतीकपठितेषु सङ्क्रमः कार्यः । एषां मन्त्राणां ब्रह्मयज्ञादौ पठनं कार्यमिति केचित् । नेत्यपरे ।

[५३०] अवसानार्थं पुनर्ग्रहणम् ।४।१७८।।

समाप्तिद्योतनार्थं[2] पुनरुच्चारणं स्या[3]त् ।

आकू'त्यै प्र यु[4]जे[5] (सं० ४।७ पद० ४।७)

इति मन्त्रे द्वितीयादिस्वाहाकारस्य[6] सङ्क्रमेषु

पूष्णेऽग्नये स्वाहा (सं० ४।७ पद० ४।७)

इत्यस्य न सङ्क्रमः ।

[५३०] अधिकारार्थम् ।।४।१७९।।

पदस्य अ[7]धिक[8]कार्यं ज्ञापनार्थं च पुनरुच्चारणं स्यात् ।

वाजंश्चम[9] (पद० १८।१ सं० १८।१)

इति मन्त्रे 'च । मे' इत्यनयोः[10]सङ्क्रमेऽपि

'स्वरिति स्वः । च मे (पद० १८।१ सं० १८।१)

इत्यत्र रिफितत्वज्ञापनार्थं न सङ्क्रमः ।

---

१. च नास्ति
२. थं ज.
३. 'स्यात्' न ज.
४. भु घ.
५. ज क. घ; इतः परं 'ऽग्नये' ज. एव
६. 'स्य' न ज.
७. अधिकार घ.
८. कं ख.
९. मे न ख.
१०. सक्रमे क.

[५३१] उत्सर्गश्च ।४।१८०।।

पूर्वोक्तस्य[1] परित्यागोऽपि क्वचित् स्यात्। व्यवस्थितविषयोऽयम्। 'च' शब्दो अप्यर्थे। 'द्विपदैकपदानि' (ज्यो० ५२० प्रा० ४।१६८) इत्यनेनोक्तः सङ्क्रमः।

'तदे॒वाग्नि'? (पद० ३२।१ सं० ३२।१)

इति मन्त्रे न भवति। 'संहितायां च' (ज्यो. ५२९ प्रा. ४।१७८) इत्यनेन विहितः सङ्क्रमः।

'लो॒कं ता इन्द्रम्' (पद १३।५६ सं० १३।५८)

इत्यत्र न भवति। उक्तं च—

पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः।
अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति ।। (उव्वटभाष्ये प्रा० ४।१७६)

अत्र सम्प्रदायानुसारेण निर्णयः।

।। इति पदलक्षणं समाप्तम्[2] ।।

।। अथ क्रमलक्षणम् ।।

[क्रमप्रयोजननिरूपणम्]

[५३२] क्रमः स्मृतिप्रयोजनः[3] ।।४।१८१।।

संहितायाः पदानां च स्मृतिः स्मरणं प्रयोजनमस्य सः। संहितायाः प्रयोजनं यज्ञादौ विनियोगः। पदानां च प्रयोजनमर्थज्ञानम्। क्रमस्य प्रयोजनं सङ्क्रमे पदयोः सन्धिः संहितायाः[4] अवसाननिर्णयश्चे[5]त्यादि।

एवं प्रयोजनमुक्त्वा तल्लक्षणमाह—

'क्रम' इत्यधिकारः आ[6]ध्याय परिसमाप्तेः।

---

१. 'स्य' न घ.
२. 'समाप्तम्' नास्ति ख. ज.
३. ०नम् क.
४. या क. घ.
५. श्चै घ.
६. अ क. ख. घ.

[क्रमपाठलक्षणम् औत्सर्गिकम्]

[५३३] द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमावसानादपृक्तवर्जम् ।४।१८३।।

[1]अपृक्तं वर्जयित्वा द्वे द्वे पदे संहिते उच्चार्य, तयोर्मध्ये उत्तरेण तदुत्तरम् एवमवसानपर्यन्तं द्वे द्वे पदे संहिताया उच्चारयति स[2] क्रमः स्यात् ।

'इषे त्वा । त्वोर्जे (पद० १।१ सं० १।१)

एवं 'पाहि' इति पर्यन्तं यत्र संक्रमस्तत्र गल[3]त्पदानित्य[4]क्त्वा अग्रिमैः पदैः सन्धानं[5] कर्त्तव्यम् । सङ्क्रमे सन्धिशास्त्रस्याचार्येणाभिहितत्वात् ।

यु नक्ति सः । स कस्मै । कस्मै तस्मै (पद० १।६ सं० १।६)

[सङ्क्रमे सन्ध्यपवादः]

[५३५] संङ्क्रमे च वैष्णवान् ।।३।१५०।।

वैष्णवान्[6] अयं नकारः स्वरे परे[7] यकारमापद्यते सङ्क्रमे चेत् ।

'रक्षोहणो व' (सं० ५।२५)

इति यजुषि—

वै ष्णवानवं । अवंनयामि ।

अत्र आकारोपधत्वात् यकारः प्राप्तः ।

[सङ्क्रमे पूर्वरुपसन्धेर्नित्यतानिर्देशः]

[५३६] सङ्क्रमे च सर्वत्र ।।४।८०।।

यजुः ष्षु[8] ऋक्षु च 'एदोद्भ्यां' परः अकारः पूर्वश्च एकं पूर्व[9]मा[10]पद्य[11]ते ।
'प्राणश्चम'[12] (सं० १८।२)

---

१. 'अपृक्तमित्यारभ्य' उत्तरेण' इति यावत् न क. घ.
२. सं ख. ज.
३. 'गलतपदानि' क
४. त्युक्त्वा ज.
५. न घ.
६. नयं क. घ. ज.
७. परे न ज.
८. ष्षु न. घ.
९. वं ज.
१०. आ ज.
११. द्य न ज.
१२. मे न. ज.

इति यजुषि—

'प्राणोऽपानः' (क्रम १८।२ पद १८।२)

'यद् ग्रामे' (सं० २०।१७)

इति मन्त्रे—

शूद्रेऽअर्ये'[1] (पद २०।१४)

कन्या इव' (सं० १७।९०)

इति[2] ऋचि—

अ्भोऽभि (सं० १७।९०)

इत्यादि भवति ।

अपृक्तवर्जं[3] (ज्यो० ५३४। प्रा० ४।१८३) किम्—

उदु त्वा (सं० १२।३१ पद० १२।२८)

ऊर्जमावद (सं० ११।१६ पद० ११।१६)

अत्र पदद्वये न विरामः । एयद्विषये[4] क्रमलक्षणमाह—

[त्रिपदक्रमस्थलनिर्देशः]

[५३७] अपृक्तमध्यानि त्रीणि स त्रिक्रमः ।।४।१८३।।

पूर्वस्मात् पदादपृक्तं[5] मध्ये उच्चार्य तदुत्तरे विरामः । एवं त्रीणि प[6]दानि संहित[7]या उच्चारयति स त्रिक्रमः स्यात् ।

'उदु त्यम् (सं० ७।४१ पद० ७।३९)

सोमे नातंनच्मि (सं० १।४ पद० १।४)

[५३८] पुनराकारेणोत्तरम् ।।४।१८४।।

एवं त्रीणि पदानि[8] उच्चार्य पुनराकारेण सहितं तृतीयं पदमुच्चारणीयम् स्यात् ।

ऊर्जमा वद । आवद । वदत्वया (सं० ११।१६ पद० ११।१६)

---

१. शूद्रेऽर्ये क. घ., शूद्रेर्ये ज.

२. इ त्यृ ज.

३. र्जं घ.

४. यं ख. ज; य क.

५. क्त ज.

६. 'पदानि' न क. ख. ज.

७. ता ख. घ.

८. न्यु ज.

[५३९] मोषू'णा भीषुणौ च ॥४।१८५॥

मो[2]षू[3]णं ÷ (पद ३।४६ सं०)

अभीषु'ण ÷ (क्रम० पद० ३।४५ सं० ३।४६)

इमौ च त्रिक्रमौ स्याताम् ।

[चतुः पदीय क्रमस्थलनिर्देशः]

[५४०] चत्वार्यपृक्तपूर्वे नकारपरे[4] सौ ॥४।१८६॥

अपृक्तपूर्वे नकारपरे सु इति पदे सति चत्वारि संहित[5]या उच्चार[6]यितव्यानि, स चतुः क्रम इति शेषः ।

ऊर्ध्वं ऊषुणंः (क्रम० पद० ११।४२ सं० ११।४२)

एतादृक्षा'स ऊषुणंः (क्रम० पद० १७।७७ सं० १७।८४)

गोमंदू षुणासत्या (क्रम० पद० २०।७२ सं० २०।८१)

[५४१] पुनः सुपदेनोत्तरम् ॥४।१८८॥

एवं त्रीणि वा चत्वारि वा[7] पदानि[8] उच्चार्य पुनः सुपदेन[9] अन्त्य[10]-मुच्चारणी[11]यं स्यात् ।

अभीषुणंः । सुनं ÷ । नंः सखी'नाम् (क्रम० पद० २७।४० सं० २७।४१)

[क्रमपाठे स्थितोपस्थिते तत् प्रदर्शनकालविधानम्]

[५४२] पूर्वस्योत्तर सठं० हितस्य स्थितोपस्थितमवगृह्यस्य॥४।१८९॥

उत्तरेण संहितस्य[12] अवग्रहवतः पूर्वपदस्य स्थितोपस्थितं कर्त्तव्यम् ।

---

१. षु ज.
२. मू क.
३. षु ज.
४. रै घ.
५. ताया क. घ; तायां ख ज.
६. रीय० घ.
७. वा नास्ति ख. ज.
८. +न्यु ज.
९. +ना ज.
१०. न्त्ये
११. णार्थं क., णर्थं घ.
१२. +स्या

त्वा समिद्भिः । समिद्भिरङ्गिरः (क्रम० पद० ३।३ सं० ३।३)

इति पूर्वमुच्चार्य—

समिद्भि रिति समित् । 'भिः' (क्रम० पद० ३।३ सं० ३।३)

इति पठनीयम् । 'पूर्वस्योत्तरसंहितस्य इति 'अवसाने च' (ज्यो० ५४३ प्रा० ४।१९५) यावदनुवर्त्तते ।

[यथा]—

अन्तः पददोर्घीभावे ।।४।१९१ ज्यो. ५१२।।

मामह[1]न्तामदितिः । ममहुन्तामिति ममहन्ताम् । (क्र म० पद ३३।३८ सं ३३।४२)

आयु नगिन्द्र[2] ÷ । अयु नगित्ययुनक् (पद सं० २९।१३)

विनामे ।।४।१९२।। ज्यो. ५१३।।

सु[3]षा[4]व सोमम् । सु सावेति सु साव (क्रम० पद १९।२ सं० १९।२)

प्रगृह्ये[5] ।।४।१९३ ज्यो. ५१४।।

इन्द्रवायू इमे । इन्द्रवायू इतीन्द्रवायू । (क्रम० पद० ७।८ सं० ७।८)

विष्णवे ते । विष्णो इति विष्णो (क्रम० पद ५।१६ सं० ५।१६)

उदु त्य[6]म् । ऊँ इत्यूँम् (क्रम० पद ७।४१ सं० ७।४१)

मोषू[7]णः । मो इति मो । सु[8] नः ÷ (.म० पद ३।४६ सं ३।४६)

ऊर्ध्व ऊषुणः ऊँ इत्यू[9]म् । सु नः (क्रम० पद० ११।४२ सं० ११।४२)

रिफितेऽनिरुक्ते ।।४।१९४ ज्यो. ५१८।।

अन्तस्ते । अन्तरित्यन्त? (क्रम० पद० ७।५ सं० ७।५)

प्रातः सोमम् । प्रात[10]रिति प्रातः । (क्रम० पद० ३४।३४ सं० ३४।३४) ।

---

१. हं ज.
२. न्द्र ज.
३. स ख.
४. सा क.
५. ह्य घ.
६. त्या घ.
७. षु ज.
८. सू घ.
९. त्यूम घ.
१०. प्रातरिति घ.

[५४३] अवसाने च ।।४।१९५।।

अर्धर्चादिः समाप्तौ विद्यमानस्य पदस्य स्थितोपस्थितं स्यात्[1] ।

पुशून् पाहि । पाहीति पाहि (क्रम० पद० १।१ सं० १।१)

हृव्यठं० रक्ष[2] । रक्षेति रक्ष (क्रम० पद १।४ सं० १।४)

भुवनमा विवेशा३ । आविवेशा३ । विवेशा३ इति विवेशा३ (क्रम० पद० २३।४९ सं० २३।४९)

अत्र 'प्लुतमितौ' (ज्यो० ५१५ प्रा० ४।९१) इति प्रकृतिभावः ।

[सङ्क्रमस्थले क्रमपाठविधानम्]

[५४४] यथासमाम्नातं क्रमावसान ६ सङ्क्रमेषु ।।४।।१९६।।

सङ्क्रमेषु पूर्वोक्तेषु यथासमाम्नातं क्रमशास्त्रानुसारेणावसानं स्यात् ।

व्विश्श्ववधा ६ परमेण (क्रम० पद० १।२ सं० १।२-३)

ह्वार्षीच्छुतधारम् (क्रम० पद० १।३ सं० १।३-४)

अत्र नावसानम् ।

ध्रुवेण धर्म्मणा । धर्म्मणेति धर्म्मणा ।। (क्रम० पद० २।३ सं० २।३)

व्वशाँऽ अनु । आन्वित्यनु ।। (क्रम० पद० ३।५२ सं० ३।५२)

अत्र[3] अवसानं भवति ।

सङ्क्रमेष्वित्युपलक्षणम् । अन्यत्रापि यथासमाम्नातमेव ।

अघुक्क्षुद६ सा । सा[4] व्विश्श्ववायु ÷ (क्रम० पद० १।३-४ सं० १।३-४)

व्विश्श्ववधायाऽ इन्द्रस्य (क्रम० पद० १।४ सं० १।४)

—अत्र नावसानम् ।

हु[5]व्य ६ रक्ष । रक्षेति रक्ष ।। (क्रम० पद० १।११ सं० १।११)

स[6]च्छन्ताम्पञ्च । पञ्चेति पञ्च ।। (क्रम० पद० १।९ सं० १।९)

—अत्रावसानम्[7] ।

---

१. थ घ.

२. क्षा घ.

३. त्रा ख. ज.

४. 'सा' इत्यारभ्य 'रक्षेति रक्ष' इति पर्यन्तं न क घ.

५. इति न क. घ.

६. इति केवलं क. घ. एव.

७. इत्यनन्तरं 'असन्देहार्थमिति पाठः क. घ.

अथ एतच्छाखोपयुक्ता धर्मा लिख्यन्ते ।
तत्र प्रतिज्ञासूत्राख्यं परिशिष्टम्

अथ प्रथमा कण्डिका

[ग्रन्थप्रतिज्ञासूत्रम्]

[५४५] अथ प्रतिज्ञा[१] ।।प्र. प. १।१।।

अथ[२] = प्रातिशाख्यसूत्रकथनानन्तरं प्रतिज्ञायते इति प्रतिज्ञा = प्रतिज्ञानविषयम्, उच्यते[३] इति शेषः ।

[वेदशब्दार्थप्रतिपादनम्]

[५४६] मन्त्रब्राह्मणयोर्वेदनामधेयम् ।।प्र. प. १।२।।

मंत्रः = संहितारूपः । ब्राह्मणम् = शतपथरूपम् । तच्छेष एव[४] आरण्यकम् । तयोरुभयो र्वेदशब्दवाच्यत्वम् ।

[ग्रन्थाधिकारज्ञापनम्]

[५४७] तस्मिञ्[५] छुक्ले याजुषाम्नाये माध्यन्दिनीयके[६] ।।प्र.प. १।३।।

तत्र शुक्ले = याज्ञवल्क्यप्रोक्ते पञ्चदशशाखात्मके "तानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्त" इति श्रुतेः । यजुषां समूहो याजुषम् । तत्र [७]आम्नाये मुख्ये मध्यन्दिनेन प्रोक्तं-माध्यन्दिनं छन्दः—अधीयते ते माध्यन्दिनाः, ते[८]षामिदं माध्यन्दिनीयम्, तदेव माध्यन्दिनीयकम्, तस्मिन् = माध्यन्दिन्यां शाखायाम् ।

---

१. ज्ञेति ङ.
२. अथ नास्ति क. घ.
३. त क. घ.
४. एवारण्य क. घ.
५. स्मिँ 'ख' स्मिन् शु. क. घ.
६. उत्तरसूत्रेण सहैकं सूत्रम् ङ.
७. तत्राम्ना क. घ.
८. तेषांम् इ 'ख'
प्रतिज्ञासूत्रव्याख्यानमेतत् अनन्तयाज्ञिकविरचिताद् भाष्याद् भिन्नमस्ति ।
ज. पुस्तके प्रतिज्ञापरिशिष्टव्याख्यानभागो नास्ति ।

[मन्त्रे स्वरस्थानकथनप्रतिज्ञा]

[५४८] मन्त्रे स्वरप्रक्रिया ।।प्र. प. ११४।

मन्त्रे = संहितात्मके, स्वरप्रकरणमुच्यते

"हस्तेन ते" (ज्यो० १७७ शु० प्रा० १।१२१) इत्युक्तत्वात् हस्तप्रदर्शनप्रकारमाह—

[अनुदात्तस्वरप्रदर्शनस्थानकथनम्]

[५४९] हृद्यनुदात्तः[१] ।।प्र. प. ११५।।

[उदात्तस्वरप्रदर्शनस्थानकथनम्]

[५५०] मूर्ध्न्युदात्तः ।।प्र. प. ११६।।

[स्वरितस्वरप्रदर्शनस्थानकथनम्]

[५५१] श्रुतिमूले स्वरितः[२] ।।प्र. प. ११७।।

[३]हृदयसमीपे हस्तं धृत्वानुदात्त उच्चारणीयः ।

मूर्द्धसमीपे धृत्वा उदात्तः ।

श्रुतिमूलसमीपे धृत्वा स्वरितः ।

प्रचय[४]स्यापि 'उदात्तमयम्'[५] (ज्यो० १८२ प्रा० ४।१४०) इति शब्देनोक्तत्वादुदात्तधर्मवत्वान्मूर्द्धसमत्वे प्राप्ते विशेषो याज्ञवल्क्यशिक्षायाम्—

'उदात्तं तु भ्रुवोः प्रान्ते, प्रचयं नासिकाग्रतः ।'

[६]नासिकाग्रतः = नासिकाग्रसमोपभागे ।

[ज्यात्यादि स्वरितानां हस्तस्वरप्रदर्शननिर्देशः]

[५५२] एवं जात्यादयोऽभिहिताः ।।प्र. प. ११८।।

अनेन प्रकारेण जात्यादयः सप्त स्वरित[७]भेदाः लक्षणेन हस्तप्रदर्शनप्रकारेण च प्रातिशाख्ये उक्ताः (शु० प्रा० १।१२१-१२५ ज्यो० १७८-१८१) ।

---

१. त्ते घ. त्तो' क.

२. सूत्रमिदं नास्ति घ. क.

३. हृदय'''''''उदात्तः' नास्ति क घ.

४. प्रचितस्या क. घ.

५. उदात्तमयः (१।१५०)

६. नैतत् पदमस्ति ख.

७. ताः घ. 'भेदाः लक्षणेन' नास्ति घ. क. घ.

[प्रसङ्गतो ब्राह्मणस्वरनिर्देशः]

[५५३] ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ ॥प्र. प. १।९॥

ब्राह्मणे = शतपथे,[१] तु उदात्तः अनुदात्तश्चेति द्वावेव। भाषिकं नाम = ब्राह्मण-स्वर[२]लक्षणविधायकं सूत्र[३]परिशिष्टम्। 'अथ ब्राह्मणस्वरसंस्कारनियमः' (भा० प० सू० १।१) इत्यादि। तल्लक्षणलक्षितौ स्वरावेव स्वारौ ज्ञेयौ। तदिह[४] दिक्[५]प्रदर्शनं[६] क्रियते—

[५५४] उदात्तस्वरितौ नीचौ नीच उच्चस्तथैव च।
ब्राह्मणस्य स्वरो ह्येष ज्ञायते वेदपारगैः॥

'उदात्तस्वरितौ अनुदात्तौ उच्चारणीयौ। अनुदात्तः स्वरितश्च[७] उदात्तः उच्चारणीय' इत्यादि सूत्रानुसारेण स्वरौ ज्ञेयौ।

[प्रसङ्गतः सूत्रस्वरनिर्देशः]

[५५५] तानस्वराणि छन्दोवत् सूत्राणि ॥प्र. प. १।१०॥

सूत्राणि श्रौतस्मार्त्तकर्मप्रतिपादकानि, तानः = एकश्रुतिः स्वरो येषां तानि, एक-पाठश्रुत्या[८] पाठनीयानि। अन्ये विधयश्छन्दोवत् प्रातिशाख्यप्रतिज्ञासूत्रानुसारेण पठनीयाः[९]।

❀इति कात्यायनीये प्रतिज्ञापरिशिष्टे प्रथमा कण्डिका❀

❀अथ द्वितीया कण्डिका❀

[सू० १-८]

ए[१०]वम् स्वरनिर्णयमुक्त्वा त्रितयसाधारणं वर्णोच्चारणविशेषमाह—

---

१. पथे क.
२. रं ख क. घ.
३. त्रं ख
४. इह न ख
५. दिक् नास्ति क. घ
६. शंनार्थं क. घ
७. इदं पदद्वयं ख एव
८. पाठश्रुत्या नास्ति क. 'पाठश्रुत्या' स्थाने 'स्वर' घ
९. 'पठनीयाः' स्थाने 'च' क. घ.
१०. एवम्....मृकारेण नास्ति क.
एवम्....माह नास्ति घ.

[यकारोच्चारणे विशेषविधानम्]

[५५६] अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य, संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणम् ।।प्र. प. २।१।।

अथ = स्वरप्रक्रियाकथनान्तरं वर्णोच्चारणविषय उच्यत इति शेषः ।

य-र-ल-वा = अन्तस्थाः, तेषामाद्यस्य = यकारस्य, पदादौविद्यमाद्यस्य अन्यहला, हल्-व्यञ्जनम् इति पर्य्यायौ । असंयुक्तस्योच्चारणे प्राप्ते जकारोच्चारणं स्यात् ।

रेफ[१]:, ऊष्मसु स-ष[२]-श-हेषु अन्त्यो हकारश्च, ताभ्यां संयुक्तस्य पदस्य आदि मध्यान्तेषु विद्यमानस्य जकारोच्चारणं कर्त्तव्यम् ऋकारेण च युक्तस्य[३] अविशेषेण[४] अन्यहला संयुक्तस्य [५]असंयुक्तस्य वा आदिमध्यान्तेषु जकारोच्चारणं कर्त्तव्यम् ।

यत्ते॑ सोम दि॒वि[६] (शु० सं० ६।३३ पद० ६।३१)
यु॒[७]ञ्जते॒ (शु० सं० ११।३ पद० ५।१४)
युजे वा॒ं[८] (शु० सं० ११।५ पद० ११।४)
घृ॒ताची॑ यन्तुहर्य॑त (सं० ३।४ पद० ३।४)
बट्[९] सू॑र्य॒ (सं० ३३।४० पद० ३३।३६)
कृणुह्यध्व॒रम् (सं० २९।२६ पद० २९।२६)
प्राव॒ाहया॒य च[१०] (सं० १६।४३ पद० १६।४३)
बाह्॒र्य॑म् (सं० २५।२ पद० २५।२)
सद॒ोहय॒ंतस्य (सं० ५।३३ पद० ५।३३)

---

१. फ ख
२. सहे क. घ.
३. स्यावि क. घ.
४. णान्य क. घ
५. स्यासं क.
असंयु''''न्तेषु नास्ति घ.
६. दिवि न ख
७. नैतदुदाहरणं ख. क. घ.
८. वां न ख
९. पदं न ख
१०. पदं न ख

जनवादि[1]नं व्यृ[2]द्धयै (सं० ३०।१७ पद० ३०।१६)

पदादिस्थस्येति[3] किम्—

कुल्याय[4] (सं० १६।३७ पद० १६।३७)

अन्य हनित्यादि किम्—तत्त्वांय[5] (सं० ११।१ पद० ११।१)

अस्मिन् यज्ञे (सं० १९।५८ पद० १९।५८)

युक्तस्येत्येव सिद्धे सं शब्देना[6] व्यवहि[7]तस्यैव। इह न—

अग्निर्ज्योतिः (सं० ३।९ पद० ३।९)

वर्ष्याय (सं० १६।३९)

बह्वयस्तन्वः (सं० १९।४४ पद० १९।४२)

[५५६] द्विर्भविप्येवम् ।। प्र. प. २१२।।

द्वयोर्यकारयोः संयोगे जकारोच्चारणं स्यात्।

नृपाय्यं म् (सं० २०।८१ पद २०।७२)।

धाय्यारूपम् (सं० १९।२४ पद १९।२२)

तं य्यज्ञम् (सं० ३१।९ पद ३१।९)

संय्यौं मि (सं० १।२२ पद० १।२२)।

अत्र 'अन्तस्था[8]मन्तस्थासु[9]' (शु० प्रा० ४।१० ज्यो० २१७) इत्यनेन सानुनासिको द्वितीयो य[10]कारः।

जुराय्यंवंसि (सं० १०।८ पद १०।८)।

—अत्र स्वरात्संयोगादिः' (शु० प्रा० ४।१०१ ज्यो० ३४५) इति द्वित्वम्।

अत्र कश्चन विशेषः अमोघनन्दिन्याम्—

उपसर्गात् परस्य न जकारोच्चारणम्।

---

१. वृध्यै क.
२. इति नास्ति ख.
३. नैत दुदाहरणम् क. घ.
४. व्यस्थित क. घ.
५. न्तस्थम क. घ.
६. न्तस्थसु घ.
७. पदं न ख
८. नैतत् ख
९. न+अ ख.
१०. प्रका क.

उपंयुज्ञ्ङ्‌ हुविश्च'[1] नह्ं (सं० १७।९ पद १७।८)

द्विर्भावे अयम् निषेधो न—

संय्यौ'मि (सं० १।२२ पद १।२२)।

पादादौ[2] पदादि[3]त्वेन सिद्धे पुनर्जकारोच्चारणविधानम्, तेन उपसर्गात् परत्वेऽपि—

स्तुतीरुपंय्यज्ञम् (सं० ८।३५ पद ८।३०)।

अनुय्योजान्विन्द्रते[4] हरी (सं० ३।५२ पद ३।५१)।

इत्यत्र चवर्गतृतीयोच्चारणं कर्त्तव्यम्।

अतएव शिक्षायाम् :—

अनुयोजान्विन्द्रते तु उप यज्ञं तथा विना।'

अवग्रहे च—

'देवयुवमिति देव। युवम्।' (सं० १।१२ पद १।१२)

इत्यत्र जकारोच्चारणम्।

य[5]थाभागमिति यथा। भागम् (वा सं० २।३१ पद० २।३०)

इत्यत्र द्वितीयो यकारः पदादिर्नास्ति, अतः जकारोच्चारणं न कर्त्तव्यम्।

अथो पूर्वकस्य न—

अथो ये (सं० १६।८ पद० १६।८)

अथ-मा-स-न-शब्द[6]पूर्वकस्य विकल्पेन—

न[7] यत्परंह्ं (सं० २०।८२ पद २०।७३)

स यो'जते (सं० १५।३३ पद १५।२९) अत्र न।

मनो न ये'षु (सं० ७।१७ पद ७।१६)।

स यन्ता (सं० ६।२९ पद० ६।२७)

इत्यत्रोच्चारणम्। अत्र विकल्पविषये संप्रदाय एव प्रमाणम्।

---

१. च न ख.

२. पादादौ अधिकं ख.

३. पदान्तत्वेन क. घ.

४. ते हरी न ख.

५. यथाभाग....कर्तव्यम् नास्ति क. घ.

६. शब्दकपू. क.

७. न यत्....अत्र न नास्ति घ.
अत्र न नास्ति ख.

[रेफस्योच्चारणे विशेषविधानम्]

[५५७] अथापरान्तस्थस्यायुक्तान्यहलः संयुक्तस्योष्म ऋकारैरेकार सहितोच्चारणम् ।।प्र. प. २१३।।

अथ[1] = अन्तस्थाद्य[2]स्योच्चारणविषयानन्तरम् । द्वितीयान्तस्थ[3]स्य = रेफस्य, अन्यहला असंयुक्तस्य, [4]ऊष्मभिः ऋकारेण च संयुक्तस्य, एकारसहितम् 'रे[5]' इत्युच्चारणं स्यात् ।

दर्शतम्[6] (सं० ११।३७ पद० ११।३४) ।
[7]वर्षोवर्षीयसि (सं० ६।११ पद० ६।९) ।
देवं[8] बर्हिः (सं० २८।१२ पद० २८।१२) ।
निर्ऋते तुभ्यम्[9] (सं० १२।६२ पद० १२।५३) ।

ऊष्मेत्यादि किम्—

ऊर्ज्जे (सं० १।१ पद० १।१) ।

अयुक्तेत्यादि किम्—

[10]मूर्द्ध [11]वस्त्वैं ÷ (सं० २५।१ पद० २५।१) ।
वर्ष्याय (सं० १६।३८ पद० १६।३८) ।
यज्ञपतिर्ह्वार्षीत् (सं० १।२ पद० १।२) ।

[लकारस्योच्चारणे विशेषविधानम्]

[५५८] एवं तृतीयान्तस्थस्य क्वचित् ।।प्र. प. २१४।।

एवमेव तृतीयान्तस्थस्य = लकारस्य,[12] क्वचित् इति उदाहरणाल्पत्वपरम्[13] । 'ले' इत्युच्चारणम् ।

---

१. अथ न ख. क.
२. स्थाद्युच्चा क. घ.
३. स्थ नास्ति क.
४. उ. घ.
५. रें नास्ति क. अत्र 'इत्युच्चारणविषयानन्तरं''''एकारसहितं' इति द्विरावृत्तं क.
६. र्शनम् घ.
७. विशो घ.
८. देवं न. ख.
९. तुभ्यं न. ख.
१०. मूर्द न ख.
११. वस्त्वैः क.
१२. लकारस्य न ख.
१३. उदा''''परम् नास्ति घ. णानि ल्त्वपरम् क.

शतवल्शाः[1] (सं० १२।१०० पद० १२।९१)।
उ[2]पवल्हामसि (सं० २३।५१ पद० २३।४६)।
[3]इति उदाहरणानि न त्वपरम्।

[सादृश्यप्रसङ्गाद् ऋकारस्योच्चारणे विशेषविधानम्]

[५५९] ऋकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवम् ।।प्र.प.२१५।।

[4]एवम् = एकारसहितोच्चारणम्।
ऋताषाड्[5] (सं० १८।३८ पद० १८।३६)।
सृज (सं० ११।३७ पद० ११।३४)।
पितृन् (सं० २।३४ पद० २।३३)।
सामान्वृ[6] ग्भिः (सं० २०।१२ पद० २०।११)।

एवम्[7] 'ऋलृवर्णयोर्मिथः सावर्ण्यं[8] वाच्यम्' इति वार्त्तिकेन (पा० सू०) ऋ-लृवर्णयोः[9] सावर्ण्यात् लृकारस्यापि 'ले' इति—

क्लृप्तम्[10] (सं० १८।८ पद० १८।११)।
क्लृप्तिः (सं० १८।११ पद० १८।११)।

[वकारस्योच्चारणे विशेषविधानम्]

[५६०] अथान्त्यस्थान्त[11]स्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरु-मध्यम-लघु-वृत्तिभिरुच्चारणम् ।।प्र. प. २१६।।

---

१. वल्शः क. वलूशः घ.
२. उप न. ख.
३. इति''''परम् न. ख. घ.
४. एवं न ख.
५. ट् ख.
६. न्यू क.
७. एवम् नास्ति क. घ.
८. र्ण्यं ख.
९. ऋलृवर्णयोः नास्ति क. घ.
१०. क्लृप्त्यम् क. घ.
११. स्थान्त नास्ति क.

मण्डूकप्लुत्या 'अयुक्तान्यहल' (प्र० प० २।३ ज्यो० ५५७) इत्यत्रापि सम्बध्यते। अथ ऋकारकथनानन्तरं अन्तस्थानामन्त्यस्य[1] वकारस्य आदौ मध्ये अन्ते च विद्यमानस्य यथाक्रमं गुरुवृत्या मध्यम[2]वृत्या लघुवृत्या च उच्चारणम्।

व्वा॒यव॑ ÷ (सं० १।१ पद० १।१)।

व्वा॒य॒वृ॒त॒स्पृ॒ते (सं० २७।३४ पद० २७।३३)।

अत्रापि कश्चन विशेषः अमोघनन्दिन्याम्—

'ये ये पदादिस्थयकारविषये[3] नि[4]षेधास्ते वकारेऽपि।'

प्र॑वा॒युम् (सं० ३३।५५ पद० ३३।५०।

अथा॑व्व॒यम् (सं० १२।१२ पद० १२।१२)।

विशेषस्तु संहितापाठे—वः। वाम्। [5]वा। वै। वि। वौ। अत्र वकारो लघु—

दे॒वो व॑ ÷ (सं० १।१ पद० १।१)।

याः[6] वा॑ (सं० ७।११ पद० ७।१०)।

चक्षु॑षो वा (सं० १८।५८ पद० १८।५४)।

न वा उ॑ (सं० २३।१६ पद० २३।१४)।

ता वि मु॑ञ्च (सं० २७।३३ पद० २७।३३)।

पदपाठे तु गुरुः—

व्वः (पद० १।१)।

व्वा॒[7]म् (पद० ७।१०) इत्यादि।

[षकारस्योच्चारणे विशेषविधानम्]

[५६१] अथो मूर्धन्योष्मणो[8]ऽसंयुक्तस्य, टु[9]मृते संयुक्तस्य च खकारोच्चारणम् ।।प्र. प. २।७।।

---

१. स्य नास्ति क. घ.

२. म न ख. मध्यमवृत्त्या नास्ति क.

३. विषये नास्ति घ. विशेये क.

४. न्निषेधा घ.

५. वा नास्ति क.

६. यवां क.

७. व्वाम् नास्ति घ.

८. ष्मणे घ.

९. दुमृते घ.

अथान्तस्थकथ[१]नानन्तरम्, मूर्धस्थानस्योष्मणः = षकारस्यासंयुक्तस्य, टवर्गं विना अन्यहला संयुक्तस्य च, खकारोच्चारणम्।

इषेत्वा (सं० १।१ पद० १।१)।

बिभर्ष्यंस्तवे (सं० १६।३ पद० १६।३)।

शुष्क्या[२]य (सं० १६।४५ पद० १६।४५)।

टुमृते किम्—

प्रत्युष्टम् (सं० १।२९ पद० १।२९)।

श्रेष्ठ[३]तमाय (सं० १।१ पद० १।१)

श्वा[४] कृष्णः (सं० २४।४० पद० २४।४०)।

क्षकारे खकारवत् अवयव संभावने[५]ऽपि मातृकादौ गणनात् एकवर्णत्वात् अवयवविभागाभावेन खकारोच्चाणं न[६] भवति। 'ककारयोगे खकारोच्चारणाभावः' इति नियमस्तु न,

शुष्कम् (पद० १३।११) इत्यादौ विपरीतसंयोगे ककारयोगे[७]ऽपि खकारोच्चारणसत्वात् (सं० १३।१२)।

[विशेषोच्चारणस्य व्यवस्थापनम्]

[५६२] अध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥ प्र. प. २।८॥

अयमुच्चारणे विशेषः अध्ययने[८] ब्रह्मयज्ञे[९] तदादिषु कर्मसु पारायणादिषु। अर्थविचारे तु—ये वर्णास्त एव न त्वर्थभेदः।

॥इति कात्यायनीये प्रतिज्ञापरिशिष्टे द्वितीया कण्डिका॥

---

१. कथ नास्ति घ.
२. शुष्याय क.
३. ष्ठ ख.
४. श्वा न ख.
५. संभवने क. घ.
६. न नास्ति क. ख. घ.
७. ककारयोगे नास्ति क. घ.
८. यनं क. घ.
९. यज्ञः घ.

❀अथ तृतीया कण्डिका❀

[अनुस्वारस्य विशेषादेशविधानम्]

[५६३] अथानुस्वारस्य ꣳ इत्यादेशः श–ष–स–ह–रेफेषु ।।प्र.प. ३।१।।

स-ष-स-ह रेफे[2]ष्विति सम्भवाभिप्रायं, तत्रैवानुस्वारविधानात् । अथोष्मकथनानन्तरम् अनुस्वारसंज्ञकस्यायोगवाहस्य ꣳ कारादेशः स्यात् शकारादिषु ।

त्रिꣳशत् (सं० ३।८ पद० ३।८)

हुवीꣳषिं (सं० ८।१८ पद० ८।१५)

पयाꣳसि (सं० १२।११३ पद० १२।१०४)

दृꣳहस्व (सं० १।२ पद० १।२)

स ꣳ राय? (सं० ३।१९ पद० ३।१९)

[अनुस्वारसंबन्धिविशेषादेशस्य भेदाः]

[५६४] तस्य त्रैविध्यमाख्यातं[3] ह्रस्व-दीर्घ-गुरुभेदैर्दीर्घात् परो ह्रस्वो, ह्रस्वात् परो दीर्घो, गुरौ परे गुरुः ।।प्र. प. ३।२।।

तस्य ꣳ इत्यस्य तिस्रः विधाः = प्रकाराः, यस्य, तस्य भावः = त्रिविधत्वमुक्तं स्यात् । किं तदित्याह—दीर्घादक्षरात्परो ह्रस्वः[4] = एकमात्राकालः । ह्रस्वात्परो दीर्घः = द्विमात्राकालः । संयुक्ताक्षरे परे गुरुः द्विवर्णात्मकः ।

तपूꣳषि (सं० १३।१० पद० १३।९)

शतꣳहिमाः (सं० २।२७ पद० २।२७)

भेषजꣳश्रिया (सं० २१।३८ पद० २१।३५)

प्यायताꣳ[5]श्रोत्रम् (सं० ६।१५ पद० ६।१३)

अत्रापि कश्चिद् विशेषोऽमोघनन्दिन्यास्—

'अनुस्वारो द्विमात्रः द्विमात्रात् परोऽपि ऋकारो[6]दये व्यञ्जनपरे' ।

---

१. ꣳ मित्या ङ क. घ.

२. फे न ख

३. तꣳ प्राचीनपाठः

४. ह्रस्वो क. घ.

५. यना घ.

६. कावो क.

दे॒वाना॑ ँ हृदये (सं० १६।४६ पद० १६।४६)

'मा॒ँस'पच॑न्या' (सं० २५।३६ पद० २५।३४)

इत्यत्र तु न ँ कारोच्चारणम्, अनुस्वाराभावात् ऋक् प्रातिशाख्ये नकारलोपादिस्वरानुनासिकत्वयोर्विधानात्तदनुसरणस्यैवौचित्यात्, अत्र विशेषानुक्तेः।

[५६५] परसवर्णेष[2]त्प्रकृत्या चान्यत्र ।।प्र. प. ३।३।।

श-ष-स-हेभ्योऽन्यत्र तु मकारस्य परपंचमविधानात् (शु० प्रा० ज्यो०) तस्य स्पष्टमुच्चारणे प्राप्ते परस्य वर्णस्य स[3]वर्णो यः पंचमः तस्य ईषत्सादृश्येन उच्चारणं स्यात्।

तञ्जा॒[4]नन् (सं० ३।१४ पद० ३।१४)

इत्यादौ

वाजाञ्जयतु[5] (सं० ५।३७ पद० ५।३७)

इत्यादिवत् [6]ञकारादेर्न स्पष्टमुच्चारणम्।

[विसर्गे विशेषधर्मकथनम्]

[५६६] विसर्गेष्वी[7]षद्विरामः ।।प्र. प. ३।४।

विसर्गेषु नान्तरीयका[8]र्द्धमात्राकालपेक्ष[9]या किंचिदधिको विरामः। अवसानं कृत्वाग्रिमवर्णोच्चारणं कार्यम्।

व्वसो॑ः प॒वित्र॑मसि[10] (सं० १।२ पद० १।२)

याः फ॒लिनी॑ः (सं० १२।८९ पद० १२।८०)

[अकारोच्चारणे विशेषधर्मकथनम्]

[५६७] पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवति ।।प्र. प. ३।५।।

---

१. पांस्य क.
न्या''''स्वारा नास्ति घ
२. वर्सेषत् क.
३. स नास्ति क. घ
४. तज्जा क.
५. यनु घ.
६. भ घ.
ञ ख.
७. र्गेषीष घ.
८. यार्द्धमा क. घ.
९. पेक्ष्या घ.
१०. असि न ख

पदस्यादिभूतस्य हल्संयुक्तस्य अकारस्य ह्रस्वस्य[1] ईषद्दीर्घता च एकमात्राकालापेक्षया किंचिदधिककालोच्चारणं स्यात् ।

व्व[2]सोः' पुवित्रम् (सं० १।२ पद० १।२)

पदादिस्थस्येति किम्—

व्वायवं ÷ (सं० १।१ पद० १।१)

हल्[3]संयुक्तस्य किम्—

अ[4]नु' नृहं (सं० ३४।९ पद० ३४।९)

अकारस्येति किम्—

ध्रु॒वा (सं० २।६ पद० २।६)

॥ इति कात्यायनीये प्रतिज्ञापरिशिष्टे अन्तिमा तृतीया कण्डिका ॥

॥ अथ याज्ञवल्क्यशिक्षोक्ता हस्तेन प्रदर्शनीया विषयाः लिख्यन्ते ॥

मुष्ट्याकृतिर्मकारे तु नकारे तु नखग्रहः ॥

[या० १।६१ पृ० ४८]

[5]पञ्चाङ्गुल्यं पकारे च, तकारे कुण्डलाकृतिः[6] ॥

ककारान्ते टकारान्ते ड-णेतर्जनिकां नमेत् ।

[या० शि० १।६२ पृ० ४८]

अनुस्वारेऽङ्गुलि[7]क्षेपश्चाङ्गुष्ठाकुञ्चनं लघौ ॥

दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्तितः ।

[या० शि० १।६४ पृ० ५०]

---

१. स्य नास्ति घ.

२. वासोः घ.

३. सं० न ख

४. अनु....स्य किम् नास्ति क. घ.

५. पञ्चा....नमेत् नास्ति क.
मुद्रित या० शि० पुस्तके अयमर्धः अग्रेतनार्धानन्तरमस्ति ।

६. कृति घ.

७. लि नास्ति क.
मुद्रित या० शि०—'अङ्गुष्ठाकुञ्चनं लघावनुसारे त्वपां॑रसम्' इति पाठः ।

ऊर्ध्वंक्षेपाच्च [1]यश्चोष्मा अधःक्षेपाच्चयो भवेत् ॥
एकैकामुत्सृजेदधीरः स्वरिते तूभयं क्षिपेत् ।
[या० शि० १।६३ पृ० ४९]

द्विमात्रिके क्षिपे[2]देकां मात्रिके तूभयं क्षिपेत् ।
[या० शि० १।६७ पृ० ५२-५३]

[3]स्वरितं यद्भवेत्किंचित् वकारं ह्रस्व संयुतम् ।
तत्रोष्मणि[4] विजानी[5]यान् निक्षेप उभयो रपि ।
[या० शि० १।६६ पृ० ५२]

जात्ये च स्वरिते चैव वकारो यत्र दृश्यते ।
कर्त्तव्यस्तूभयोः क्षेपः सदस्यैरिति दर्शनम् ।
[या० शि० १।६८ पृ० ५३]

अस्यार्थः—मकारे मुष्टिः ।
नकारे अगुष्ठेन[6] तर्जनीनखग्रहणम् ।
पकारे पंचागुलीमेलनम् ।
तकारे कुंडलाका[7]रः ।
ककारे टकारे[8] ङकारे[9] णकारे च तर्जनीमधोनामयेत् ।
एते प्रकाराः अवसानस्थ[10] वर्णेषु ।
सर्वत्रानुस्वारे अङ्गुष्ठा कुंचनम् । गुरौ तु अङ्गु[11]लिप्रसारणम् ।
स्वरपरम् अनुनासिकं 'रङ्ग' इति शिष्टा व्य[12]वहरन्ति ।

---

१. योष्मा स्यादधः''''या''''इति मुद्रिते पाठः ।
२. भवेदेकां क.
३. 'स्वरितं यद्भवेत्किंचित् सवकारोष्मकं ततः ।
ह्रस्वं वा यदि वा दीर्घं निक्षेप उभयोरपि ॥' इति मुद्रित पाठः ।
४. त्रोष्मा घ.
५. तीयात् घ.
६. न नास्ति क. घ.
७. करः
८. टकारे नास्ति घ. क.
९. उकारे घ
१०. नस्य क.
११. अङ्गुष्ठप्रसारणम् क.
१२. व्याहरन्ति क. घ.

उक्तं च पाणिनीयशिक्षायाम् :—

यथा सौराष्ट्रिकानारी तक्राँ इत्यभिभाषते।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव,खेदया।

[२६ श्लो०] [या० शि० २।७० पृ० १२७]

रङ्गे तर्जनीप्रसारणम्।

उदात्तात् परे विसर्गे तर्जन्याः प्रसारणम्। अनुदात्तात् प्रचयाच्च परे कनिष्ठिकायाः। ह्रस्वात् स्वरितात् परे उभयोः। दीर्घात् परे कनिष्ठिकायाः। वकारयुक्ताद्दीर्घादपि परे उभयोः। यकारयुक्तजा[1]त्यस्वरिताद्दीर्घादपि द्वयोरेव।

❀ अथ अष्टविकृतिलक्षणप्रकरणम्[2] ❀

[विकृति पाठप्रकरणप्रतिज्ञा]

अथ जटाद्यष्टविकृतीनां लक्षणानि लिख्यन्ते।

---

१. जात्पर क.

२. अथ जटाद्यष्टविकृतिलक्षण प्रकरणे टिप्पणी

अवधेयम्—

I. प्रकरणमिदं 'ज' पुस्तके नास्ति।

II. 'ङ' संज्ञके वाराणसीमुद्रिते सभाष्ये शुक्लयजुःप्रातिशाख्ये ४७१ पृष्ठतः ४९२ पृष्ठपर्यन्तं यत् 'जटाद्यष्टविकृतिलक्षणं' मुद्रितं तेन ज्योत्स्नापाठः संवदतीति तस्यापि पाठभेदोऽत्र समावेशितः।

III. प्रतिशाख्यप्रदीपिकाशिक्षायामप्येष ज्योत्स्नापाठः उद्धृत इति तस्य पाठभेदाः 'शि' सङ्केतेन प्रदर्शिताः।

IV. एतत्प्रकरणोदाहरणेषु द्वित्व स्वरादिकं नास्ति ख पुस्तके। 'घ' 'शि०' पुस्तकयोः स्वराभावः द्वित्वादयोऽपि यत्र कुत्रचिदेव। अतः सम्प्रदायमनुसृत्य द्वित्व—स्वरादि सन्निवेशोऽत्र सम्यग्ज्ञानाय मया कृतः। 'ङ' पुस्तके स्वरसत्त्वेऽपि सर्वत्र द्वित्वाद्यादरो नास्ति। पुस्तकेषु लेखकप्रमादात्कुत्रचित् स्वरभेदेऽपि वैदिकेषु नैयत्येन ये स्वराः प्रदर्श्यन्ते तेषामेवात्राङ्कनं विहितम्।

V. पूर्वरूपसन्धौ लौकिकवाक्येषु सर्पाकृति 'S' सङ्केतं शिष्टाः प्रयुञ्जते। परमयं सङ्केतो माध्यन्दिनीयवेदे विवृत्तिबोधकः अनवान मात्राविराम-

[विकृतिपाठाध्ययनमहिमा]

तत्र विकृतीनां पाठे फलं पङ्क्तिपावनत्वम्,

"जटादिविकृतीनां ये पारायणपरायणाः ।
म[1]हात्मानो द्विजश्र[2]ष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः ॥"

इत्यादित्यपुराणात् । अन्यान्यपि विष्णुलोकादि[2] फलानि वाराहपुराण-पा[3]राशर स्मृत्यादिषु ।

[अष्टविकृतिनामानि]

तासां विकृतीनां[4] नामानि प्रदर्श्यन्ते[5]—

जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ १ ॥

[6]क्रमः पूर्वो यासां ताः । आसां क्रमः प्रकृतिरित्यर्थः ।

[जटाविकृतिलक्षणम्]

तत्र प्रथमत्वाज्जटालक्षणमाह[7]—

क्रमं यथोक्तं प्रब्रूयाद् व्युत्क्रमेण क्रमेण च ।
सलक्षणं सर्वसन्धौ जटा सा प्रोच्यते बुधैः ॥ २ ॥

फलकश्च सम्प्रदाये व्यवह्रियत इति तत्रैव विवृत्तिस्थलेषु समादृतोऽयं सङ्केतः । कारिकासु व्याख्याग्रन्थे तु लोकवदेव पूर्वरूपसन्धिपरिचायकत्वेन 'ऽ' सङ्केतोऽयमादृत इति ध्येयम् ।

VI. जिज्ञासूनां सुखबोधाय येषां मन्त्राणामत्र उदाहरणत्वेन विकृतपाठो दत्तोऽस्ति तेषां कृत्स्नतया संहितापाठः पदपाठः—क्रमपाठः अपेक्षितस्थलेषु जटापाठश्च निर्दिश्यते ।

१. माहात्मा ख,
२. कानिफ शि.
३. पराश. घ.
४. विकृतीनां नास्ति घ. शि.
५. दर्शयन्ते ख.
६. क्रमः''''रित्यर्थः नास्ति शि०
७. आह नास्ति शि.

[1]क्रमं यथोक्तं द्वि-त्रि-चतुष्क[2]मात्मकं पुनश्च तमेव[3] वैपरीत्येन[4] पुनश्च क्रमेण एवं त्रिवा[5]रं सर्वसन्धिषु लक्षणयुक्तं पठेत्, सा[6] जटा इति तत्वज्ञैरुच्यते। [7]उदाहरणं यथा—

व्वायवंस्थ स्थ व्वायवो व्वायवंस्थ ॥ (पद. १।१; सं. १।१) इत्यादि।[8]

स्वापूर्वांशं पदद्वन्द्वं स्वागर्भे त्रि-चतुष्क्रमे।
पुनरुक्तमसन्देहार्थं जटात्वं न चार्हति ॥ ३ ॥

'सु-आ' इति पदद्वयगर्भे त्रिक्रमे
'मो षू णं ÷' (पद ३।४५ सं० ३।४६)
'सोमे नातनच्मि' (पद १।४; सं० १।४) 'इत्यादौ,
तथा चतुक्रमे
'गोम दू षुणा सत्या' (पद २०।७२ सं० २०।८१)
इत्यादौ–'सु-आ' पूर्वांशं पदद्वयं असन्देहार्थं द्विपदत्व[9]भ्रमवारणाय
'सुनः' (पद ३।४५ सं० ३।४६ पद २०।७२ सं० २०।८१;) इत्यत्र क्रमपाठे

आतंनच्मि (पद १।४; सं० १।४) इत्यत्र क्रमपाठे इति पुनरुच्चारितं जटाभावं नार्हति।

'असन्देहार्थम्' इति हेतुगर्भं विशेषणम्। [10]यथा—'उदुत्यम्, (पद ७।३९ सं० ७।४१) इत्यत्र क्रमपाठे द्विपदत्वभ्रमवारणाय 'ॐ इत्यूं' इति मध्यस्थ[11]स्य वेष्टनम्

---

१. इत-पूर्वं 'अस्यार्थः' इति शि.
२. चतुः क्रमा ख.
३. मे वं ख.
४. त्येत घ.
५. पुनरपि 'त्रिवारं' ङ.
६. स्मा शि.
७. उदा····यथा नास्ति ख. शि.
८. इत्यादि शि. एव।
९. त्व नास्ति ख.
१०. तथा ख.
११. स्थ नास्ति ख.

तथा। इदं तु न[१] क्रमः। अतो न[२] जटा कार्या[३]।

[जटाविकृतौ पञ्चानां क्रमाणां निर्देशः]

अथ जटायां [४]कति सन्धय इति प्रदर्शनार्थं जटायां पठ्यमानान् क्रमान् नामतो निर्दिशति—

अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा।
सङ्क्रमश्चेति पञ्चैते जटायां कथिताः क्रमाः ॥ ४ ॥

व्वायवं स्त्थ—इत्यनुक्रमः।

स्त्थ स्त्थ —इत्युत्क्रमः।

स्त्थ व्वायवं ÷ —इति व्युत्क्रमः।

व्वायवो व्वायवं ÷ —इत्यभिक्रमः।

व्वायवं[५] स्त्थ (पद १।१ सं० १।१)—इति स[६]ङ्क्रमः।

इमे पञ्च क्रमा एव पृथक् पृथक् पठनेन 'पञ्चसन्धिः' इति वैदिकैः पठ्यन्ते[७] ॥ ४ ॥

[व्युत्क्रमे स्थितोपस्थितपाठव्यवस्था]

[८]कस्मिन् क्रमे किं प्रमाणमित्याह—

न स्थितोपस्थिते ये स्युर्जटायां व्युत्क्रमे न ते।

ये विधयः स्थितोपस्थिते न भवन्ति ते जटायां व्युत्क्रमे न पठनीयाः। [९]उदाहरणं यथा—

---

१. 'तु' इत्यतः पूर्वं 'न' घ. ङ.

२. जटा इत्यतः परं 'न' शि.

३. क. शि. पुस्तकयोः श्लोकोऽयं सव्याख्यश्चतुर्थत्वेन दृश्यते.

४. 'कति''''जटायाम्' इत्यधिकः पाठः क घ. ङ.

५. व नास्ति ख

६. स ङ् मः ङ

७. 'इमे''''पठ्यन्ते' पर्यन्तं शि. एव। पठ्यते शि. पाठः।

८. इत आरभ्य ['माला' लक्षणात्पूर्वं] 'विकृतिषु बोध्यः' इति पर्यन्तं पाठः शि. नास्ति।

९. 'उदाहरणं यथा' इति ङ. एव

१. जास्प्पुत्त्य ६ सु यमं ६ सु यमंञ्जा ६ पुत्त्यञ्जास्प्पुत्त्य ६ सु यमंम् ॥ (पद० ३३।९ सं० ३३।१२ जटापाठः)

२. व्वसंवेहुर्प्पतंयेह६ पतंये व्वसंवे व्वसंवेहुर्प्पतंये ॥ (पद ९।१९ सं० ९।२० जटापाठः)

३. इतन्धू र्षाहौ धूः सहावितमितन्धू र्षाहौ ॥ (पद ४।३३ सं० ४।३३ जटापाठः)

४. दार्व्वाघाटस्ते ते दार्वाघातो दार्वाघाटस्ते (पद २४।३५ सं० २४।३५ जटापाठः) ।

५. व्वायवो' व्वनुर्षदो' व्वनसदो' व्वायवो' व्वायवो' व्वनुर्षदं ÷ (पद ३३।१ सं० ३३।१ जटापाठः)

६. ऋतस्पते त्वष्टु स्त्वष्टु'र्ऋतपतऽऋतसपते त्वष्टु' ÷ (पद २७।३४ सं० २७।३४) ।

७. उभे सु'श्चन्द्र सुचन्द्रोभ[१] उभे सु'श्चन्द्र (पद १५।३९ सं० १५।४३) ।

८. बृह तीन्दुदु'क्षन् दुघु'क्षन् बृह तीम्बृ'ह तीन्दुदु'क्षन्(पद ३३।२५ सं० ३३।२८)।

९. श्रेयंस्कर भूयंस्क्कर भूयं६ कर श्रेयं६कर श्रेयंस्क्कर भूयंस्क्कर (पद १०।२६ सं० १०।२८)

१०. आयु ष्प्पाऽआयु रायु'रायु: पाऽआयु ष्प्पाऽआयु' ÷ (पद २२।१ सं० २२।१)

११. सिषासन्तो व्वनामहे व्वनामहे सिसासन्त६ सिषासन्तो व्वनामहे (पद २६।१७ सं० २६।१८) ।

१२. अग्ने? पु'रीषवाहंणं६ पुरीष वाहंनो ग्नेरग्ने? पु'रीषवाहंणं६ ॥ (पद ११।४१ सं० ११।४४) ।

१३. एनमायु नगयु नगे नमे नमायु नुक् (पद २९।१३ सं० २९।१३) ।

१४. मामहन्तामदितिरदितिर्मंमहन्तां मामहन्तामदिति६ (पद ३३।३८ सं० ३३।४२) ।

१५. देवी उषासा' उषसौ देवी देवी उषासौ (पद २१।४६ सं० २१।५०) ।

१६. पर्जन्यो' वृष्टिमाँ इंव वृष्टिमानिंव पर्जन्यं६ पर्ज्जन्यो' व्वृष्टिमाँ इंव (पद ७।३८ सं० ७।४०) ॥

---

१. न्वोभे ख.

[स्थितोपस्थितपाठव्यवस्थापवादः]

एतस्यापवादमाह—

वर्ज्जयित्वा विश्पतीव—

इदमुदाहर[१]णं वर्ज्जयित्वा। अत्र स्थितोपस्थिते अनुच्चार्यमाणे[२]ऽपि एकादेशो[३] व्युत्क्रमे उच्चारणीयः।

विश्पतीव बीरिंटे बीरिंटे व्विश्पतीव व्विश्पतीव बीरिंटे (पद ३३।४० सं० ३३।४४)

[मध्यसन्धित्रये व्याकरणप्रामाण्येन सन्धिपाठः]

............विशेषविषयान् विधीन् ॥ ५ ॥

वैकल्पिकान् व्याकरणं प्रमाणं मध्यगत्रये ॥

सन्धौ। उत्क्रम-व्युत्क्रमा-ऽभिक्रमेषु सन्धिविषये व्याकरणे वैकल्पिकान् जिह्वामूलीयो-पध्मानी[४]यादीन् प्रातिशाख्ये विशेषविषयान् 'प्रकृत्या क-खयोः प्फयोश्च' (ज्यो० २३८ प्रा० ३।११) इत्यादिविशेषविहितान् त्यक्त्वा अन्यत्र व्याकरणं प्रमाणम्। पूर्वोक्तेषु तु[५] प्रातिशाख्यमेव।

१. कामंधुक्षोऽधुक्षं काङ्क्षामंधुक्षं। (पद० १।२ सं० १।३)

च पुष्पिणींः पुष्पिणीश्च च पुष्पिणींः। (पद० १२।८० सं० १२।८९)

—अत्र[६] जिह्वामूलीयोपध्मानीयौ न।

२. सहस्रंधारन्दे वोदे वः सहस्रंधारं सहस्रंधारन्दे वः (पद १।३ सं० १।३)।

—अत्र 'वाशरि' (पा० ८।३।३६) इत्यस्य वैकल्पिकत्वात् पक्षे सत्वम्, 'अविकारं शाकल्यः शषसेषु[७]' (ज्यो० २३७ प्रा० ३।१०) इति विशेष विहितत्वात्[८] न।

१. उदाहरणं नास्ति घ. ङ
२. माणो ख.
३. शः घ.
४. नीया नास्ति ङ.
५. तु नास्ति ङ.
६. अत्रोदाहरणद्वये इति ङ पाठः।
७. शषसेपु नास्ति क. ख. घ.
८. त्वात्र इति ङ.

३. स्थ महो महं स्त्थ स्त्थ महं ÷ (पद ३।२० सं० ३।२०)

—अत्र 'शर्परे खरि विसर्ग[1]स्य विसर्गः' (पा० ८।३।३५) इत्यस्य वैकल्पिकत्वात् पक्षे सत्व-विसर्गौ 'लुङ्मुदि जित्परे[2]' (ज्यो० २३९ प्रा० ३।१३) इत्युक्तत्वान्न।

४. चक्रे व्वायव्व्यान् व्वायव्व्याँश्चक्रे चक्रे व्वायव्व्यान् (पद ३११६ सं० ३११६)।

—अत्र 'अनुनासिकात्परोऽनुस्वारः[3]' (पा० ८।३।४) इति पक्षेऽनुस्वारः 'अनुनासिकमुपधा' (ज्यो० १९१ प्रा० ३।१३१) इत्युक्तत्वान्न।

५. श्रौत्र्य नु ष्टुबनु स्तुप् श्रौत्री श्रौत्र्यनु ष्टुप् (पद १३।५२ सं० १३।५७)

—अत्र 'शश्छोटि' (पा० ८।३।६३) इति तवर्गात् 'परश्चास्पर्शपरश्छम्[4]' (ज्यो० १८९ प्रा० ४।९७) इति विशेषविधानान्न।

६. सम्भ्रियमाणꣳ सम्म्राट् सम्म्राट् सम्म्भ्रियमाणꣳ सम्भ्रियमाणꣳ सम्म्राट् (पद ३९।५ सं० ३९।५)

—अत्र 'ङः सि धुट्' (पा० ८।३।२९) इति 'ङ्नौकाभ्याꣳसकारे[5]' (ज्यो० २२२ प्रा० ४।१०७) इति नकारे[6] विशेषविहितत्वान्न।

उदु त्यन्त्यम्वुदुदु त्यम् (पद ७।३९ सं० ७।४१)।

—अत्र 'मय उञो' वो वा'[7] (पा० ८।३।३३) इत्यस्य वैकल्पिकत्वात् पक्षे प्रकृतिभावः 'उकारोऽपृक्तो[8] स्पर्शात्' (ज्यो० १५६ प्रा० ४।९०) इत्युक्तत्वान्न।

ऋतसदंन्यृतसदंनमृतसदंनमृतसदंन्यृतसदंन्यृतसदंनम् (पद० ४।३६, सं० ४।३६)

—अत्र 'ऋत्यक' (पा० ६।१।१२८) इति पाक्षिकः प्रकृतिभावो न 'कण्ठ्य ऋकारे ह्रस्वम्[9] (ज्यो० १२२ प्रा० ४।४९) इति विशेष विधानात्। अत एव—

---

१. विसर्गस्य विसर्गं इति नास्ति क. ख.

२. जित्परे नास्ति ख. क.

३. परः इत्यन्तमेव क. ख.

४. छम् नास्ति क. ख.

५. सकारे नास्ति क. ख.

६. न कारे इति नास्ति ङ

७. मय उञ इत्येव क. ख

८. पृक्तौ ख

९. ह्रस्वम् इति नास्ति क. ख.

ऋताषाड् तधामऽऋतधामऽऋताषाड् ताषाड् तधामा (पद० १८।३६ सं० १८।३८)

—अत्र पाक्षिको गुणो न।

ऋश्यानालभते लभत् अऽऋश्यानृश्यानालभते (पद २४।२७ सं० २४।२७)

—अत्र 'आर्' इति न प्रातिशाख्यस्थत्वात्। 'उपसर्गादृति धातौ'[१] (पा० ६।१।९१) इत्यस्य तु धातुत्वाभावान्न प्राप्तिः[२]। अतः[३] 'ऋत्यकः' (पा० ६।१।१२८) इति सूत्रेण अत्र प्रकृतिभावः।

पोषेण रायो रायः पोषेण पोषेण राय? (पद १५।७ सं० १५।७)

—अत्र 'रायः सहस्पोषपुत्रयोः'[४] (ज्यो० २५० प्रा० ३।२५) इति न प्रातिशाख्यस्थत्वात्।

यूपऽआप्यत ऽआप्यते यूपो यूपऽआप्यते (पद १९।१५ सं० १९।१७)।

ऊरू पादौ पादा ऽऊरूऽऊरूपादौ (पद ३१।१० सं० ३१।१०)।

—अत्र 'लोपः शाकल्यस्य' (पा० ८।३।१९) इत्यस्य वैकल्पिकत्वात् पक्षे यवयोः[५] श्रवणं प्राप्तं 'यवयोः पदान्तयोः स्वरमध्ये लोपः[६]' (ज्यो० १२० प्रा० ४।१२७) इत्युक्तत्वान्न भवति।

अस्मिन्योनौ योनावस्मिन्नस्मिन्योनौ (पद १२।४६ सं० १२।५४)।

—अत्र पूर्वोक्तेन वकारलोपः प्राप्तः 'न वकारस्यासस्थान एकेषाम्[७]' (ज्यो० १२१ प्रा० ४।१२८) इति विशेष[८]विहितत्वान्न भवति[९]।

छन्दस् यव्व न्नव्वं श्छन्दिस् छन्दस्यव्व न् (पद २९।१५ सं० २९।१५)।

रुक्मोऽअन्तरन्ता रुक्मो रुक्मोऽअन्त? (पद १२।२ सं० १२।२)।

---

१. धातौ नास्ति क. ख.

२. प्राप्तः ङ

३. 'अतः' इत्यारभ्य 'प्रकृतिभावः' पर्यन्तं पाठो नास्ति ङ

४. स्पोषपुत्रयोः इति नास्ति क. ख.

५. यवयोः इति नास्ति ङ

६. स्वरमध्ये लोपः इति नास्ति क. ख.

७. न वकारस्य इत्येव सूत्रसङ्केतः क. ख.

८. विशेष इति नास्ति ङ

९. भवति इति नास्ति क. ख. घ.

'षोडंशाक्षरेण षोडुशꣳ'षो'डुशꣳ षोडंशाक्षरेणु षोडंशाक्षरेण षोडुशम्'[1] (पद ९।३३ सं० ९।३४)।

—इत्यादौ व्याकरणानुसृतत्त्वाच्च 'चछयोः शम्' (प्रा० ३।१३३) 'रेफे[2] लुप्यते दीर्घं चोपधा[3]' (ज्यो० २२५ प्रा० ४।३५)

'अनुस्वारꣳ रोष्मसु मकारः'[4] (ज्यो० २१३ प्रा० ४।१) इत्यादि भवति। एवमन्यदप्यूह्यम्।

[आद्यन्तक्रमयोः प्रातिशाख्यस्य प्रामाण्यम्]

आद्य[5]न्तयोः प्रातिशाख्यं मानम्,……………।

अनुक्रम—सङ्क्रमयोस्तु प्रातिशाख्यं प्रमाणं, संहिताधर्मवत्त्वात्। उक्तान्युदाहरणानि।

सर्व[6]ष्वपि प्रतिज्ञासूत्रगा धर्माः।

सर्वष्वपि पञ्चसु क्रमेषु जकारादिपठनरूपाधर्माः[7] ज्ञेयाः। 'प्रतिज्ञासूत्रगा' इत्युपलक्षणं, शिक्षास्थस[8]र्वधर्माणामपि। उक्तान्येवोदाहरणानि।

[उदात्तादिस्वरविषये प्रामाण्यनिर्देशः]

……सर्वस्वरेषु च[9] ॥ ६ ॥

सर्वेषु[10]स्वरविषयेषु[11] च [12]पुनः प्रातिशाख्यमेव प्रमाणम्। तद्विचारस्तु स्वर-

---

१. ङातिरिक्त पुस्तकेषु—षोडशꣳ षोडशाक्षरेण षोडशाक्षरेण षोडशꣳ षोडशꣳ षोडशाक्षरेण। इत्युदाहरणपाठः स माध्यन्दिनीय शाखायामनुपलब्ध एव भवति।

२. रेफो ख

३. दीर्घं चोपधा इति ङ. एव

४. मकारः नास्ति क. ख.

५. अद्यान्तयोः ङ

६. समेष्वपि ङ

७. धर्मा इति नास्ति क. ख. घ.

८. सर्वं नास्ति ङ

९. तु इति ख. ङ पाठः

१०. सर्वेषु नास्ति क. ख. घ.

११. विषये इति क. ख. घ

१२. च पुनः नास्ति ख. घ

प्रकरणे उक्तः। यान्युदाहरणानि संहितायां न दृश्यन्ते तानि प्रदर्श्यन्ते—

अ॒ज्जा॒नाऽअ॒भ्य॒भ्यञ्जा॒नाऽअ॒ञ्जा॒नाऽअ॒भि। (पद १७।९० सं० १७।९७)।

व्विस्वं॑÷ स्व॒र्व्वि विस्वं॑÷ (पद ७।४१ सं० ७।४५)।

य॒ज्ञो भ्यभि य॒ज्ञो य॒ज्ञोऽभि (पद १७।९० सं० १७।९७)

ते॒ऽप्स॒रसा॑मप्स॒रसा॑ ते ते॒ऽप्स॒रसा॑म् (पद २४।३७ सं० २४।३७)

अ॒भी॒न्धताभिन्धतामभ्य॒भी॒न्धताम् (पद० ११।५८ सं० ११।६१)

इत्यादिप्रकारेण बोध्यम्।

[विकृतिपाठेषु विशेषोपलब्ध संस्कारनिर्देशः]

[उकारस्य 'व' भावः]

प्रातिशाख्येऽनुक्तत्वाद् व्याकरणस्थान् विधीन् दर्शयति—

सवर्णेऽपृक्त उः स्पर्शात् स्वरे याति वतामिह ॥

जटायां सवर्णे स्वरे परे स्पर्शात् परः 'उ' इति शब्दो वकारभावं याति। यथा[1]—

उदु॒ त्यन्त्यम्वुदुदुत्त्य॒म् (पद० ७।३९ सं० ७।४१)

—अत्र 'मय उञो वो वा' (पा० ८।३।३३) इति वकारः[2]।

[उकारस्य प्रगृह्यत्वम्]

स एव सन्धिनान्यैक्यमापन्नोऽपि प्रगृह्यकः ॥ ७ ॥

सन्धिविधायकेन शास्त्रेण अन्येन सहैक्यमापन्नोऽपि 'उ' इति शब्दः प्रगृह्यः। यथा[3]—

१. ऊ॒र्ध्वऽऊ षु णो॑ न॒ऽ सूऽ ऊ॒र्ध्वऽऊ॒र्ध्वऽ ऊ षु णं÷। (पद ११।३९ सं० ११।४२)

२. उदु॑ त्वा त्वो॒ऽउदुदु॑ त्वा (पद० १२।२७ सं० १२।३१)

अत्र [4]ऊकारस्य (१ उदाहरणे) ओकारस्य (२ उदाहरणे) च 'अन्तादिवच्च' (पा० ६।१।८५) इति[5] परादि[6]त्वात् एकाज्निपातत्वेन 'निपात एकाजनाङ्' (पा० १।१।१४) इति प्रगृह्यत्वम्।

---

१. यथा नास्ति क. ख. घ

२. भवतीति विशेषः ङ

३. यथा नास्ति क ख. घ.

४. उकारस्य ङ

५ चेत्यनेन पाठः ङ

६. परादिवत्त्वात् ङ

[ओकारस्य प्रगृह्यत्वम्]

ओकारान्तनिपातानां व्युत्क्रमेऽस्ति प्रगृह्यता ॥

यथा[1]—

१—उपो' ते तुऽ उपोऽउपो'ते (पद० ७।६ सं० ७।७)

२—अथो वे ये थोऽ अथो वे (पद० १६।८ सं० १६।८)

'ओत्' (पा० १।१।१५) इत्यनेन प्रगृह्यत्वम् । 'ओकारश्च' (ज्यो० ५१६ शु० प्रा० ४।९२) इत्यनेन विहितप्रगृह्यत्वनिमित्तप्रकृतिभावस्तु इतौ (ज्यो० ५१६ शु० प्रा० ४।९१ अनुवृत्तिः) प्रकृतिभावविधानादन्यत्र न । अत एव—

वित्रष्णणवे_ते (सं० ५।१६ पद० ५।१६)

इत्यत्र[2]अवादेशः ।

[3]अथो वेऽ अंस्य (सं० १६।८ पद० १६।८)

[4]अथोऽ अन्नंस्य (सं० ३।४३ पद० ३।४२)

—इत्यादौ तु 'प्रकृतिभावऽ ऋक्षु' (ज्यो० १३३ प्रा० ४।८१) इत्यनेन प्रकृतिभावत्वम्[5] ।

[आ + ॐ एतयोः पूर्वरूपसन्धिविधानम्]

सपूर्वाकार ओङ्कारः प्रयात्योम्भावमत्र हि ॥८॥

पूर्वेण अकारेण सहित ॐ शब्दो जटायाम् ओम्भावं प्रयाति । यथा[6]—

ओम्प्रप्रोमोम्प्र०[7] (पद० २।१३ सं० २।१३ जटा)

अत्र 'ओमाङोश्च' (पा० ६।१।९५) इत्यनेन पररूपत्वम्[8] ।

---

१. नैतत्पदं क. ख.
२. इत्यवादेशः क. ख. घ.
३. नैतदुदाहरणं ङ
४. एतदुदाहरणं ङ एव
५. नैतत्पदं ख.
६. यथा नास्ति क. ख. घ.
७. ॐ प्र द्वयोरप्युदात्तत्वात्स्वरचिन्हाभावः ।
८. पररूपम् इति क. ख. घ.

[प्रोक्तनियमानां सर्वासु विकृतिषु व्यवस्थापनम्]

अयमेव हि शास्त्रार्थः सर्वासु विकृतिष्वपि ॥८॥

जटोक्त एव शास्त्रार्थो मालादिसप्तसु विकृतिषु बोध्यः ।

[मालाख्यविकृतिलक्षणम्]

[मालाभेदौ, सामान्य माला लक्षणम् च]

[1]अथ माला । सा द्विविधा—पुष्पमाला क्रममाला च । पुष्पमालालक्षणमाह—

माला मालेव पुष्पा[2]णां पदानां ग्रन्थिनो हि सा ।
आवर्त्तन्ते त्रयस्तस्यां क्रम-व्यु[3]त्क्रम-सङ्क्रमाः ॥

[4]अस्यार्थः—यथा पुष्पाणां माला ग्रन्थिनो परस्परसम्बन्धकारिणी तथा पदानां परस्परसम्बन्धकारिणी या विकृतिः सा माला । तस्याः पठनप्रकारमाह—तस्यां मालायां जटोक्तपञ्चक्रममध्ये त्रयः क्रम-व्युत्क्रम-सङ्क्रमाः आवर्त्तन्ते = पदावृत्त्या पठ्यन्ते ।

यथा[5]—

सुसमिद्धाय शोचिषे । शोचिषे सुसमिद्धाय[6] । सुसमिद्धाय शोचिषे । सुसमिद्धायेति सु । समिद्धाय । शोचिषे घृतम् । घृत ठं० शोचिषे । शोचिषे घृतम् । घृतन्तीव्रम् । तीव्रङ्घृतम् । घृतन्तीव्रम् । तीव्रं जुहोतन । जुहोतनतीव्रम् । तीव्रञ्जुहोतन । जुहोतनेति जुहोतन ॥

अग्नये जातवेदसे । जातवेदसेऽग्नये । अग्नये जातवेदसे । जातवेदसऽइति जात । वेदसे ॥ [पद० ३।२ सं० ३।२]

---

१. अथ ···माह इति पाठः नास्ति ङ पुस्तके ।

२. पुष्पाणां ङ

३. व्यत्क्रम ख.

४. 'अस्यार्थः'·····इत्यारभ्य 'पदावृत्त्या पठ्यन्ते' पर्यन्तं पाठः नास्ति शि.

५. यथा नास्ति क. ख. घ.

६. इत उत्तरम् 'इत्यादि' इति लिखित्वा उदाहरणपरिसमाप्तिः शि.

[क्रममालालक्षणम्]

अथ क्रममाला[1]लक्षणमाह—

ब्रूयात्क्रम—विपर्य्यासावर्द्धर्च्चस्यादितोऽन्ततः ।
अन्तं चादिनयेदेवं क्रममालेति गीयते ॥ ६ ॥

[2]अस्यार्थः—अर्द्धर्च्चस्य आदितः क्रमं, अन्ततः विपर्यासं क्रमेण पठेत् । अनेन प्रकारेण क्रमम् अन्तं नयेत्,[3] विपर्यासम् आदिं प्रापयेत् सा क्रममालेति ऋषिभिरुच्यते । यथा[4]—

त्रिꣳशद्धाम ।धीयतऽइति धीयते ।
धाम व्वि । धीयते पतङ्गाय ।
व्विराजति । पतङ्गाय व्वाक् ।
राजति व्वाक् । व्वग्राजति ।
व्वाक्पतङ्गाय । राजतिव्वि ।
पतङ्गाय धीयते । व्विधाम ।
धीयतऽइति धीयते । धाम त्रिꣳशत्[5] ॥

प्रति वस्तोरहः । द्युभिरिति द्यु । भिः ।
व्वस्तोरह । द्युभिरह ।
अह द्युभिः । अहर्व्वस्तोरहः ।
द्युभिरितिद्यु । भिः । व्वस्तोः [6]प्रति ॥ (पद० ३।८ सं० ३।८)

[शिखा विकृतिलक्षणम्]

अथ शिखा । [7]तल्लक्षणमाह—

पदोत्तरां[8] जटामेव शिखामार्य्याः प्रचक्षते ॥

---

१. लक्षणमाह नास्ति शि.
२. अस्यार्थः नास्ति शि.
३. येद् ङ
४. यथा नास्ति शि.
५. इत उत्तरम् 'इत्यादि' ना उदाहरणसमाप्तिः । शि.
६. प्रति नास्ति ङ
७. तत् नास्ति ङ, तल्लक्षणमाह नास्ति शि.
८. त्तरं ख.

अस्यार्थः[1]—पूर्वोक्तां जटामेव अन्ते एकपदाधिकां शिखां विकृतिं मुनयः[2] आहुः। यथा[3]—

अन्तश्च॑रति चरत्यन्तरन्तश्च॑रति रोच॒ना[4]। अन्तरित्य॒न्तः। च॒र॒ति रो॒च॒ना रो॑च॒ना च॑रति चरति रोच॒नास्य। [5]रो॒च॒नास्यास्य रोचना रो॑च॒नास्य प्प्रा॒णात्। अ॒स्य प्प्रा॒णात्प्रा॒णादस्यास्य प्प्रा॒णाद॑पान॒ती। प्रा॒णाद॑पान॒त्यपा॑न॒ती प्प्रा॒णात्प्रा॒णाद॑पान॒ती। अ॒पा॒न॒तीत्य॑प। अ॒न॒ती॥

व्व्यं॑वख्यदक्ख्य॒द्विव्व्यं॑क्ख्यन्न्महि॒षः। अ॒क्ख॒ यन्न्म॒हि॒षो म॑हि॒षोक्ख्यं॑दक्ख्यन्न्म-हि॒षो दिवं॑म्। म॒हि॒षो दिव॒न्दिवं॑म्महि॒षो म॑हि॒षो दिवम्। दिवं॑मिति॒ दिवं॑म्॥ (पद० ३।७ सं० ३।७)

[रेखा विकृतिलक्षणम्]

अथ रेखा। त[6]ल्लक्षणमाह—

क्रमाद् द्वि-त्रि-चतुः-पञ्चपदक्रममुदाहरेत्।
पृथक् पृथग्विपर्यस्य रेखामाहुः पुनः क्रमात्॥ १०॥

अस्यार्थः-[7] क्रमेण द्विपद—त्रिपद-चतुष्पद-पञ्चपद—क्रमानुक्त्वा[8] प्रतिक्रमे पृथक्-पृथक् विपर्यासेन पठित्वा पुनः क्रमं पठेत्, तां विकृतिं रेखामाहुः।

[पूर्णमन्त्रानुसृतो रेखापाठः[9]]

यथा[10]—(२ पदे) मधुनक्तं॑म्। नक्त॒म्मधु॑। मधु नक्तं॑म्।

(३ पदानि—) नक्त॒मुतोषसं॑÷। उ॒षसऽउ॒त नक्तं॑म्। नक्तं॑मु॒त। उ॒तोषसं॑÷।

(४ पदानि—) उ॒षसो मधु॑म॒त्पार्त्थिवं॒ रजं॑÷। रजः पार्थिवम्मधु मदु॒ षसं॑÷। उ॒षसो॒ मधु॑मत्। मधु॑म॒त्पार्थिवम्। मधु॑म॒दिति॒ मधु॑। मत्। पार्त्थिव॒ ठं० रजं॑÷ रजंऽइति रजं॑÷॥

---

१. अस्यार्थः नास्ति शि.
२. बुद्धिमन्तः इति ङ
३. नैतत्पदं क. ख. घ. शि.
४. इत उत्तरं 'इत्यादि' शब्देनोदाहरणपूर्तिरनुध्याता। शि.
५. 'रोचना''''प्राणात्' नास्ति ङ
६. तत् नास्ति ङ तल्लक्षणमाह नास्ति शि.
७. पदद्वयमेतन्नास्ति शि.
८. नुक्त्वा शि.
९. पूर्णमन्त्रानुसृतो रेखापाठः शि० नास्ति। तस्मात्तत्र नैतदुदाहरणम्।
१०. यथा नास्ति शि०

[२—अर्द्धर्चगामी रेखापाठः][1]

[ऋचः पूर्वार्द्धे रेखापाठः]

(२ पदे—) व्विदद्माते॑। ते॒ व्वि॒द्म। व्वि॒दद्माते॑।

(३ पदानि-) ते॒ऽअ॒ग्ने॒ त्रे॒धा। त्रे॒धाग्ने॒ते। ते॒ऽअ॒ग्ने॒। अ॒ग्ने॒ त्रे॒धा[२]।

(४ पदानि—) त्रे॒धा त्र॒याणि॑ व्वि॒दद्माते॑। ते॒ व्वि॒द्म त्र॒याणि॑ त्रे॒धा[२]। त्रे॒धा[३] त्र॒याणि॑। त्र॒याणि॑ व्वि॒द्म। व्वि॒दद्माते॑।

[५ पदानि[४]-] ते॒ धाम॒ व्विभृ॑ता पु॒रु॒त्रा। पु॒रु॒त्रा व्विभृ॑ता धाम॑ ते। ते॒ धाम॑। धाम॒ व्विभृ॑ता। व्विभृता पुरु॒त्रा। व्विभृ॒तेति॒ वि। भृ॑ता। पु॒रु॒त्रेति॑ पुरु। त्रा।

[ऋचः उत्तरार्द्धे रेखापाठः]

(२ पदे-) व्वि॒द्माते॑। ते॒ व्वि॒द्म। व्वि॒द्माते॑।

(३ पदानि—) ते॒ नाम॑ प॒र॒म[५]म्। प॒र॒मन्नाम॑ ते। ते॒ नाम॑। नाम॑ प॒र॒मम्।

(४ पदानि) प॒र॒मङ्गुहा॒ यद्विद्म। व्वि॒द्म यद्गुहा प॒र॒मम्। प॒र॒मङ्गुहा॑। गुहा यत्। यद्विद्म।

(५ पदानि—) व्वि॒दद्मा॒ तमु॒त्स॑ᳬयत॑ आ ज॒गन्थ॑। आज॒गन्थ॒ यत॒ऽउत्स॒न्त॑व्वि॒द्म। व्विद्मातम्। तमुत्सम्। उत्स॒ᳬयत॑÷। यत॑ऽआज॒गन्थ॑। आ॒ज॒गन्थेत्या॑। ज॒गन्थ॑॥ (पद० १२।१८ सं० १२।१९)

[ध्वजविकृतिलक्षणम्]

अथ ध्वजः। [६]तल्लक्षण[७]माह—

[८]ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेदिति॥
वर्गे[९] वा ऋचि वा यस्य पठनं स ध्वजः स्मृतः॥११॥

अस्यार्थः[१०]-वर्गे वा[११] ऋचि वा आदेः क्रमं अन्तपर्य्यन्तं ब्रूयात्। अन्तात्सम्यग्=

---

१. अर्द्धर्चगामी रेखापाठः घ. क. ङ पुस्तकेषु नास्ति। शि. पुस्तकेऽस्ति। तत्रापि स्वराभावः। विदुषां तोषायास्माभिः स्वरसन्निवेशः कृतः।

२. 'त्रेधा' पदं 'त्रयाणि' इत्यतः पूर्वं शि. तदशुद्धम्।

३. 'त्रेधा त्रयाणि' अयं क्रमो नास्ति शि.। स आवश्यकः।

४. अत्र पञ्च पदानि न सन्ति। तस्मात् प्रतिशाख्यप्रदीपशिक्षाकृता कथमेतदुदाहरणं गृहीतमिति सुधियो विचारयन्तु.

५. 'परम्' इति शि.

६. तत् नास्ति ङ घ.

७. ण नास्ति ख.

८. ब्रूया घ.

९. वर्ग शि.

१०. अस्यार्थः नास्ति शि.

११. वा नास्ति ङ. घ.

यथोक्तं क्रममेव उत्तारयेत् = आदि पर्य्यन्तं पठेत्। एवं यस्य पठनं स ध्वजः[१] = ध्वजाख्यविकृतिर्बोध्या। यथा[२]—

विष्णोः कर्म्माणि। सखेति सखा।
कर्माणि पश्यत। युज्यः सखा।
पश्यत यतः। इन्द्रस्य युज्यः।
यतो व्रतानि। पस्पशइति पस्पशे[३]।
व्रतानि पस्पशे। व्रतानि पस्पशे।
पस्पशऽ इति पस्पशे। यतो व्रतानि। इन्द्रस्य युज्यः। पश्यत यतः। युज्यः सखा। कर्माणि पश्यत। सखेति सखा। विष्णोः कर्म्माणि॥ (शु० य० सं० १।६।४ पद० ६।३)।

[दण्डविकृतिलक्षणम्]

[४]अथ दण्डः। तल्लक्षणमाह—

क्रममुक्त्वा विपर्य्यस्य पुनश्च क्रममुत्तरम्।
आ[५]ऽर्द्धर्चादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते॥ १२॥

क्र[६]ममुक्त्वा, अर्धर्चात् = अर्द्धर्चादिपर्यन्तं पुनः पुनः विपर्यस्य, पुनः क्रमं अर्द्धर्चसमाप्तिपर्यन्तं पठेत्। एवमुक्तोविकृतिविशेषः 'क्र[७]मदण्ड' इत्युच्यते॥
[८]स यथा—

---

१. 'स' इत्यनन्तरं 'ध्वजनामा विकृतिः' इति वाक्यपरिसमाप्तिः शि.

२. 'यथा' नास्ति शि.

३. इत उत्तरम् ङ पाठः सस्वरः एवम्—व्रतानि पस्पशे। व्रतानि पस्पशे। यतो व्रतानि। पस्पश इति पस्पशे। व्रतानि पस्पशे। व्रतानि पस्पशे। यतो व्रतानि। पस्पश इति पस्पशे। पश्यत यतः। इन्द्रस्य युज्यः। कर्माणि पश्यत। युज्यः सखा। विष्णोः कर्म्माणि। सखेति सखा॥
—अयं पाठः ध्वजनियमेन न संवदतीत्यशुद्धः।
'व्रतानि पस्पशे''''इति पस्पशे' इत्याद्यो भागो नास्ति घ। अन्यत्सर्वं ङ पुस्तकेन समानमेव घ पुस्तके।

४. अथ क्रमदण्डलक्षणमाह घ. ङ., 'तल्लक्षणमाह' नास्ति शि.

५. अर्द्धर्चा ख. शि.

६. क्रममनुलोममुक्त्वा, विपर्य्यस्य विलोममुक्त्वा पुनः क्रमं पठित्वा चकारादनुलोमविलोमैः अर्द्धर्च्चसमाप्तिपर्यन्तं ब्रूयात्। द्वितीयार्द्धर्चादिवमेवोक्त्वाऽनुलोमविलोमैरर्द्धर्चान्तम्पठित्वा एवं क्रमदण्ड इत्युच्यते।—श्लोकस्यैतद् व्याख्यानं घ. ङ. उपलभ्यते।

७. क्रमशब्दो नास्ति शि.

८. स यथा नास्ति शि,

यजा॑ नः॒ । नो॒ यज॑ । यजा॑ नः॒ ।

नो॒ मि॒त्रा वरु॑णा । मि॒त्रा वरु॑णा नो॒ यज॑ । यजा॑ नः॒ । नो॒ मि॒त्रावरु॑णा[1] ।

मि॒त्रावरु॑णा॒ यज॑ । यज॑ मि॒त्रावरु॑णा नो॒ यज॑ । यजा॑ नः । नो॒ मि॒त्रावरु॑णा ।

मि॒त्रावरु॑णा॒ यज॑ ।

यजा॑ दे॒वान्[2] । दे॒वान्यज॑ मि॒त्रावरु॑णा नो॒ यज॑ । यजा॑नः॒ । नो॒ मि॒त्रावरु॑णा ।

मि॒त्रा वरु॑णा॒ यज॑ । यजा॑ दे॒वान् ।

दे॒वाँ २ ॥ ऽऋ॒तम् । ऋ॒तन्दे॒वान्यज॑ मि॒त्रावरु॑णा नो॒ यज॑ । यजा॑ नः॒ । नो॒

मि॒त्रा वरु॑णा । मि॒त्रावरु॑णा॒ यज॑ । यजा॑ दे॒वान् । दे॒वाँ २॥ऽ ऋ॒तम् ।

ऋ॒तम्बृ॒हत् । बृ॒हदृ॒तं दे॒वान्यज॑ मि॒त्रावरु॑णा नो॒ यज॑ । यजा॑नः॒ । नो॒

मि॒त्रावरु॑णा । मि॒त्रावरु॑णा॒ यज॑ । यजा॑ दे॒वान् । दे॒वाँ २॥ ऽऋ॒तम् ।

ऋ॒तम्बृ॒हत् । बृ॒हदिति॑ बृ॒हत् ॥

अग्ग्ने॒ यक्षि॑ । यक्ष्यग्ग्ने॑ । अग्ग्ने॒ यक्षि॑ ।

यक्षि॒ स्वम् । स्वँय्यक्ष्यग्ग्ने॑ । अग्ग्ने॒ यक्षि॑ । यक्षि॒ स्वम् ।

स्वन्दम॑म् । दम॒ᳪ स्वँय्यक्ष्यग्ग्ने॑ । अग्ग्ने॒ यक्षि॑ । यक्षि॒ स्वम् । स्वन्दम॑म् ।

दम॒मिति॒ दम॑म् ॥ (पद० ३३।३ सं० ३३।३)

[रथविकृतिलक्षणम्]

अथ रथः । [3]तल्लक्षणमाह—

[4]समे ऋचौ गृहीत्वा च रथवच्चलति क्रमः ।
पादशोऽर्द्धर्चशो वाऽपि सहोक्त्या दण्डवद्रथः ॥ १३ ॥

[5]पादे पादे अर्द्धर्चि वा क्रमविपर्य्यासौ दण्डवत्सह उक्तौ चेत्स विकृतिविशेषो 'रथ' इत्युच्यते[6] । [7]यथा—

---

१. इत उत्तरं शि. पाठः—'मित्रावरुणा नो यज । यजानः । नो मित्रावरुणा' इति पाठः अशुद्धः ।

२. इति उत्तरं 'अनेन प्रकारेण अर्द्धर्चं समासिपर्यन्तं पठेत्' ङ. इत्युपसंहृतम् शि

३. तत् नास्ति घ. ङ 'तल्लक्षणमाह' नास्ति शि

४. 'समे ऋचौ' इत्यर्घो नास्ति ङ.

५. 'ऋचि अर्द्धर्चि पादे वा' इति शि

६. इत उत्तरं शि. पुस्तके केवलं 'अर्द्धर्चसहचारिणः समक्रमस्य रथस्य उदाहरणं दत्तं तदत्र अग्रे प्रदर्शितम् । उदाहरणान्ते—'ज्योत्स्नायां प्रकारत्रयेण रथ उक्तः स तत्रैव द्रष्टव्यः ।' इति लिखितम् ।

७. इतः पूर्वं 'समिधेति सम् । इधा' इत्यवग्रहपाठः ङ । स सम्प्रदायविरुद्धत्वादशुद्धः ।

[पादसहचारी व्युत्क्रमावसानको रथः]

सुमिधाग्निम् । अग्नि ᳪ सुमिधा ।

घृतैर्बोधयत । बोधयत घृतैः ।

सुमिधाऽग्निम् । सुमिधेति सुम् । इधा । अग्निन्दुवस्यत । दुवस्यताग्नि ᳪ सुमिधा । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिम्बोधयत घृतैः ।

सुमिधाग्निम् । सुमिधेति सुम् । इधा । अग्निन्दुवस्यत । दुवस्यत घृतैः । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् ॥[1] (शु० य० सं० ३।१ । पद ३।१) इति पादानुसृतः ॥[2]

[अर्द्धर्चसहचारी व्युत्क्रमावसानको रथः]

[3]अथार्द्धर्चानुसृतः लिख्यते ।[4]

[5]ऋधगित्था । इत्थ ऋधक् ।

यो नू नम् । नू नं यः ।

ऋधगित्था । इत्था सः । स इत्थ ऋधक् ।

यो नू नम् । नू नं मित्रावरुणौ । मित्रावरुणौ नू नं यः । ऋधगित्था । इत्था सः । स मर्त्यः । मर्त्य ᳪ स इत्थ ऋधक् । यो नू नम् । नू नं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टये मित्रावरुणौ नू नं यः ।

ऋधगित्था । इत्थासः । स मर्त्यः । मर्त्यः शशमे । शशमे मर्त्य ᳪ स इत्थ ऋधक् ।

---

१. मन्त्रगतशिष्टांशस्य पाठः प्रभायां द्रष्टव्यः ।

२. 'इति पादानुसृतः' नास्ति घ; सारतः ङ. ।

३. अथ नास्ति ख. । ४. 'लिख्यते' नास्ति ख. घ. ।

५. ङ पुस्तके मन्त्रस्यास्य रथपाठोऽधोलिखितः । सचाशुद्धः ।

ऋधगित्था । इत्थऋधक् । योनू नम् । नू नंय्यः । ऋधगित्था । इत्थास । स इत्थ ऋधक् । योनू नम् । नूनं मित्रावरुणौ । मित्रावरुणौ नू नय्यः । ऋधगित्था । इत्थास । समर्त्यः । मर्त्यः शशमे । शशमे देवतातये । देवतातये शशमे । मर्त्यः सइत्यऋधक् । यो नू नम् । नू नं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टयऽ आचक्रे । आचक्रे हव्यदातये । हव्यदातयऽआचक्रेऽभिष्टये मित्रावरुणौ नू नं य्यः । ऋधगित्था । इत्था सः । समर्त्यः । मर्त्यः शशमे । शशमे देवतातये । देवतातयऽइति देव । तातये ॥ यो नू नम् । नू नं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टयऽ आचक्रे । आचक्रेहव्यदातये । आचक्रइत्या । चक्रे । हव्यदातय इति हव्य । दातये ।

यो नू॒नम् । नू॒नं मि॒त्रावरु॑णौ । मि॒त्रावरु॑णाव॒भिष्ट॑ये । अ॒भिष्ट॑य आच॒क्रे । आ॒च॒क्रेभिष्ट॑ये मि॒त्रावरु॑णौ नू नं य३ः ।

ऋध॑ गि॒त्था । इ॒त्था स३ः । स मर्त्यं॑ ÷ । मर्त्यं॑ ÷ शश॒मे । श॒श॒मे दे॒वता॑तये । दे॒वता॑तये शश॒मे मर्त्यं॒ ६ं स इ॒त्थ ऋध॑क् ।

यो नू॒नम् । नू॒नं मि॒त्रावरु॑णौ । मि॒त्रावरु॑णाव॒भिष्ट॑ये । अ॒भिष्ट॑य आच॒क्रे । आ॒च॒क्रे ह॒व्यदा॑तये ।[1] ह॒व्यदा॑तय आच॒क्रे भिष्ट॑ये मि॒त्रावरु॑णौ नू॒ नं य३ः ।

ऋध॑गि॒त्था । इ॒त्था स३ः । समर्त्यं॑ ÷ । मर्त्यं॑ ÷ शश॒मे । श॒श॒मे दे॒वता॑तये । दे॒वता॑तय॒ इति॑ दे॒व । ता॑तये ॥

यो नू॒नम् । नू॒नं मि॒त्रावरु॑णौ । मि॒त्रावरु॑णाव॒भिष्ट॑ये ।

अ॒भिष्ट॑य आच॒क्रे । आ॒च॒क्रे ह॒व्यदा॑तये ।

आ॒च॒क्र इत्या॑ । च॒क्रे । ह॒व्यदा॑तय॒ इति॑ ह॒व्य । दा॑तये । (पद ३३।७७ सं० ३३।८७)

उभयोः[2] पादार्द्धर्च्चर्योरपि द्वितीयः प्रकारः कथ्यते—

[पादसहचारी सङ्क्रमानुक्रमयोगी रथः]

मि॒त्र६ हु॑वे । व्वरु॑णञ्च ।

हु॒वे मि॒त्रम् । च॒ व्वरु॑णम् ॥

मि॒त्र६ हु॑वे । हु॒वे॒ पू॒तद॑क्षम् ।

व्वरु॑णञ्च । च॒ रि॒शाद॑सम् ॥

पू॒तद॑क्ष६ हुवे मि॒त्रम् । रि॒शाद॑सञ्च॒ व्वरु॑णम् ।

मि॒त्र६ हु॑वे । हु॒वे॒ पू॒तद॑क्षम् । पू॒तद॑क्ष॒ं व्वरु॑णम् ।

पू॒तद॑क्ष॒मिति॑ पू॒तद॑क्षम् ।

व्वरु॑णञ्च । च॒ रि॒शाद॑सम् । रि॒शाद॑स॒मिति॑ रि॒शा । द॑सम् ॥[3] (पद० ३३।५१ सं० ३३।५७) इत्येकः[4] ।

अथ द्वितीयः[5]—

---

१. आचक्र इत्या । चक्रे । अपेक्षितम् ।

२. विसर्गो नास्ति घ.

३. शिष्टस्य पादस्य पूर्त्तिविषये प्रभा द्रष्टव्या ।

४. प्रकारः इत्यधिकम् घ. ङ

५. प्रकारः इत्यधिकम् घ ङ ।

[अर्द्धर्चं सहचारी सङ्क्रमानुक्रमयोगी रथः]

मि॒त्रो व्वरु॑णः । इन्द्रो॒ बृह॒स्पति॑ः ॥

व्वरु॑णो मि॒त्रः । बृह॒स्प्पति॒रिन्द्र॑ः ॥

मि॒त्रो व्वरु॑णः । व्वरु॑णो भवतु[१] ।

इन्द्रो॒ बृह॒स्पति॑ः । बृह॒स्पति॒ व्विष्णु॑ः ॥

भ॒वतु॒ व्वरु॑णो मि॒त्रः । व्विष्णु॒र्बृह॒स्प्पति॒रिन्द्र॑ः ॥

मि॒त्रो व्वरु॑णः । व्वरु॑णो भवतु । भ॒व॒त्त्व॒र्य्य॒मा ।

इन्द्रो॒ बृह॒स्प्पति॑ः । बृह॒स्प्पति॒र्व्विष्णु॑ः । व्विष्णु॑रुरुक्र॒मः ॥

अ॒र्य्य॒मा भ॒वतु॒ व्वरु॑णो मि॒त्रः । उ॒रु॒क्र॒मो व्विष्णु॒र्बृह॒स्प्पति॒रिन्द्र॑ः ॥

मि॒त्रो व्वरु॑णः । व्वरु॑णो भवतु । भ॒व॒त्त्व॒र्य्य॒मा ।

अ॒र्य्य॒मेत्य॑र्य्य॒मा । इन्द्रो॒ बृह॒स्प्पति॑ः ।

बृह॒स्प्पति॒र्व्विष्णु॑ः । व्विष्णु॑रुरुक्र॒मः ॥

उ॒रु॒क्रमऽ इत्यु॑रुक्र॒मः ॥ (पद ३६।५ सं० ३६।९)

उभयोरपि तृतीयः प्रकारः—

[पादसहचारी सङ्क्रमावसानको रथः]

अ॒न्तश्च॑रति । च॒र॒त्य॒न्तः । अ॒न्तश्च॑रति ।

अ॒स्य प्प्रा॒णात् । प्रा॒णाद॒स्य । अ॒स्य प्प्रा॒णात् ।

च॒र॒ति॒ रो॒च॒ना । रो॒च॒ना च॑रत्य॒न्तः । अ॒न्तश्च्च॑रति[२] । अ॒न्तरित्य॒न्तः । च॒र॒ति॒रो॒च॒ना ।

प्रा॒णाद॑पान॒ती । अ॒पा॒न॒ती प्प्रा॒णाद॒स्य ।

रो॒च॒नास्य ।

अ॒स्य प्रा॒णात् । प्प्र॒णाद॑पान॒ती । अ॒पा॒न॒तीत्य॑प । अन॒ती । (पद० ३।७ सं० ३।७) इत्येकः ।

[अर्द्धर्चंसहचारी समक्रमो रथः]

[[१]द्वितीयमुदाहरणम्]

धा॒नाना॑ᳯ रू॒पम् । सक्तू॑नाᳯ रू॒पम् ॥

---

१. 'इन्द्रो बृहस्पतिः' इत्यनन्तरं 'वरुणोभवतु' घ.

२. ङ—अन्तश्चरति इति द्विरावृत्तम्, तदशुद्धम् ।

१ इदमेकमेवोदाहरणं शि. पुस्तके । अन्यत्र पुस्तकेषु नैतदुदाहरणं दृश्यते । शि. पुस्तकेऽपि स्वराङ्कनं नास्ति । तदत्रास्माभिर्विद्वद्भिः सन्तोषाय स्वराङ्कनं विहितम् ।

रूपन्धानाना॑म् । रूप ६ सक्तू॑नाम् ॥
धाना॒ना॑ ओं रूपम् । सक्तू॑ना ओं रूपम् ॥
रूपङ्कुव॑लम् । रूपम्बद॑रम् ॥
कुव॑ल ६ रूपन्धानाना॑म् । बद॑र ६ रूप ६ सक्तू॑नाम् ॥
धाना॒ना॑ ओं रूपम् । सक्तू॑ना ओं रूपम् ॥
रूपङ्कुव॑लम् । रूपम्बद॑रम् ॥
कुव॑लम्परीवापस्य॑ । बद॑रमुपवाका॑३ः ॥
परि॒वा॒पस्य॒ कुव॑ल६ रू॑पन्धानाना॑म् ।
उ॒प॒वाका॒बद॑र ६ रूप ६ सक्तू॑नाम् ॥
धाना॒ना॑ ओं रूपम् । सक्तू॑ना ओं रूपम् ।
रूपङ्कुव॑लम् । रूपम्बद॑रम् ॥
कुव॑लम्परीवापस्य॑ । बद॑रमुपवाका॑३ः[२] ॥
परी॒वा॒पस्य॑ गो॒धूमा॑३ः । उ॒प॒वाका॑३ः कर॒म्भस्य॑ ॥
गो॒धूमा॑३ः परिवा॒पस्य॒ कुव॑ल ६ रूपन्धानाना॑म् ।
क॒र॒म्भस्यो॑पवा॒का॒ बद॑र ६ रूप ६ सक्तू॑नाम् ॥
धाना॒ना॑ ओं रूपम् । सक्तू॑ना ओं रूपम् ॥
रूपङ्कुव॑लम् । रूपम्बद॑रम् ॥
कुव॑लम्परीवापस्य॑ । बद॑रमुपवाका॑३ः ॥
परी॒वा॒पस्य॑ गो॒धूमा॑३ः । उ॒प॒वाका॑ः करम्भस्य॑ ।
प॒रि॒वा॒पस्येति॑ परि । व्वा॒पस्य॑ । उ॒प॒वाका॒ऽइत्यु॑प॒ । व्वाका॑३ः ॥
गो॒धूमा॒ इति॑ गो॒धूमा॑३ः । क॒र॒म्भस्येति॑ क॒र॒म्भस्य॑ ॥

[सं० १९।२२ पद० १९।२०]

[अर्द्ध॑र्चं सहचारी सङ्क्रमावसानको रथः]

अथ द्वितीयः[३]—

धा॒नाव॑न्तं कर॒म्भिणम् । क॒र॒म्भिणन्धा॒नाव॑न्तम् । धा॒नाव॑न्तं कर॒म्भिणम्[४] ।
इन्द्र॑प्प्रा॒तः । प्रा॒तरिन्द्रः॑ । इन्द्र॑ प्प्रा॒तः ।

---

१. 'रूपन्धानानाम् ।........बदर ६ रूप ६' अयं पाठस्त्रुटितः शि.

२. इत उत्तरम् 'परीवापस्य गोधूमाः । उपवाकाः' इत्यंशस्त्रुटितः शि.

३. प्रकारः इत्यधिकं घ

४. धानावन्तमिति धाना । व्वन्तम् । अपेक्षितम्

करम्भिणंमपूपवंन्तम् । अपूपवंन्तं करम्भिणं धानावंन्तम् । धानावंन्तं करम्भिणंम् । धानावंन्तमिति धाना । वंन्तम्[1] । करम्भिणंमपूपवंन्तम्[2] । प्रातर्जुंषस्व । जुषस्व प्प्रातरिन्द्रं । इन्द्रं प्प्रात? । प्रातर्ज्जुंषस्व । अपूपवंन्तमुक्थिनंम् । उक्थिनंमपूपवंन्तं करम्भिणं धानावंन्तम् । धानावंन्तं करंभिणंम् । धानावंन्तमितिधाना । व्वंन्तम् । करम्भिणंमपूपवंन्तम् । अपूपवन्तमुक्थिनंम् । अपूपवंन्तमित्यंपूप । व्वंन्तम् । उक्थिनमित्युक्थिनंम् । जुषस्वनः । नो जुषस्व प्प्रातरिन्द्र । इन्द्रंप्प्रात? । प्रातर्जुंषस्व । जुषस्वनः । नऽइति नः ॥ (पद २०।२३ सं० २०।२९) ।

॥ घनविकृतिप्रकरणम् ॥

अथ घनः । स द्विविधः[3]—

[विपरीतक्रमोच्चारणात्मकोघनः]

अन्तात्क्रमं पठेत्पूर्वमादिपर्य्यन्तमानयेत् ।
आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥ १४ ॥

[4]यथोक्तं क्रममेव अन्तमारभ्य आदिपर्यन्तं पूर्वं पठेत् । तत आदिमारभ्य अन्तपर्यन्तं क्रमं पठेत्, पण्डितास्तं घनमाहुः । यथा—

अतिथिमित्यतिथिम् । ब्रोधयतातिथिम् ।
घृतैर्बोधयत । दुवस्यतघृतैः ।
अग्निन्दुवस्यत । समिधाग्निनम् ।
समिधेति सम् । इधा ।
अग्निन्दुवस्यत । दुवस्यत घृतैः ।
घृतैर्बोधयत । बोधयतातिथिम् ।
अतिथिमित्यतिथिम् । ।[5]

१. धानावन्तमिति धाना । व्वन्तम् । नास्ति घ.
२. 'अपूपवन्तं करम्भिणम् ।' इत्यारभ्य 'मपूपवन्तम्' । इत्यन्तः पाठो द्विरावृत्तः ख.
३. अथ……द्विविधः नास्ति घ., एतत्स्थाने 'अथ द्विविधघनलक्षणमाह' ङ
४. व्याख्या नास्ति शि.
५. 'इत्यादि' ना उदाहरणसमाप्तिः शि.

जु॒हो॒त॒नेति॑ जुहोतन । ह॒व्याजु॑होतन ।

अ॒स्मि॒न् ह॒व्या । आस्मिं॑न् । आस्मि॑न् । अ॒स्मि॒न्ह॒व्या ।

ह॒व्याजु॒होतन । जु॒हो॒त॒नेति॑जुहोतन (पद ३।१ सं० ३।१) इति प्रथमः प्रकारः ।

(शिखामूलको घनः)

अथ द्वितीयः । तल्लक्षणमाह[1]—

शिखामुक्त्वाविपर्य्यस्य तत्पदानि पुनः पठेत् ।।
अयं घन इति प्रोक्तऽइत्यष्टौविकृतीः पठेत् ।। १५ ।।

अस्यार्थः[2]—शिखां पूर्वोक्तामुच्चार्य विपर्य्यासेन तानि पदानि उच्चार्य्य पुनः क्रमेण तानि पदान्युच्चारयेत्, अयं विकृतिविशेषो 'घन' इति प्रोक्तो[3]महर्षिभिः व्याडिभिरिति ।

उदाहरणं यथा[4]—

दस्रा॑यु॒वाकं॑वो यु॒वाकं॑वो द॒स्रादस्रा॑यु॒वाक॑वꣳ सु॒ताः सु॒तायु॒वाकं॑वो दस्रादस्रा॑यु॒वाकवꣳसु॒ताः । [5]यु॒वाकं॑वꣳसु॒ताः सु॒तायु॒वाकं॑वो यु॒वाकं॑वꣳ सु॒तानास॑त्या नास॑त्या सु॒तायु॒वाकं॑वो यु॒वाकं॑वꣳसु॒तानास॑त्या । सु॒तानास॑त्या नास॑त्यासु॒ताः सु॒तानास॑त्या व्वृ॒क्तब॑र्हिषो वृ॒क्तब॑र्हिषो नास॑त्या सु॒ताःसु॒ता नास॑त्या व्वृ॒क्तब॑र्हिषꣳ ।

नास॑त्याव्वृ॒क्तब॑र्हिषो वृ॒क्तब॑र्हिषो नास॑त्या नास॑त्या व्वृ॒क्तब॑र्हिषꣳ ।
व्वृ॒क्तब॑र्हिष॒ऽइति॑वृ॒क्त । ब॑र्हिषꣳ ।

आया॑तꣳ य्यात॒माया॑तꣳ रुद्रवर्त्तनी रुद्रवर्त्तनी यात॒माया॑तꣳ रुद्रवर्त्तनी ।
या॒तꣳ रु॒द्र॒व॒र्त्त॒नी॒ रुद्र॒वर्त्त॒नी॒या तꣳ य्यातꣳ रुद्रवर्त्तनी । रु॒द्र॒वर्त्त॒नी॒ऽइति॑-रुद्रव्वर्त्तनी । (पद० ३३।५२ सं० ३३।५८)

एवं प्रकारेण [6]अष्टौ विकृतीः पठेत् ।। इति[7] ।।

---

१. 'अथ द्वितीयः' इति शि. अथ लोकप्रसिद्धद्वितीयघनलक्षणमाह घ ङ ।

२. अस्यार्थः नास्ति शि. ।

३ 'प्रोक्तो''''''' यथा' इति स्थाने 'प्रोक्तः ऋषिभिः' इति ख ।

४ 'अयं''''''''यथा' स्थाने अयं घन इत्यृषिभिः प्रोक्तः । शि.

५ 'इत्यादि' ना उदाहरणोपसंहारः । ततः 'शेषं ज्योत्स्नादिषु ज्ञेयम् ।' इति प्रकरण-समाप्तिः—शि.

६. प्रकाराष्टौ इति घ.

७. एतदन्तो भाग एव ङ

अथास्मिन् ग्रन्थे कानिचित् प्रतिशाख्यसूत्राणि त्यक्तानि गृहीतानि च। तेषां हेतून् प्रदर्शयामः—

[१] कानिचिदुच्चारणे अनुपयुक्तानि ज्ञानमात्रफलानि—'यत्तन्न' (शु० प्रा० १।५) इत्यादीनि।

[२] कानिचिद् व्याकरणसिद्धानि—
'नर-हा-मित्रेषु' (शु० प्रा० ३।१०३) इत्यादीनि।

[३] कानिचिदन्यथासिद्धानि—'शि-लि-सि-वर्गमध्यमव्यवहितोऽपि' (शु० प्रा० २।९६) इत्यादीनि।

[४] कानिचित् शाखान्तरविषयाणि—
'नाशे च' (शु० प्रा० ३।४३) इत्यादीनि।

[५] कानिचिद् व्याकरणसिद्धान्यपि स्थिनोपस्थितादौ विधिप्रदर्शनार्थं लिखितानि 'अहः पतौ रेफम्' (शु० प्रा० ३।३९ ज्यो० २६३) इत्यादीनि।

[६] अथापि 'हुँ इति नासिक्यः' (शु० प्रा० ८।२३ ज्यो० ३३) एवमादीनि कानिचन प्रसङ्गाद् व्याख्यातानि।

अङ्काग्निसप्तकुमिते[१७३७] शक ईश्वरवत्सरे।
इषशुक्लदशम्यां श्री—सिद्धेश्वरतनूभुवा ॥ १ ॥

रामेण रचिता प्राति—शाख्यज्योत्स्ना समर्पिता।
श्रीराम—सिद्धेशगुरु—चरणाम्बुरुहद्वये ॥ २ ॥

इति श्रीमद्विद्वन्मुकुटरत्न—श्रीसिद्धेश्वयोगिवरसूनु—रामचन्द्रपण्डितविरचिता ज्योत्स्नाख्या प्रातिशाख्यविवृतिः समाप्ता।

ज्योतिर्वित् कुलसम्भूतो वैराजक्षेत्रसंस्थितः।
रघुनाथस्तस्य कृते[१] ज्योत्स्ना विरचिता मया ॥

---

१. कृतेयं ख.

परिशिष्टभागः

प्रथमं परिशिष्टम्

शुक्लयजुः प्रातिशाख्यसूत्राणां

ज्योत्स्नावृत्त्यनुसारी पाठः

सङ्ख्या	सूत्रम्	आर्षपाठाङ्काः
१.	स्वरसंस्कारयोश्छन्दसि नियमः।	१।१
२.	लौकिकानामर्थपूर्वकत्वात्।	१।२
३.	ॐकारं वेदेषु।	१।१८
४.	शुचिना।	८।२८
५.	शुचौ देशे।	८।२९
६.	शूद्रपतितयोरस ॐ श्राव ॐ स्वाध्यायोऽध्येतव्यः।	८।३०
७	त्रीणि स्थानानि।	१।१०
८.	सवनक्रमेणोरः कण्ठ-भ्रूमध्यानि।	१।३०
९	अथातो वर्णसमाम्नायं व्याख्यास्यामः।	८।१
१०.	तत्र स्वराः प्रथमम्।	८।२
११.	अ इति, आ इति, आ ३ इति; इ इति ई इति, ई३इति; उ इति, ऊ इति, ऊ३ इति; ऋ इति, ॠ इति, ॠ३ इति; ऌ इति, ॡ इति, ॡ३ इति।	८।३
१२.	अथ सन्ध्यक्षराणि।	८।४
१३	ए इति, ए३ इति; ऐ इति, ऐ३ इति; ओ इति, ओ३ इति; औ इति, औ३ इति।	८।५
१४.	इति स्वराः।	८।६
१५.	सिमादितोऽष्टौ स्वराणाम्।	१।४४
१६.	अकण्ठ्यो भावी।	१।४६
१७.	अमात्रस्वरो ह्रस्वः।	१।५५
१८.	मात्रा च।	१।५६
१९.	द्विस्तावान् दीर्घः।	१।५६
२०.	प्लुतस्त्रिः।	१।५८
२१.	अथ व्यञ्जनानि।	८।०
२२.	किति खिति गिति घिति ङिति इति कवर्गः।	८।८

२३. चिति छिति जिति झिति ञिति इति चवर्गः। ८।९
२४. टिति ठिति डिति ढिति णिति इति टवर्गः। ८।१०
२५. तिति थिति दिति धिति निति इति तवर्गः। ८।११
२६. पिति फिति बिति भिति मिति इति पवर्गः। ८।१२
२७. इति स्पर्शाः। ८।१३
२८. अथान्तःस्थाः। ८।१४
२९ यिति रिति लिति विति। ८।१५
३०. अथोष्माणः। ८।१६
३१. शिति षिति सिति हिति। ८।१७
३२. अथायोगवाहाः। ८।१८
३३. अः इति विसर्जनीयः। ८।२२
३४. ≍ क इति जिह्वामूलीयः। ८।१९
३५. ≍ प इत्युपध्मानीयः। ८।२०
३६. अं इत्यनुस्वारः। ८।२१
३७. हुं इति नासिक्यः। ८।२३
३८. कुं खुं गुं घुं इति चत्वारो यमाः। ८।२४
३९. इति व्यञ्जनानि। ८।८५
४०. व्यञ्जनमर्धमात्रा। १।५९
४१. अनन्तर ꣳ संयोगः। १।४८
४२. तस्मिन् ळ-ळ्ह-जिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम्। ८।३९
४३. ऌकारो दीर्घः प्लुताश्चोक्तवर्जम्। ८।४०
४४. उपदिष्टा वर्णाः। १।३४
४५. निर्देश इतिना। १।३६
४६. कारेण च। १।३७
४७. अव्यवहितेन व्यञ्जनस्य। १।३८
४८. स्वरैरपि। १।४०
४९. र एफेन च। १।३९
५०. नानुस्वार-विसर्ग जिह्वामूलीयोपध्मानीययमाः। १।४१
५१. स्थाने। १।६२
५२. ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात्। १।६३
५३. प्रथमग्रहणे वर्गम्। १।६४
५४. इ-च-शे-यास्तालौ। १।६६
५५. ऋ ≍ क्कौ जिह्वामूले। १।६५
५६. ष-टौ मूर्धनि। १।६७
५७. रो दन्तमूले। १।६८

९४. सन्निकृष्ट-विप्रकृष्टयोः सन्निकृष्टस्य । १।१४४
९५. विकारी यथासन्नम् । १।१४२
९६. सङ्ख्यातानामनुनिर्देशो यथासङ्ख्यम् । १।१४३
९७. अवग्रहः पदान्तवत् । १।१५३
९८. न त्वितिकरणम् । १।१५४
९९. विप्रतिषेध उत्तरं बलवदलोपे । १।१५९
१००. प्रगृह्यम् । १।९२
१०१. एकारे-कारो-कारा द्विवचनान्ताः । १।९३
१०२. ओकारश्च पदान्तेऽनवग्रहः । १।९४
१०३. उकारोऽपृक्तः । १।९५
१०४. चमू अस्मे त्वे । १।९६
१०५. मे उदात्तम् । १।९७
१०६. अमी पदम् । १।९८
१०७. विसर्जनीयो रिफितः । १।१६०
१०८. करनुदात्तम् । १।१६१
१०९. अन्तरनाद्युदात्तम् । १।१६२
११०. अहरभकारपरम् । १।१६३
१११. आवर्-व-रिति समानर्चि । १।१६४
११२. स्तोतर्-वस्तः-सनुतर-भार्-वार्-र्द्वाः । १।१६५
११३. स्वः पदमनरणे । १।१६६
११४. पदादिश्चाजित्परः । १।१६७
११५. द्वाः-सवितः-पुनस्-त्वष्टर्-नेष्ट-रकर्-होतर्-मातः-प्रातर्-जामात-रजीगः-प्रणेतरिति च। १।१६८
११६. स ह्रिंतायाम् । ३।१
११७. पदान्तपदाद्योः सन्धिः । ३।३
११८. स्वरे भाव्यन्तस्थाम् । ४।४६
११९. सन्ध्यक्षरमयवायावम् । ४।४७
१२०. यवयोः पदान्तयोः स्वरमध्ये लोपः । ४।१२६
१२१. न वकारस्यासस्थान एकेषाम् । ४।१२७
१२२. कठ्य ऋकारे ह्रस्वम् । ४।४९
१२३. अथैकमुत्तरश्च । ४।५०
१२४. सि ह्रिं सवर्णे दीर्घम् । ४।५१
१२५. कण्ठ्यादिवर्णे एकारम् । ४।५३
१२६. उवर्णे ओकारम् । ४।५६
१२७. सन्ध्यक्षरमेकारोकारौ । ४।५७
१२८. समुद्रस्येमँस्त्वेमँस्त्वोद्यमिति च । ४।५५

१२९. ह्यन्तराः कालाः । ३१५
१३०. न परकालः पूर्वकाले पुनः । ३१४
१३१. आरमृक्कारोऽपृक्तात् । ४१५९
१३२. एदोद्भ्यां पूर्वमकारः । ४१६१
१३३. प्रकृतिभाव ऋक्षु । ४१८१
१३४. जुषाणश्चानध्वनि । ४१८२
१३५. ते चानुदात्तमनुदात्ते । ४१८३
१३६. हेड-आपो-ऽग्रेगुवो ऽपाग्ने-धीरासो-देवास-उरो-रक्षाणो-मो-वैश्वानरो-वृषभो-वचः-प्राण-उदानो-अङ्ग-इमा मे-वृष्णो-दशमास्योऽन्ध-आवित्तो-ऽरिष्टो अर्जुनः-प्रत्याश्रावः-स्विष्टो-घासे-प्रणीतस्-तेभ्यो नमो अस्तु-दूरे-नो अद्य-यज्ञे-सधस्थे-सोअध्वराये-न्द्रे-हिरण्यपर्णो-द्वारो-देवो-ब्दो-रथिभ्यो-महद्भ्यः-सꣳ सदः । ४१८४
१३७. छन्दो अङ्कुप-मङ्काङ्क-मस्त्रीवयः । ४१८५
१३८. गाहमानः-शिवो-भरन्तो-द्वेषोभ्यो-जम्भयन्तो-वाजे वाजे-वाजजितो-मदन्तः-शोचे-ऽवसे-सुषुवे-ज्योते-सुपर्णो-वीरुधः-सुवीरो-धातवे-सूनवे-द्रूणान-आशवो-वहतः सङ्क्रन्दनो-बाहवो-ऽयुध्यो-ऽद्रुहः । ४१६४
१३९. वोऽहꣳ सोऽहꣳ सोऽस्माकं, तेऽभिगरो, वोऽर्वाची । ४१६५
१४०. येऽन्ना-त्रयोः । ४१६६
१४१. अविद्या-सम्भूत्योश्च । ४१६७
१४२. उपस्थेऽन्तस्तेभ्योऽकरस् । ४१६८
१४३. नमोऽस्त्वसौत्रामण्याम् । ४१६९
१४४. विश्वे-ऽग्रे-विशो-रामो-ऽनग्नौ । ४१७०
१४५. सूर्येऽग्ने-ऽभौ । ४१७१
१४६. रिषो-यवसे-पुरुप्रियो-ऽन्नपते-ऽर्णवे । ४१७२
१४७. व्यपरे च । ४१७३
१४८. गवे-मे-मनसो-वाजयन्तः-सोम्यासः-पाशिनो-विघ्नो-ऽनृते-मूजवतो-वृष्णे-ऽपाको-दीदिवस्-त्रयस्त्रिꣳशे-ब्रह्मणो-यको-रथो-विश्वतःपादो-वसन्तः । ४१७४
४१.	दुष्ट्टरो व्विष्ट्टरो व्विष्ट्टपो व्विष्ट्टम्भो व्विष्ट्टम्भनीम् ।	
४२.	ऊवद्ध्यमुगणाऽउखऽइष्कृतिरिष्क्कर्त्तारमुदरमित्युपसर्गैकदेशलोपात् ।	५०४
४३.	संस्कृतर्ठ० सँस्कृतिम्माँस्प्पचन्न्याः पूँश्चलूमित्त्यनुनासिकोपधत्वात् ।	५०५
४४.	अनुस्वारागमत्वादित्येके ।	
४५.	परीत्तो वत्तानाᳬं सुविताय सग्घिररिति च ।	५०६
४६.	वृद्धं वृद्धिः ।	

॥ इति कात्यायनकृतौ प्रतिशाख्यसूत्रे पञ्चमोऽध्यायः ॥

॥ षष्ठाध्यायः ॥

संख्या	सूत्रम्	ज्योत्स्नापाठाङ्काः
१.	अनुदात्तमाकूख्यातमामन्त्रितवत् ।	४३४
२.	उपसर्गंउपसर्गे ।	४३७
३.	आम्रेडिते चोत्तरः ।	४३८
४.	कृदाकूख्यातयोश्चोदात्तयोः ।	४३९
५.	नाभ्येकाक्षरश्च स्वरसन्धेयेऽकृति ।	४४०
६.	आ पूतजातयोः ।	४४१
७.	अधिनिष्प्रप्रतिश्श्रिताऽत्रिणभानवपचतेषु ।	४४१
८.	उज्जेषमावर्त्तंऽआपनीफणत्त्सनिष्ष्यदत्त्सँव्वतं प्रयाणठं० सञ्चरन्तठं० सठं० रभद्ध्वं प्रसितिंव्विक्क्रमस्वेत्येतेष्ष्वनु ।	४४३
९.	ओपप्रोदात्ते ।	४८३
१०.	अभिप्रेह्युपसम्प्रयातप्रत्यातनुष्ष्वासुषाव ।	४४४
११.	प्रकृत्त्याऽऽकूख्यातमाक्ख्यातपूर्व्वम् ।	४४५
१२.	उदात्ताच्चामन्त्रितादनन्तरम् ।	४४६
१३.	एकान्तरादपि ।	४४८
१४.	यद्वृत्तोपपदाच्च ।	४४९
१५.	हेश्च ।	४५०
१६.	उत्तरेऽपि ।	४५१
१७.	नेत् ।	४५२
१८.	समनसस्कृरत् ।	४५३
१९.	द्वयोः पूर्व्वठं० समुच्चये ।	४५४
२०.	वा विचारणे ।	
२१.	अह विनियोगे ।	
२२.	एवावधारणे ।	
२३.	उपपदाप्प्रयोगेऽपि च ।	
२४.	परोपापावप्प्रतिपर्य्यन्न्व-प्प्रत्त्यद्ध्याङ्प्रसन्निर्द्दुरुन्निविस्वभि ।	४३५
२५.	द्विस्प्पर्शम् ।	
२६.	व्वेत्तु व्वित्त्वाऽस्म्मद्ध्रूक्क्पात्रमभित्त्यम्मृत्तिकाद्ध्वन्दात्रठं० समाववर्त्यूं द्धिर्वृद्धिरराद्ध्याऽअद्धंशुद्धवुद्धनकूक्तं निषण्णस्विन्नान्नसन्नाश्श्च ।	
२७.	न क्षवृचिश्विसतयेभ्यस्त्रेकम् ।	३६३
२८	ईर्ष्याय वार्ध्रीनसोद्राश्श्वराश्चेत् ।	३६५
२९.	उपोत्त्थित उत्त्तम्भनमुत्तभानोत्थायोत्थितायेति त्रीणि ।	
३०.	वर्हिरङ्क्काम्भद्द्रेण पृङ्क्तं पङ्क्तिः समङ्ग्धि परिवृङ्ग्धि पाङ्क्त्रानिति द्वावनुनासिको पूर्वावारपन्तीवर्ज्जमिति च ।	
३१.	वृद्धं वृद्धिः ।	

॥ इति कात्यायनकृतौ प्रातिशाख्यसूत्रे षष्ठोऽध्यायः ॥

।। सप्तमाध्यायः ।।

संख्या	सूत्रम्	ज्योत्स्नापाठाङ्कः

[पदावसानपरिग्रहप्रकरणम् १-११]

[अधिकार सूत्रम्]

१. अथावसानानि ।
२. कण्ठ्यस्वरमेकारेण परिगृह्णीयात्प्लुतवर्ज्जम् ।
३. इवर्ण्णमीकारेण ।
४. उवर्ण्णँव्वकारेण ।
५. औकारं च ।
६. ह्रस्वकण्ठ्योपधं विसर्ज्जनीयान्तमरिफितं विवृत्त्या ।
७. दीर्ग्घकण्ठ्योपधँव्विसर्ज्जनीयान्तमेकारान्तमैकारान्तं प्लुतं प्रगृह्यं च ।
८. औकारान्तञ्चैके ।
९. भाव्युपधं (च) रिद्विसर्ज्जनीयान्तानि रेफेण ।
१०. प्रथमान्तन्तृतीयेन ।
११. उत्तमान्तमुत्तमेन ।
१२. वृद्धं व्वृद्धिः ।

।। इति कात्यायनकृतौ प्रातिशाख्यसूत्रे सप्तमोऽध्यायः ।।

।। अष्टमाध्यायः ।।

[वर्णमालाप्रकरणम्]

१.	अथातो वर्णसमाम्नायं व्याख्यास्यामः ।	९
२.	तत्र स्वराः प्रथमम् ।	१०
३.	अइति, आइति, आ३इति; इइति ईइति, ई३इति; उइति, ऊइति, ऊ३इति; ऋइति, ॠइति, ॠ३इति; ऌइति, ॡइति, ॡ३ इति ।	११
४.	अथ सन्ध्यक्षराणि ।	१२
५.	एइति, ए३ इति; ऐइति, ऐ३ इति; ओ इति, ओ३ इति; औ इति, औ३ इति ।	१३
६.	इति स्वराः ।	१४
७.	अथ व्यञ्जनानि ।	२१
८.	किति, खिति, गिति, घिति, ङिति इति कवर्गः ।	२२
९.	चिति छिति जिति झिति ञिति इति चवर्गः ।	२३
१०.	टिति ठिति डिति ढिति णिति इति टवर्गः ।	२४
११.	तिति थिति दिति धिति निति इति तवर्गः ।	२५
१२.	पिति फिति बिति भिति मिति इति पवर्गः ।	२६

संख्या	सूत्रम्	ज्योत्स्नापाठाङ्काः
१३.	इति स्पर्शाः ।	२७
१४.	अथान्तस्थाः ।	२८
१५.	यिति रिति लिति विति ।	२९
१६.	अथोष्माणः ।	३०
१७.	शिति षिति सिति हिति ।	३१
१८.	अथायोगवाहाः ।	३२
१९.	≍क इति जिह्वामूलीयः ।	३४
२०.	≍प इत्युपध्मानीयः ।	३५
२१.	अं इत्यनुस्वारः ।	२६
२२.	अः इति विसर्जनीयः ।	३३
२३.	हुँ इति नासिक्यः ।	३७
२४.	कँ खुँ गुँ घुँ इति यमाः ।	३८
२५.	इति व्यञ्जनानि ।	३९
२६.	एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मवाचः ।	
२७.	यत्किञ्चिद् वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ।	
२८.	शुचिना ।	
२९.	शुचौ देशे ।	
३०.	शूद्रपतितयोरसंश्रावंस्वाध्यायोऽध्येतव्यः ।	
३१.	ज्ञाने ।	
३२.	पौरुष्यम् ।	
३३.	स्वर्ग्यम् ।	
३४.	यशस्यम् ।	
३५.	आयुष्यम् ।	
३६.	तथा विभक्तिपरिज्ञानम् ।	
३७.	अथापि श्लोको भवति— वेदस्याध्ययनाद्धर्मः संप्रदानात्तथा श्रुतेः । व्वर्णशोऽक्षरशो ज्ञानाद् विभक्तिपदशोऽपि च ॥	३७
३८.	त्रयोविंशतिरुच्च्यन्ते स्वराः शब्दार्थचिन्तकैः । द्विचत्वारिंशद्व्यञ्जनान्येतावान्वर्णसङ्ग्रहः ॥	

[माध्यन्दिनीयानामपरिगृहीता वर्णाः]

संख्या	सूत्रम्	ज्योत्स्नापाठाङ्काः
३९.	तस्मिँळ्ळ्हजिह्वामूलीयोपद्ध्मानीयनासिक्या न सन्ति माद्ध्यन्दिनानाम् ।	४२
४०.	ऌकारो दीर्घः प्लुताश्चोकवर्ज्जम् ।	३९
४१.	अथ व्वर्णदेवताः ।	

संख्या	सूत्रम्	ज्योत्स्नापाठाङ्काः

४२. आग्नेयाः कण्ठ्याः ।
४३. नैर्ऋत्या जिह्वामूलीयाः ।
४४. सौम्यास्तालव्याः ।
४५. रौद्रा दन्त्याः ।
४६. ओष्ठ्या आश्विनाः ।
४७. वायव्या मूर्द्धन्याः ।
४८. शेषा वैश्वदेवाः ।
४९. तत्समुदायोऽक्षरम् ।
५०. वर्णो वा ।
५१. अक्षरसमुदायः पदम् ।
५२. अक्षरँव्वा ।
५३. तच्चतुर्द्धा ।
५४. नामाख्यातोपसर्ग्गनिपाताः ।
५५. तत्र प्रति विशेषः ।
५६. क्रियावाचकमाख्यातमुपसर्ग्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥
५७. चतुर्द्दश निपाता येऽनुदात्तास्तेऽपि सञ्चिताः ।
निहन्यते खल्वाख्यातमुपसर्गचतुष्टये ॥
५८. अथ पदगोत्राणि ।
५९. भारद्वाजकमाख्यातं भार्ग्गवं नामभाष्यते ।
वासिष्ठ्ठ उपसर्गस्तु निपातः काश्यपः स्मृतः ॥
६०. अथ पददेवताः ।
६१. सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते ।
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥
६१. इत्याह स्वरसंस्कार प्रतिष्ठापयिता भगवान् कात्यायनः ।
६२. वृद्धं वृद्धिः ।

॥ इति कात्यायनकृतौ प्रतिशाख्यसूत्रे अष्टमोऽध्यायः ॥

तृतीयं परिशिष्टम्

महायाज्ञिक-विद्वत्तिलक-आचार्य-श्रीगोपालचन्द्रमिश्रविरचिता
शुक्लयजुर्वेद—माध्यन्दिनशाखीया

सम्प्रदायप्रबोधिनी शिक्षा

[१] अथ सामान्यप्रकरणम्

मङ्गलम्

बोधः प्रयोगः संसिद्धिः सम्प्रदायश्च सद्गुरुः।
यस्मादिमे प्रवर्तन्ते शिक्षाशास्त्रं तदाश्रये ॥ १ ॥

उपक्रमः, शिक्षाप्रयोजनम्

ऋग्यजुः सामाथर्वाणो वेदास्तत्र यजुर्द्विधा।
कृष्णं शुक्लं, तत्र शुक्ले काण्वं माध्यन्दिनीयकम्।
द्वयं वै पञ्चदशसु शाखासु प्राप्यतेऽधुना ॥ २ ॥

अथ सम्प्रदायप्रबोधिन्याः शिक्षायाः टुप्टीकात्मिका व्याख्या

सुबोधिनी

सुखबोधाय रचिता सम्प्रदायप्रबोधिनी।
साप्यनभ्यस्तमन्त्राणां न सुखाय भवेत्ततः ॥ १ ॥

सुबोधिनी लिख्यतेऽसौ व्याख्या सुस्पष्टबोधिनी।
उपकाराय कल्पेत वेदार्थपरिशीलिनाम् ॥ २ ॥

१. बोधः—लौकिकानां वैदिकानां चाक्षराणां लेखोच्चारणयोः, अदृश्यस्वरूपस्य ब्राह्मणत्व-पुंस्त्वादेश्च। प्रयोगः—व्याकरणसिद्धोऽपि लोपागमवर्णविकारप्रतिभावरूपः संस्कारः कस्यां शाखायां कीदृशः प्रयोक्तव्य इति निर्देशमूलकः। एवं यज्ञादिषु मन्त्रोच्चारणे मध्यमा वृत्तिरभ्यर्हितेत्यादिः प्रयोगानुगुणोपदेशः शिक्षाशास्त्रविषयः। संसिद्धिः—सम्यक् सिद्धिरिच्छायाः। शिक्षाशास्त्राननुकूलत्वे फलविरहस्य 'मन्त्रो हीनः' (पा० शि० ५२) इत्यादिषु बहुत्र स्मरणात्। सम्प्रदायः—तत्तच्छाखीयः तत्तद्देशीयश्च उच्चारणसम्प्रदायः शिक्षाशास्त्रेणैव सिद्ध्यति। सद्गुरुः—गुरोः साधुत्वमपि शिक्षाशास्त्रानुसारित्वे एव जना अभिप्रयन्ति।

२. पञ्चदशशाखानां नामानि चरणव्यूहे (२ खं०) द्रष्टव्यानि।

उत्तरे भारते प्रायः शुक्लं माध्यन्दिनीयकम् ।
कुलश्रुतौ तथाधीतौ कर्मकाण्डे समादृतम् ॥ ३ ॥

तथापि कलिकालोऽयं संस्काराभाव एव च ।
दुर्बोधत्वं प्रापयति सम्प्रदायागतं क्रमम् ॥ ४ ॥

तस्मादियं मया शिक्षा सम्प्रदायप्रबोधिनी ।
श्रीश्रीगुरोर्भगवतः प्रसादाल्लिख्यते स्फुटा ॥ ५ ॥

वेदाध्ययने साधारणधर्माः

सुप्रसन्नमना भूत्वा विनीतः स्वासनं भजेत् ।
निवेश्य दृष्टिं हस्ताग्रे वेदं स्वीयं समभ्यसेत् ॥ ६ ॥

हस्तस्थापनम्

हस्तौ सुसंयतौ धार्यौ जान्वोरुपरि स्थितौ ।
गुरोरनुमतिं कुर्यात् पठन्नान्यमतिर्भवेत् ॥ ७ ॥

आसनं स्वस्तिकं पद्मं बध्द्वोरौ दक्षिणे करम् ।
सव्यं समुष्टि विन्यस्य, मुष्टौ दक्षिणकूर्परम् ॥ ८ ॥

तत्रोत्तानं हस्तदण्डं श्लथं श्लिष्टाङ्गुलं तथा ।
मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थोदकं व्रजेत् ॥ ९ ॥

नामितं करपृष्ठं तु सुव्यक्ताङ्गुलिमोक्षणम् ।
दक्षिणं स्वकरं कुर्यादुदात्तादिप्रबोधकम् ॥ १० ॥

---

३. कान्यकुब्जेषु मैथिलेषु च सामवेदिनां, बङ्गीयेषु ऋग्वेदितैत्तिरीय—सामवेदिनाम्, उत्कलेषु च काण्वशाखिनामप्युपलब्धेः 'प्रायः' इति । कुलश्रुतिः—कुलादागता श्रुतिः । 'अस्माकं शुक्लयजुर्वेदीया माध्यन्दिनीया शाखेति' कर्णाकर्णिकया पारम्परिकी श्रुतिः, तस्यां । अधीतौ—साम्प्रतिके परीक्षाद्यात्मके अध्ययने । कर्मकाण्डे सामवेदित्वेन ऋग्वेदित्वेन वा ख्यापयतामपि पुरुषाणां माध्यन्दिनीयसूत्र-मन्त्राद्याश्रयणात् । एतच्च न विरुद्धम् 'सर्वशाखाप्रत्ययमेकं कर्म' (जै० २।४।२ अ०) इति न्यायादिति केचित् ।

४. उपनयनसंस्कारसत्वेऽपि मन्त्रोपदेष्टुराचार्यस्य च शास्त्रोपदिष्टगुणविरहे वास्तविकावश्यकसंस्कारानुदयमूलकः संस्काराभावः । तथाचापस्तम्बधर्मसूत्रेऽपि (१।१।११-१८);

६. तु०—या० शि० पृ० २१ ।

७. द्र०—या० शि० पृ० १४ ।

८. दक्षिणोरौ वामकरं मुष्टिबन्धं कृत्वा स्थापयेत् । तत्र च मुष्टौ दक्षिणहस्तस्य कूर्परम् = हस्तमानोपयोगिसोमास्थि, स्थापयेदिति भावः ।

९. द्र०—या० शि० पृ० ३६ । अङ्गुष्ठमूलदेशो मनुष्यतीर्थं । तर्जन्यङ्गुष्ठमध्यं पितृतीर्थं ।

वर्णोच्चारणे स्थितिः

कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः।
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः॥ ११॥

उच्चारणधर्माः

नाभ्याहन्यान्न निर्हन्यान्न गायेन्नैव कम्पयेत्॥ १२॥

उपांशु त्वरितं चैव नोच्चरेद् वित्रसन् यतः।
अपरूपसहस्राणां सन्देहे स प्रवर्तते॥ १३॥

पाठदोषाः

शङ्कितं भीतमुद्घृष्ट-मव्यक्तमनुनासिकम्।
काकस्वरं मूर्ध्निगतं तथा स्थानविवर्जितम्॥ १४॥

विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्।
व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश॥ १५॥

---

११. द्र०—या० शि० पृ० १९।

१२-१३. तु०—या० शि० पृ० १९, १६२। अभ्याहननं नाम—कस्यचिद्वर्णस्य विशेषबलपूर्वकमुच्चारणम्। निर्हननं नाम—अधरदन्तावल्या निष्पीडनस्थित्या सर्ववर्णानामुच्चारणम्। गायनं नाम—लोकानुरञ्जनदृष्ट्या स्वरलहरीसमुत्पादनपुरःसरमुच्चारणम्। कम्पनं तु कण्ठस्थित्या विरामव्यवहितप्रायवर्णोच्चारणरूपं प्रसिद्धमेव।

१४-१५. द्र०—या० शि० पृ० २३। (१) शंकितम्—अयं वा स वा वर्ण इति संशयं मनसिकृत्य पठनम्। (२) भीतम्—भयेन पठनम्। (३) उद्घृष्टम्—रोषेण रोदनेन क्षोभेण वा समपेक्षितबलादधिकबलेनोच्चारणम्। एतस्मिन्नुच्चारणे प्रसृतत्वम्, ध्वनेरूर्ध्वत्वं चानुभूयते। (४) अव्यक्तम्—स्पष्टतया नोच्चारितम् (५) अनुनासिकम्—अननुनासिकाक्षरस्यापि नासिकयोच्चारणम् (६) काकस्वरम्—कण्ठं निष्पीड्योच्चरुच्चारणम् (७) मूर्ध्निगतम्—अत्युच्चैः पूर्णबलेनोच्चारितम्। (८) स्थानविवर्जितम्—शिक्षाशास्त्रोपदिष्टस्थानविरहेणोच्चारणम्। (९) विस्वरम्—सहाध्येतॄणां समानस्वरतां परित्यज्योच्चारणम्, समपेक्षितमन्द्रादिस्वरविरहेण उदात्तादिस्वरप्रदर्शनाभावेन वा उच्चारणम्। (१०) विरसम्—रूक्षोच्चारणं माधुर्यविरहेण। (११) विश्लिष्टम्—समपेक्षितैकप्राणयोगेऽपि विश्लिष्योच्चारणम्।(१२)विषमाहतम्—चर्वणक्रियाप्रदर्शनमुखेन वर्णानामुच्चारणम्। (१३) व्याकुलम्—शोक-भयादिनिमित्तेन, स्वभावतो वा धैर्यविरहेण चित्तविक्षेपानुमानज्ञापकवृत्त्योच्चारणम्। (१४) तालहीनम्—तालशब्दोऽत्र अवसानार्थः साधीयान्, ततश्च समपेक्षितावसानविरहितोच्चारणम्।

पाठकगुणाः

माधुर्यमक्षरव्यक्तिर्हस्तक्षेपश्च सुस्वरः।
धैर्यं लयसमत्वं च षडेते पाठके गुणाः॥ १६॥

पाठकदोषाः

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।
अल्पकण्ठोऽनवहितः षडेते पाठकाधमाः॥ १७॥

वेदाध्ययनक्रमः, तत्र संस्था (सन्था) स्वरूपम्

गुरूक्तं शृणुयान्मन्त्रं तूष्णीं पश्चादनूच्चरेत्।
आवर्तनं जिघृक्षार्थं 'संस्था' त्रिः पञ्च सप्त वा॥ १८॥

संस्थायां शिष्यसामर्थ्यमपेक्ष्य गुरुणा पुरा।
कण्डिका भागतोऽर्ध्दा वा विश्लिष्याध्याप्यते सदा॥ १८ क॥

चेदेकत्रागतो मन्त्रः संहितायां पुनर्भवेत्।
तदाध्याप्यः पूर्णमन्त्रः शिष्योऽप्यनुवदेत् सकृत्॥ १८ ख॥

गुणिनो (गुन्नी) स्वरूपम्

पक्षं वार्द्धमधीतोक्तिर्गुरोस्तु निरपेक्षया।
'गुणिनी' सा सप्तकादिशतान्तावृत्तिरन्वहम्॥ १९॥

अभ्यासे पूर्णमन्त्रस्य क्रियमाणेऽग्रतः स्थितः।
पदद्वयात्मा प्रतीको धृत्यै चाभ्यस्यते सह॥ २०॥

१६-१७. तु०—या० शि० पृ० १३८, १३७।

१८. सम्प्रदाये अध्ययनशब्दार्थः—गुरुमुखोच्चारणानूच्चारणम्। गुरूक्तस्य वर्णोपदेशस्य ग्रहणार्थं दृढतायै चाभ्यासो द्विधा क्रियते। तत्र प्रथमः संस्थारूपेण। स लोके 'सन्था' इति व्यवह्रियते। तत्र गुरूक्तस्य तत्सान्निध्ये एव समनन्तरं त्रिवारं पञ्चवारं सप्तवारं वा सप्ताहं पक्षं वा यावत् आवर्तनम्। द्वितीयो गुणनिकारूपेण।

१८ ख. एतेन गुरुमुखोच्चारणानूच्चारणात्मकमध्ययनं सिद्ध्यति।

१९. गुणनिकैव 'गुन्नी' इति भाष्यते। तत्र गुरुसान्निध्यं नावश्यकम्। सतीर्थ्याः सम्भूय गुरुणोपदिष्टस्य मन्त्रजातस्य प्रत्यहं सप्तादि—शतान्तया गुरुनियमितसंख्यया सप्ताहं पक्षं वा आवर्तनं कुर्वन्ति।

२०. गुणनिकायां पूर्णः एकैको मन्त्रः दण्डकलितवदावर्त्यते। तत्राग्रिममन्त्रस्य पदद्वयात्मा प्रतीकोऽपि सहाभ्यस्यते। एतेन पाठक्रमविस्मृतिर्न भवतीति दृष्टं फलम्। यथा—इषेत्वा····पाहि। वसोः पवित्रम्। (सं० १।१)।

मन्त्रप्रतीकोऽर्धर्चो वा भागो वा पठ्यते यदा ।
तदान्तिमः स्वरो ज्ञाप्यः परस्परसमाश्रयात् ॥ २० क ॥

चर्चा-स्वाध्याय-स्वरूपम्

आभ्यासमर्द्धमन्त्रस्य यथार्हं पक्षयोर्द्वयोः ।
कथनं प्रोच्यते 'चर्चा' 'स्वाध्यायः' प्रत्यहं जपः ॥ २१ ॥

पट्टिका (पट्टी) पट्ट (फड) स्वरूपम्

संस्था गुणनिका चर्चा सतीर्थ्यैः सह सम्भवेत् ।
'पट्टिका' सा स्मृता, चान्यैः-'पट्टं' स्वाध्याय चर्चयोः ॥ २२ ॥

स्वाध्यायारम्भविधिः

गणनाथ-सरस्वती-रवि-शुक्र-बृहस्पतीन् ।
पञ्चैतान् संस्मरन्नित्यं वेदवाणीं प्रवर्तयेत् ॥ २३ ॥

प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत् ॥ २४ ॥

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते ॥ २५ ॥

---

२० क—गुणनिकायां, स्वाध्यायावसाने (श्लो० २६) वा यदा मन्त्रप्रतीकः, संस्थायाम् अर्धर्चः, कण्डिकाभागो वा यदाध्याप्यते तदान्त्यः उदात्तादिस्वरः बुद्धिस्थोच्चार्यमाणपरवर्णस्वरमभिलक्ष्य हस्तेन प्रदर्शनीयः इति ।

२१. चर्चा—यत्र मन्त्राध्येतारः स्वेषु विभागद्वयं कृत्वा परस्परमभिमुखास्तिष्ठन्ति । तत्र च यथाक्रममेकैकः पक्षः संहितायां क्रमादिषु च एकैकमवसानं, पदचर्चायां तु एकैकं पदं यथापाठं प्रापयति । 'स्वाध्याय' शब्दस्य स्वपूर्वपुरुषपरिगृहीतवेदोऽप्यर्थः । इह त्वयं स्मार्तोऽर्थः ।

२२. सतीर्थ्याः = समानगुरवश्छात्राः संस्थायां गुणनिकायां च यदा सम्भूय परस्परमभिमुखास्तिष्ठन्ति सा तेषां स्थितिः पट्टिका = 'पट्टी' इति भाषायामुच्यते । यदा च भिन्नगुरवश्छात्राः स्वाध्यायं चर्चां वा कर्तुं स्थिता भवन्ति सा स्थितिः 'पट्टम्' = 'फड' इति भाषायां कथ्यते ।

२३. द्र०—मुद्रितपत्राकृतिमूलमात्रसंहितायाः प्रारम्भे ।

२४. द्र०—या० शि० पृ० १७ । शाखान्तरे वेदाध्ययनारम्भे चतुर्मात्रस्त्रिमात्रो वा प्रणवः क्रियते । माध्यन्दिनीयैस्तु कैश्चिदेव त्रिमात्रः प्रयुज्यते । बहुभिस्तु स्वरूपस्थितो द्विमात्र एव । अत्र च तैः 'अष्टमं नैव विद्यते' इति प्रणवसम्बन्धियाज्ञवल्क्यशिक्षावचनमुपस्थाप्यते ।

२५. द्र०—मनुस्मृतिः २।७४ ।

संक्षेपतोऽथवा पूर्वं 'हरिः ओम्' इति कथ्यते ।
अधीतेरवसानेऽप्योम् प्रतीकश्चाग्रमन्त्रतः ॥ २६ ॥

'हरि ॐ' स्वरविचारः

वेदारम्भे हरिः शब्दः पदवत् पठ्यते यदि ।
आद्युदात्तः प्रयुज्येत स्वरितान्त इति स्फुटम् ॥ २७ ॥

कथने संहितावत् स्यादनुदात्तो रिवर्णकः ।
प्रणवस्तु प्लुतो ज्ञेय उदात्तः सर्वदा बुधैः ॥ २८ ॥

सर्वारम्भे हरिः ओम् स्यात् कर्मकाण्डे समर्चने ।
केवलं प्रणवो योज्यो होमे प्रत्याहुति स्फुटम् ॥ २९ ॥

स्वराणां हस्तेन ज्ञापनम्

माध्यन्दिनीयशाखायामस्ति हस्तेन बोधनम् ।
उदात्तादिस्वराणां यज् ज्ञातव्यं तदधीतिभिः ॥ ३० ॥

हस्तेन स्वरप्रदर्शने साधारणनियमः

सममुच्चारयेद् वर्णान् हस्तेन च मुखेन च ।
स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ ॥ ३१ ॥

हस्तस्वरमहिमा

यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ।
हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुते ॥ ३२ ॥

---

२६. गणपत्यादिनमस्कारपूर्वकं सावित्रीप्रयोगान्तं वेदाध्ययनमङ्गलम् । अथवा एतत् स्थाने संक्षेपतो मङ्गलस्य प्रयोगः केवलं 'हरिः ॐ' इत्येव उक्त्वा प्रारम्भः । वेदाध्ययनं यदा समाप्यते-तदा 'ॐ' इत्युक्त्वा अग्रिममन्त्रस्य प्रतीक उच्यते सम्प्रदाये ।

२७. हरि÷ । ॐ३म् । अथवा—हरि÷ । ॐ ।

२८. 'हरिः' इति शब्दस्य ॐ पदेनैकप्राणयोगेन कथने स्वरः—हरिःॐम् । प्रणवः सर्वत्र सर्वदा उदात्त एव । अध्ययनावसाने प्रणवः उदात्तः प्लुतश्च ।

२९. यद्यपि संहितापाठक्रमेण स्मार्तकर्मकाण्डे प्रयोगो नास्ति, तथापि तत्र सर्वारम्भे 'हरिः ॐ' इति प्रयुज्यते । होममन्त्रेषु तु प्रत्याहुति 'ॐ' इत्येव मन्त्रादौ प्रयोगः, इति प्रासङ्गिकमुक्तम् ।

३१. द्र०—या० शि० पृ० २१ । स्वरः—मुखेनोच्चारणीयः उदात्तादिः ।

३२. वाणी—मन्त्राक्षरसम्बन्धिनी, पाणिः-तदक्षरसम्बन्धी उदात्तादिबोधको हस्तः । द्र०—या० शि० पृ० ३३, २१ ।

हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
कामनाहानिसन्तप्तो वियोनिमधिगच्छति ॥ ३३ ॥

अनभ्यासा—दधीतेर्वा विरहाद्वे स्वरान् मुधा ।
दर्शयन्ति पराक्रष्टचै ते ब्रह्मप्लाविनो ध्रुवम् ॥ ३३ क ॥

हस्तदोषाः

चुलुर्नौका स्फुटो दण्डो स्वस्तिको मुष्टिकाकृतिः ।
परशुर्हस्तदोषाः स्युस्तथाङ्गुल्या प्रदर्शनम् ॥ ३४ ॥

स्वराणां हस्तेन प्रदर्शनस्थानानि

उदात्तमूर्ध्वं हस्तेन स्वरितं मध्यतस्तथा ।
प्रचयं स्वरितस्थानेऽनुदात्तं दर्शयेदधः ॥ ३५ ॥

द्रुतवृत्तौ दृढेऽभ्यासे प्राप्ते वयसि वैदिकाः ।
यथाशास्त्रं दर्शयन्ति हस्तं प्रादेशगामिनम् ॥ ३६ ॥

उदात्तं तु भ्रुवः प्रान्ते स्वरितं नासिकाग्रतः ।
हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादिकान् स्वरान् ॥ ३७ ॥

हस्तचालनसीमा

स्वस्थोच्चारेऽभ्यासकाले प्रयोगे मन्त्रजागरे ।
हस्तो वसन्तपूजायां न प्रादेशे प्रवर्तते ॥ ३८ ॥

❀ इति सामान्यप्रकरणम् ❀

३३-३४. तु०—या० शि० पृ० ३०, ३२। चुलुराचमनमुद्रा। स्वस्तिकोऽभयमुद्रा।

३७. तु०—या० शि० पृ० ३८।

३८. प्रयोगे = स्मार्तकर्मकाण्डीये। मन्त्रजागरे = मन्त्राणां विस्मृतिर्माभूदिति मनसिकृत्य क्रियमाणे परस्परस्पर्धायुक्ते पाठे। वसन्तपूजा = वाराणसेया हि वैदिकाः यजमानेन प्रार्थिताः पूजिताश्च पक्षद्वये स्थित्वा सस्पर्द्धं सोत्साहं च यं वैदिकं पाठमधीयते सा वसन्तपूजा। वेदरक्षायां वसन्तो ये वैदिकास्तेषां पूजा वसन्तपूजा। शब्दसाधुत्वं लोकप्रसिद्धेरूहनीयम्।

[२] अथ स्वरप्रकरणम्

उदात्तादिस्वराङ्कनप्रकारः

उदात्तस्य प्रचयस्य च ज्ञापनम्

उदात्तोऽचिन्ह एवं च प्रचयोऽपि भवेत्तथा।
परं स्वरितपूर्वस्तु प्रचयः सर्वथा भवेत् ॥ ३९ ॥

आद्यानुदात्तात् स्वरितात् पूर्वो, न्युब्जात्परस्तथा।
अवसानेऽनुदात्ताच्च परोऽचिन्ह उदात्तकः ॥ ४० ॥

अनुदात्तयोर्द्वयोर्मध्ये गतोऽचिह्नश्च पञ्चमः ॥ ४० क ॥

स्वरितलेखनम्

स्वरितस्य भवेद्रेखा वर्णस्योपरि लम्बिता।
स्पष्टं स्वरित एषोऽन्यः स्वतन्त्र स्वरितो भवेत् ॥ ४१ ॥

जात्यादिस्तत्र चिन्हं तु वर्णाधस्तिर्यगङ्कनम्।
भुजैकहीनस्त्र्यस्रस्तु मध्यावर्तेऽथ न्युब्जके ॥ ४२ ॥

उत्तानशायितः षष्ठो ह्यङ्कः प्राचां मतोऽस्ति वै।

अनुदात्तलेखनम्

नीचै रेखानुदात्तस्य वर्णाधो लिख्यते ऋजु ॥ ४३ ॥

त्रैस्वर्यव्यवस्था

माध्यन्दिनीयशाखायां संहितायां त्रयः स्वराः।
उदात्तनीचस्वरिताः प्रचयो नैव गण्यते ॥ ४४ ॥

---

३९. एवमिति अचिह्नः।

४०. (१) आद्यानुदात्तात् पूर्वो यथा—अम्॒बे अम्बिके (सं० २३।१८)।
(२) आद्यस्वरितात् पूर्वो यथा—आहम॑ जानि (सं० २३।१९)।
(३) न्युब्जाद् यथा—बृ॒ह॒त्यु॒ष्णिहा॑ (सं० २३।३३)

४० क. (४) अनुदात्तयोर्मध्यगतो यथा—अम्बे अम्बिके।
(५) अवसाने अनुदात्तात् परो यथा—गभ॒॑धम् (सं० २३।१९) एवं पञ्चधा उदात्तपरिचयः।

४२. स्वतन्त्रः स्वरितः जात्यादिः = जात्याभिनिहितक्षैप्रप्रश्लिष्टाः।

उदात्ते हस्तप्रदर्शनं भेदाश्च

अनुदात्तपरो ह्येकोऽन्यः पूर्वः स्वरितस्य च ।
उदात्तो द्विविधो ह्येवं हस्तनिर्देशने भवेत् ॥
पूर्वो वामे प्रदर्श्यस्तु ऊर्ध्वं चैव द्वितीयकः ॥ ४५ ॥

अनुदात्ते हस्तप्रदर्शनं भेदाश्च

(१) अनुदात्ता यदैकत्र ह्यनेके लक्ष्मतो यदि ।
तत्रान्त्ये तु करं नीचै-र्मध्ये पूर्वेषु दर्शयेत् ॥ ४६ ॥
(२) उदात्तव्यवधानेन स्वरितो लक्ष्मतो भवेत् ।
पूर्वेऽनुदात्तचिह्ने तु नीचैर्हस्तं प्रदर्शयेत् ॥ ४७ ॥
(३) यद्युदात्तव्यवायेना—नुदात्ताङ्कः पुनर्भवेत् ।
तदा दक्षिणपार्श्वेऽग्र्यमनुदात्तं प्रदर्शयेत् ॥ ४८ ॥
(४) यद्यव्यवहितं लक्ष्म मध्यावर्तात्पुरो भवेत् ।
तत्र भ्रमिः प्रदर्श्यस्तु नीचैश्चिह्ने यथागुडु ॥ ४९ ॥
(५) न्युब्जचिह्ने ऽव्यवहितेऽनुदात्ते पिण्डदानवत् ।
करः, एवं पंचधा स्यादनुदात्तप्रर्शनम् ॥ ५० ॥

---

४५. अनुदात्तात् पर उदात्तो द्विधा भवितुमर्हति—द्वयोरनुदात्तयोर्मध्यगत एकः, अवसाने अदृष्टस्वरितश्च द्वितीयः, तयोर्यथाक्रममुदाहरणं यथा—अम्बे अम्बिकेम्बा'-लिके (सं० २३।१८) गर्भधम् (सं० २३।१९)। अनयोराद्यानुदात्तात्पूर्वस्य च वामे प्रदर्शनमुदात्तस्य। एवं पञ्चधा परिचायित उदात्तो हस्तप्रदर्शने द्विधा। ऊर्ध्वगामी, वामगामी च। आद्यस्वरितात्पूर्वः, न्युब्जाच्च परः ऊर्ध्वगामी। शेषासु तिसृषु स्थितिषु वामगामी।

४६. अथ पञ्चधा अनुदात्तः। तदेषां पञ्चानां नामान्यस्माभिः हस्तप्रदर्शन-मभिलक्ष्य एवं कृतानि—(१) अन्त्यदर्शी (अयं सप्रचयोऽनुदात्तः) (२) सामान्यानुदात्तः (निम्नगामी) (३) दक्षगामी अनुदात्तः (४) अन्तर्गामी अनुदात्तः (५) तिर्यग्दर्शी अनुदात्तः। सोऽयं द्विप्रकारकः (क) पूर्णन्युब्जपूर्वः—बृहत्युष्णिहा (सं० २३।३३) (ख) दक्षन्युब्जपूर्वः—न्नुदहार्य्यः स दृष्टो (सं० १६।७) इति। (१) यथा—गायत्री त्रिष्टुप् (सं २३।३३)।

४७. (२) गृणाना'न्त्वा (सं० २३।१९)।

४८. (३) जग'त्यनुष्टुप्पङ्क्त्या सह (सं० २३।३३)।

४९. (४) कपर्द्दिने' च व्युप्तकेशाय च नमः' (सं० १६।२९)। उदरे गुडगुडायिते यथावर्तनमनुभूयते तद्वद्धस्तभ्रमिः।

५०. (५) बृहत्युष्णिहा' (२३।३३)।

हस्तप्रदर्शनतः स्वरितभेदाः

स्वरितः पञ्चधा ज्ञेयो हस्तनिर्देशने बुधैः ।
स्पष्टस्वरित एकस्तु प्रचयश्च द्वितीयकः ॥ ५१ ॥

मध्यावर्तस्तृतीयस्तु दक्षन्युब्जश्चतुर्थकः ।
नीचन्युब्जः पंचमश्च नान्यथा दर्शनं क्वचित् ॥ ५२ ॥

स्वरितेषु हस्तप्रदर्शनम्

(१) ऊर्ध्वस्थानात् पात्यते तु स्पष्टस्वरितचिह्नितः ।
(२) स्वरितात्परतोऽचिह्नो वर्णः प्रचयसंज्ञकः ॥ ५३ ॥

मध्ये प्रदर्शनं तस्य स्वरितस्थानतो भवेत् ।
(३) स्वरितानुदात्तचिह्नं यत्संश्लिष्टं दृश्यतेऽथवा ॥ ५४ ॥

मुद्रणे च चतुर्थाङ्को मध्यावर्तः प्रकीर्तितः ।
अत्र पूर्वेऽनुदात्ताङ्के वर्णे मध्ये भवेद् भ्रमिः ॥ ५५ ॥

मध्यावर्ते भ्रमेर्बाह्यं प्रापयेत् स्वरिते करम् ।
(४) उत्तानशायिते षष्ठे चाङ्के न्युब्जं विदुर्बुधाः ॥ ५६ ॥

तत्र पूर्वेऽनुदात्ताङ्के पितृपिण्डप्रदानवत् ।
हस्तः प्रदर्शनीयस्तु न्युब्जे तु न्युब्जता भवेत् ॥ ५७ ॥

न्युब्जाङ्कतोऽनुदात्ताङ्के दृश्ये दक्षे प्रदर्शनम् ।
(५) स्वरिताङ्को दृश्यते चेत् तदा नीचैः प्रदर्शनम् ।
उभयत्राप्युदात्तः स्वं स्थानं मध्यगतो लभेत् ॥ ५८ ॥

५३—(१) गुणानांत्वा (२३।१९) अत्र 'ना' स्वरितचिह्नवत्वात्स्पष्टस्वरितः । (२) गणपतिं हवामहे (सं० २३।१९) अत्र 'तिं हवामहे' प्रचयाः । स्वरितस्थाने मध्ये प्रदर्शनात् स्वरिता इत्यौपचारिको व्यपदेशः । वाजसनेयिनां प्रचयस्य पृथक् स्वरत्वं नास्ति । स्वरितादिति = स्पष्टस्वरितात् मध्यावर्तिनश्चेत्युभयोः परः । गणपतिं हवामहे (सं० २३।१९) चव्युप्तकेशाय (सं० १६।२९) इति क्रमेणोदाहरणे ।

५४—(३) चू व्युप्तकेशाय (सं० १६।२९) ।

५५—अङ्कः = अङ्कनम्, स्वरसङ्केतबोधकं चिह्नम् ।

५६-५७—(४) रथ्यो न रश्मीन् (सं० ३४।४९) । दक्षे न्युब्जतायाः प्रदर्शनम् ।

५८—(५) बृहत्युष्णिहा (सं० २३।३३) ।

५८. मध्यगतः—न्युब्जानुदात्तचिह्नमध्यगतः, न्युब्जस्वरितचिह्नमध्यगतो वा । त इमे पञ्च स्वरिताः हस्तदर्शनस्थित्या इत्थं संज्ञापिताः—(१) मध्यपाती (२) मध्यदर्शी (३) मध्यावर्ती (४) पूर्णन्युब्जः (५) अर्द्धन्युब्जः, दक्षन्युब्जापरनामधेयः इति ।

कण्ठतः स्वरबोधनम्, सम्प्रदायमहिमा च

एवं स्वरास्तु हस्तेन दर्शनीया अथापि च ॥ ५९ ॥
कण्ठेनोच्चारणं तेषां गुरुभ्योऽभ्यासतस्तथा ।
सतीर्थ्येभ्यः श्रद्धया च ब्रह्मण्यैः समवाप्यते ॥ ६० ॥

विरहे सम्प्रदायस्य श्लथेऽभ्यासेऽस्मृतौ तथा ।
उच्चारणं भिद्यते तद् वेदह्रासकरं परम् ।
तस्मात्सर्वात्मना वेदो सद्गुरोः समधीयताम् ॥ ६१ ॥

❀ इति स्वरप्रकरणम् ❀

[३] अथ वर्णोच्चारणप्रकरणम्

शिक्षाशास्त्रोपयोगः, सम्प्रदायतो ज्ञानम्

शिक्षाशास्त्रे पूर्णतया वर्णस्थानादिबोधनम् ।
उक्तं तथोपदेशस्तु बाल्ये प्रायो न लभ्यते ॥ ६२ ॥

शिक्षाशास्त्रं ततः प्रौढा विवेकायोपयुञ्जते ।
यदा तु वेदगुरुभिः पाठ्यते बालकस्तदा ॥ ६३ ॥

उच्चारणे स्याद् वर्णानां शिक्षाशास्त्रानुकूलता ।

एतच्छिक्षाविषयः

वर्णानां देवनागर्य्यां लेखो वै लोकवेदयोः ॥ ६४ ॥

समः, क्वचन वेदेऽस्ति विशेषो लेखलक्ष्मतः ।
उच्चारणं लौकिकं च क्वचिद् वेदेऽन्यथायते ॥ ६५ ॥

संहिताया लेखने मुद्रणे च स्वरूपम्

तदत्र बोध्यते स्पष्टं माध्यन्दिनमतानुगम् ।
मुद्रणादौ स्पष्टमर्थबोधनाय यथायथम् ॥ ६६ ॥

रेखा–पदविभागादि लक्ष्म यद्दीयते बुधैः ।
सम्प्रदायागताभ्यासोच्चारणाय न तन्मतम् ॥ ६७ ॥

अभ्यस्यमन्त्रग्रन्थेऽर्थनिरपेक्षेण लेखनम् ।
पठनं श्रवणं दृष्टिर्द्रढिम्ने श्रेयसे मताः ॥ ६८ ॥

---

६५. लक्ष्म—चिह्नम्, सङ्केतः । यथा यकारस्य ।

६७. न तन्मतम् = साम्प्रदायिकलेखने तन्नाद्रियत इत्यर्थः ।

६८. अभ्यसनीयमन्त्रग्रन्थे अर्थस्य अपेक्षामकृत्वा तन्निरपेक्षेण सन्ततविधया लेखनं, पदविभागमकृत्वा पठनं श्रवणं दृष्टिश्च दीयते चेत् लेखन-पठन-श्रवण-दर्शनजनिताः

स एव यद्यर्थबोध-कृते मुद्राप्यते बुधैः ।
तत्र सर्वः समादृत्यो विधिर्लोकमतानुगः ॥ ६९ ॥

पूर्वरूपचिह्नं विवृत्तिः

अकारः पूर्वरूपेण लुप्यते यत्र तत्स्थले ।
अर्द्धाकारं सर्परूपं लौकिका विलिखन्ति तत् ।
वेदे नैव प्रयोक्तव्यं विवृत्तेर्लक्ष्म तत्स्मृतम् ॥ ७० ॥

द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते ।
विवृत्तिस्तत्र विज्ञेया 'यऽईशे' तु निदर्शनम् ॥ ७१ ॥

विरामस्थानानि

मन्त्रमध्येऽवसाने तु विवृत्तावपि मात्रया ।
अवग्रहे प्रतीकेषु विरामः सर्वदा मतः ॥ ७२ ॥

पदपाठे प्रतिपदं क्रमादौ नियते स्थले ।
मात्राकालोऽस्ति चर्चायां नापेक्ष्यो सोऽन्यपक्षिणा ॥ ७३ ॥

मात्राकालः

उच्चारणगतिं प्रेक्ष्य मात्राकालस्तु बोध्यते ।
गुरुभिः केवलं नास्ति लक्षणेन प्रयोजनम् ॥ ७४ ॥

ऋकारस्य रेकारोच्चारणम्

स्वरः स्वयमृकारोऽसौ रेकारोच्चारणं भजेत् ।

अनुस्वारलेखनं भेदाः ह्स्तमुद्राश्च

अनुस्वारो यत्र दृश्यो धनुश्चिह्ने सुबिन्दुधृक् ॥ ७५ ॥

संस्काराः द्रढिम्ने बुद्धिवैशद्याय च श्रेयसे प्राचीनैरभिमताः । अत एव प्राचीनसन्तत-(रेखा-पदविभागविरहित) शैलीलिखितग्रन्थपाठकाः स्वीयया अभ्यूहप्रधानया दृष्ट्या साधारणपाठकानतिशेरते ।

६९. स एव = अभ्यस्यमन्त्रग्रन्थः ।

७१. द्र०—या० शि० पृ० ८३ । यऽईशे (सं० २३।३)

७२. मन्त्रमध्ये इति त्रिचतुरादिविरामवत्सु मन्त्रेषु सर्वत्र विरामस्थानज्ञापनार्थः, न तु यत्र कुत्रचित् स्वाभिलषितविरामे मात्राकालनिर्देशकः । अवग्रहः पदपाठे भवति ।

७३. चर्चा—पक्षद्वयसाध्या, तत्र परस्परमन्यः पक्षः द्वितीयपक्षीयं विरामकालं नापेक्षते, अपि तु द्वितीयपक्षस्य उच्चारणीयवर्णराशौ यदा वर्णद्वयं शिष्यते तदैवान्यः पक्षः स्वोच्चारणीयं पाठांशं प्रारभते इति भावः ।

७५. सर्वहुतऋचः (सं ३१।७) छन्दांसि जज्ञिरे (३१।७) ।

लघुः स मात्रिको ह्रस्ते तर्जन्यङ्गुष्ठयोगदः ।
संयोगे परतो ह्येष गुरुत्वं शास्त्रतो भजेत् ॥ ७६ ॥

षष्ठाङ्को रेफयुक् ठो वा पार्श्वे वोद्धं तु बिन्दुमान् ।
अनुस्वारं द्विमात्रं तु बोधयेद्दीर्घसंज्ञकम् ॥ ७७ ॥

तर्जनीप्रसृतिस्तत्र हस्तेनैवं प्रदर्शनम् ।
अनुस्वारः स्वराभावान्न मात्राकालभाक् परम् ॥ ७८ ॥

अनुस्वारोच्चारणम्

भिन्नश्रुतिः शषसहरेफेषु तत्र मात्रिता ।
पूर्वश्लिष्टो गः प्रणव-द्वितीयमात्रया युतः ॥ ७९ ॥

सनादो गुँ श्रुतिर्बिन्दुः न ग्वं गोमादि वा भवेत् ।
यत्र स्वरूपतो बिन्दुः कथनं तत्र लोकवत् ॥ ८० ॥

विसर्गस्य लेखनं हस्तमुद्राश्च

वेदे विसर्गश्चिह्नेन सहितो लिख्यते ह्यतः ।
रेखा बिन्दुद्वयस्यान्त-रधोरेफसमा च या ॥ ८१ ॥

कनिष्ठां क्षेपये, दूर्ध्व-रेफतुल्या तु तर्जनीम् ।
तिर्यग्रेखा द्व्यङ्गुली ते क्षेप्ये इति विनिर्दिशेत् ॥ ८२ ॥

विसर्गोच्चारणम्

'ह्' श्रुत्या मात्रया वेदे संहितायां प्रयुज्यते ।
स्वराश्रयी विसर्गोऽयम्, ऐ-औभ्यां परतो यदि ॥ ८३ ॥

---

७७. गणपतिं हवामहे (२३।१९) लेखो द्विधा—६०—ठं०

७८. यद्यपि लोके अनुस्वारस्य एकमात्रिकता द्विमात्रिकता वा नास्ति, परमूष्मसु परेषु वेदेऽनुस्वारस्य भिन्ना श्रुतिः मात्राकालसंबन्धश्च भवति शास्त्रोपदेशादेव। [शु० प्रा० ४।१४८, १४९]

७९. ऊष्मणां पूर्वस्यानुस्वारस्य उच्चारणनिर्देशः—पूर्वश्लिष्ट इति। पूर्वश्लिष्टत्वात् गस्य द्वित्वश्रुतिः। स्पष्टं तु साम्प्रदायिकोच्चारणत एव ज्ञायेत।

८०. बिन्दुरनुस्वारः।

८१. पुरुषः। सहस्राक्षः (सं० ३१।१)

८२. सूचीभि÷ (सं० २३।३३) ते—तर्जनीकनिष्ठिके।

८३. ऐ—सदस्यैः (सं० ७।४५) औ—शीर्ष्णो द्यौः (सं० ३१।३१)।

इ-उ-स्वरश्रुतिं धत्ते, ऋकाराद् हे श्रुतिं तथा।
परो ह्य-इ-उ-ए-ओ-भ्यो यथावर्णश्रुतिर्मतः ॥ ८४ ॥

अवसानगतवर्णोच्चारणं हस्तमुद्राश्च

अस्वरं व्यञ्जनं लोकेऽवसानेस्त्यर्द्धमात्रिकम्।
साम्प्रदायिकद्विःश्रुत्या कालतः करमुद्रया ॥ ८५ ॥

वेदे विशेषतां धत्ते तद् वेद्यं पाठशुद्धये।
तर्जनीं नामयित्वा तु क-ट-ङ-णाँश्च दर्शयेत् ॥ ८६ ॥

तर्जन्यङ्गुष्ठयोगेन कुण्डलाकृतिना तु तम्।
'पं' पञ्चाङ्गुलियोगेन, मुष्टिना 'मं' प्रदर्शयेत् ॥ ८७ ॥

अङ्गुष्ठोपरि तर्जन्या नखं धृत्वा नकारकम् ॥ ८८ ॥

रङ्गस्य लेखनमुच्चारणं च

पदान्तीयो नकारस्तु संहितास्वनुनासिकः।
यदा स्यान् 'मैरयँश्चन्द्र' लोकतुल्यो रवः श्रुतौ ॥ ८९ ॥

स एव रेफपरको रङ्गः स्यान्मात्रिकः पुनः।
स्वरमध्ये द्विमात्रः स्याद् रेखामात्राङ्कनायुतः ॥ ९० ॥

नस्त उच्चार्यते रङ्गः कांस्येन समनिस्वनः।
स्वरं दीर्घं रञ्जयित्वा मृदुर्ङश्रुतिवर्जितः ॥ ९१ ॥

---

८४. ऋ—नॄँः पाहि (सं० १३।५२) अ-आ—ऋषयः, सप्तदैव्याः (सं० ३४।४९) इ—सूचीभिः (सं० २३।३३) ई—शठं० रात्रीः (सं० ३६।११) उ—मनो यजुः (सं० ३६।१) ऊ—केतपूः (सं० ९।१) ए—वरुणस्याग्नेः (सं० ७।४२) ओ—सुविताय शंयोः (सं० ३६।११)।

८६. अत्र अवसानवर्णोच्चारणे पदपाठोदाहरणान्यपि द्रष्टव्यानि। क्—भिषक् (सं० १२।८०) ट्—सम्राट् (सं० २०।५) ङ्—प्राङ् (सं० २५।२५) ण्—वृषण्वसू इति वृषण्। वसू (सं० ११।१३)।

८७. त्—पुरीतत् (सं० ३९।९) प्—ककुप (सं० २३।३३) म्—गर्भधम् (सं० २३।१९)।

८८—न्—रश्मीन् (सं० ३४।४९)।

८९—क्रमजटादिसन्धीरनुलक्ष्य संहितास्विति बहुवचनम्। मैरयँश्चन्द्रमसि (सं० १।२८)

९०—शत्रूँ १॥ रप (सं० ७।३७) लोकाँ २॥ अकल्पयन् (सं० ३१।१३)

९१—तु०-या० शि० (पृ० १३१)।

रङ्गे हस्तमुद्रा

रङ्गे सर्वत्र तर्जन्याः प्रसारः शाश्वतो मतः।
केचिन्मध्यमया सार्धं क्षेपणं कुर्वतेऽमतम् ॥ ९१ क ॥

यकारस्य जकारोच्चारणम्

रेखया यदि भिद्येत यकारस्योदरं तदा।
चवर्गीय-जकारेण सममुच्चारणं मतम् ॥ ९२ ॥

सान्ध्यः पदान्त्यो वर्णैर्युग् उपसर्गपरस्तथा।
अथ मा-स-न-शब्देभ्यो यकारो लोकवत्स्मृतः ॥ ९३ ॥

मा यज्ञ-मथो ये-स यन्ता चैव मनो न ये।
उपसर्गाच्च पादादि-ऋं-ह-सं-रेफयुक्तु जः ॥ ९४ ॥

र-लयोः सैकारोच्चारणम्

रेफो लकारश्च यदा श-ष-हेभ्यस्तु पूर्वतः।
'ए' स्वरश्रुतिमान् ज्ञेयो स्वरभक्तिरियं मता ॥ ९५ ॥

ऋकारात्पूर्वतो रेफो गौड़ाचार्यैः स्वरश्रुतिः।
दाक्षिणात्यैर्यथालोकं कथ्यतेऽनुपरम्परम्।
लकारः श-हयोर्योगे सैकारश्रुतिभाङ् मतः ॥ ९६ ॥

---

९१. क.—केचन द्विमात्रिके रङ्गे तर्जन्या सह मध्यमामपि प्रदर्शयन्ति, तत्प्रदर्शनं न सद्भिरनुमन्यते। एतच्च तर्जनीप्रसारणमन्याङ्गुलीनां न्यचने (नामने) एव सम्भवतीति सर्वत्र ध्येयम्। एवं विसर्गे कनिष्ठाप्रसारणेऽप्यन्याङ्गुलीनां नामनमवगन्तव्यम्। एतत्प्रसारणमेव बहुत्र शिक्षासु 'क्षेप' शब्देनाप्युच्यते।

९२—मनो यजुः (सं० ३६।१); यकारस्य नीचैर्बिन्दुदानं त्वसाम्प्रदायिकम्।

९३—सन्धिजः—अत्यतिष्ठद् (सं० ३१।१) पदान्तीयः—मयि प्राणापानौ (सं० ३६।१); वर्णयुक् पदादिपरि—यो रेवान् यो (सं० ३।२९); उपसर्गात् परः पदादिरपि—वियत्सूर्यो (सं० १२।३४); अथ—अप्यर्थोऽयम्, मा—माया स्वधया (सं० ११।६९); स—स योजते (सं० १५।३३); न—न यत्परो (सं० २०।८२)।

९४—मा यज्ञम् (सं० ५।३); अथो ये (सं० १६।८); सयन्ता (सं० ६।२९); मनो न येषु (सं० ७।१७); उपसर्गात्परोऽपि पादादिः—उप यज्ञम् (सं० ८।३५); ऋयुक्-सदोस्यृतस्य (सं० ५।३); हयुक्—गेह्याय (सं० १६।४४); संयुक्—संय्यौमीदमग्नेः (सं० १।२२); रेफयुक्—उदहार्य्यः (सं० १६।७); अत्र यकारस्य जकारोच्चारणम्।

९५—श—दर्शतम् (सं० ११।३७); ष—सहस्रशीर्षा (सं० ३१।१); ह—देवं बर्हिः (सं० २१।४८)।

९६—ऋ—अग्निर्ऋषिः (सं० २६।९); 'रे रे षिः' इति गौडसम्प्रदाये उच्चारणम्। श—शतवल्शा (सं० १२।१००); ह—उपवल्हामसि (सं० २३।५१)।

वकारे विशेषलेखनमुच्चारणं च

वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः।
पदस्यादौ गुरुर्मध्ये लघुः पंचमयुक् तथा॥ ९७॥

सन्धिजश्च पदान्तीयो वर्णयुक्च लघूतरः।
गुरौ द्वित्वं लेखने चोच्चारणं स्पष्टमेव हि॥ ९८॥

लघौ लघूतरे लेखे न भेदोऽस्ति परं स्वतः।
उच्चारणे मृदुर्भेदो ज्ञायते ह्यप्रमादतः॥ ९९॥

सं विहायोपसर्गात्तु पदादिरपि वो लघुः।
वो वां वा वै मन्त्रपाठे लघवो, गुरवः पदे॥ १००॥

वर्णान्तरस्य द्वित्वमुच्चारणं च

अथ सर्वेऽपि वर्णा ये शिक्षा-पार्षदशास्त्रतः।
द्विर्भवन्ति यथालोक-मुच्चार्यास्ते यथायथम्॥ १०१॥

षकारस्य खकारोच्चारणम्

कवर्गीयद्वितीयेन खकारेण समो रवः।
मूर्द्धन्यस्य षकारस्य टवर्गीययुतिं विना॥ १०२॥

ज्ञवर्णोच्चारणम्

ज ञोर्ज्ञ इति वर्णस्य प्रयोगो भिद्यते श्रुतौ।
गौड़ाचार्या जञौ स्पष्टं विश्लिष्य ब्रवते परम्॥ १०३॥

महाराष्ट्रा दन्तमूल-पीडनाद् ग्न्यमिवाक्षरम्।
ग्यन्द्येत्यादिश्रुतिर्वेदसम्प्रदाये न विद्यते॥ १०४॥

९७—गुरुः—व्वसो मम (सं० २३।१९); लघुः—हवामहे (सं० २३।१९); अन्वालेभिरे (सं० ३४।४९); पञ्चमाः वर्गाणाम्।

९८—सन्धिजः—वायो + इह = व्वायविह (सं० २७।३३); पदान्तीयः—अमृतन्दिवि (सं० ३१।३); वर्णयुक्—गणानान्त्वा (सं० २३।१९)।

१००—सम्—संव्वपामि (सं० १।२१); अन्योपसर्गात्परो लघुः—प्र वायुमच्छा (सं० ३।५५); वः—देवो वः (सं० १।१); वाम्—या वाङ्कशा (सं० ७।११); वा—वातो वा मनो वा (सं० ७।७); वै—न वा उ (सं० २३।१६)।

१०१—प्रसङ्गचिन्त्येयम्। सविता प्प्रार्पयतु (सं० १।१) आदौ।

१०२—रवः = उच्चारणम्। इषे त्वा (सं० १।१) टयुतिः—अष्टौ च (सं० १५।२५) ठ—ज्येष्ठाय च (सं० १६।३२) ड—× । ढ—× । ण—विष्णुर्विचक्रमे (सं० ५।१) टवर्गयोगे न खकारोच्चारणम्।

१०३—यज्ञेन यज्ञम् (सं० ३१।१६)।

गौडदाक्षिणात्योच्चारणविशेषाः

व्यृध्यै ङ्कयोर्योगे तसोर्योगे च भिद्यते।
गौडानां दाक्षिणात्यानां कथनं गुर्वनुक्रमात् ॥ १०५ ॥

यवौ दीर्घस्वरैर्युक्तौ स्वरितौ सविसर्गकौ।
स्यातां तदाङ्गुली क्षेप्ये इति गौडा वदन्ति नः।
कनिष्ठिकैव क्षेप्येति दाक्षिणात्यास्तु मन्वते ॥ १०५ क ॥

यमबोधः

पञ्चमापञ्चमस्पर्शयोगे ज्ञेयो यमोऽक्षरम्।
विदुषामपि मोहाय तत्र स्थूला दृशिस्त्वियम् ॥ १०६ ॥

संहितायां ककारस्तु मध्यतो यस्तमोस्तनोः।
लिख्यते न प्रयुज्येतान्यत्र विद्वत्समाश्रयः ॥ १०७ ॥

दीर्घपाठस्थितिः

प्रतिज्ञापरिशिष्टे यद्दीर्घत्वं प्रतिपादितम्।
तदनुस्मृत्य सर्वत्र मात्राकालस्य दीर्घता।
तस्मान्माध्यन्दिनीयोऽसौ दीर्घपाठो निगद्यते ॥ १०८ ॥

१०५—व्यृद्ध्यै (सं० ३०।१७); प्राङ्क्सोमो (सं० १९।२); त्रीन्त्समुद्रान्त्समसृपत् (१३।३१)।

१०५ क. सदस्यैः (सं० ७।४५); अतिविश्वाः (सं० ११।८४)।

१०६—यमस्वरूपं सिद्धान्तकौमुद्यामपि—'वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः' (पा० ८।२।१)। शुक्लयजुः-प्रातिशाख्येऽपि - 'अन्तः पदेऽ पञ्चमः पञ्चमेषु विच्छेदम् (४।१६१)। 'अप्रत्यक्षकादि-वर्णशरीराः श्रुतिविशेषा एव यमाः, विसर्गानुस्वारादिवत्' इति शिक्षाविदः। दृश्यते तु कादिवर्णत्वं यमानाम्। अतो यमविषये बहुधा वचनोपलम्भाद्विदुषामपि मोहः प्रायः सम्भवति। अतोऽत्र यम विषये बहुविवेक्तव्यमन्यत्र विवेचयिष्यते। इह तु स्थूलदृष्ट्या-वैदिकैरिदमवगन्तव्यं यत्—

१०७. आत्क्मदा (सं० २५।१३) पत्क्नीभिः (सं० १५।५०) इत्यादौ तमोः तनोर्वा योगे यः मध्ये ककारो लिखितो दृश्यते, स एव यमपरिचायक इति। यतो हि न तस्य ककारस्योच्चारणं भवति। अन्यापञ्चमपञ्चमयोगे यमपरिचायनाय न कश्चन सङ्केतः सम्प्रदाये प्रयुज्यत इति तत्र विद्वदाश्रय एव शरणम्।

१०८. वाजसनेयमाध्यन्दिनीयसंहितायाः पाठो 'दीर्घपाठः' कथ्यते। तत्र बहव आधुनिकाः ससारं प्रमाणमनुपलभमाना अपि कल्पयन्ति यत्—आसीदेतस्याः संहिताया ह्रस्वपाठोऽपि, ह्रस्वदीर्घशब्दयोः परस्परापेक्षत्त्वादिति। तत्र वक्ष्यमाणार्षीसंहिता (१११) विरहितो लघुपाठो ह्रस्वपाठो वा, तत्सहितो दीर्घपाठ इति। तदसत्

कण्डिका–मन्त्रयोर्भेदः

संहितायां मन्त्रसङ्ख्या दृश्यते सा तु कण्डिका।
स्मार्ते प्रयोगे स्युर्मन्त्राः कण्डिकान्तास्तु सर्वथा ॥ १०९ ॥

श्रौते श्रौतप्रयोगानु-सारेण कल्पसूत्रतः।
एकस्यां कण्डिकायां स्युर्बहवोऽपि यथावचः।
लोके च मन्त्रशब्दोऽयं कण्डिकासु प्रयुज्यते ॥ ११० ॥

आर्षी संहिता, विशेषश्च

बहुत्र संहितायां तु केचिन्मन्त्राः प्रतीकतः।
उक्तास्तत्र विशेषाख्या या चा'र्षी संहिता' स्मृता ॥ १११ ॥

सा प्रातिशाख्ये निर्दिष्टा 'संहिता' तत्र वैदिकाः।
पारायणे तामुच्चार्य पूर्णान्मन्त्रानधीयते ॥ ११२ ॥

गायत्रीमन्त्रे विशेषः

मन्त्रः सवितृदैवत्यो गायत्रस्तु 'तदा'दिकः।
लोकप्रसिद्धो गायत्री-मन्त्रो नाध्याप्यते स्फुटम् ॥ ११३ ॥

सम्प्रदायापरिज्ञानात्। कात्यायनीये प्रतिज्ञापरिशिष्टे विसर्गानुस्वारादेरप्रसिद्धानां लघु-दीर्घ-गुरुत्वव्यवस्थानाम्, उच्चारणेऽपि 'ईषद्दीर्घता च भवति' इति विधानानां, मात्रा-कालदीर्घतायाश्च जागरूकत्वात्, तदुच्चारणस्य च सम्प्रदायसमधीनत्वात् सृष्टिन्यायेन (जै० १।४।१७) सर्वोऽपि पाठः शाखान्तरवैलक्षण्यद्योतनाय 'दीर्घपाठः' इति कथ्यते। अतोऽत्र न ह्रस्वपाठपरिकल्पनावसरः इति।

१०९-११०. यद्यपि कण्डिकासु मन्त्रशब्दप्रयोगो न श्रौतकल्पसम्मतः। परं वेदान्तरसंस्कारवशात् शास्त्रज्ञाः साम्प्रदायिकाः लौकिकाश्च सर्वेऽपि कण्डिकासु मन्त्र-शब्दं प्रयुञ्जते। तदेतदप्युपपद्यत इत्यन्यत्र विचारयिष्यामः।

१११-११२. लोकं ता इन्द्रम् (सं० १४।२२) इत्यादिषु मन्त्राणामाद्यपदसङ्केतेन 'तं प्रत्नथायं वेनश्चित्रं देवनाम्' (सं० ३३।३३) इत्यादिषु पदद्वयसङ्केतेन च मन्त्राः संकेतिताः सन्ति। त इमे संहिताधर्मेणैव ऋषिसङ्केताः समधीयन्ते। तस्मादेषां सम्प्रदाये 'आर्षी संहिता' इति व्यवहारः। प्रातिशाख्ये त्वेषां आर्षीविशेषणविरहेण 'संहिता' (४।१७७) शब्देनैवास्ति व्यवहारः। साधारणे विधिनिरपेक्षे पाठे सङ्केतमात्र-पाठः। पारायणे ब्रह्मयज्ञादौ तु सङ्केतात्मिकाम् आर्षीसंहितामधीत्य सङ्केतितमन्त्राणां पूर्णः पाठः क्रियते। एवमस्ति कण्डिकानुवाकसङ्केतोऽप्येतच्छब्देन (सं० ३२।३)।

११३. यद्यपि बहवो मन्त्राः सावित्राः गायत्रीछन्दस्काश्च सन्ति। परं 'तत्सवितुः' (सं० ३।३५) इत्यादिक एव गायत्रीमन्त्रत्वेन प्रसिद्धचति। एतस्य स्फुटम् = वाचिक-धर्मेण नाध्यापनम्।

उपनीतावेव मन्त्रं कर्णे ह्युपदिशन्ति तम्।
नैतस्य संस्था गुणिनी कार्यते साम्प्रदायिकैः॥ ११४॥

पाठकाले परित्यागः, परं पारायणे तथा।
प्रयोगे सस्वरं तस्य चोपांशुः पाठ इष्यते॥ ११५॥

मन्त्र-ब्राह्मणस्वरभेदनिर्देशः

मन्त्रश्च ब्राह्मणं चेति वेदः स्यात्तत्र संहिता।
मन्त्रभागः स्मृतस्तत्र पाठस्त्रैस्वर्यतः स्मृतः॥ ११६॥

ब्राह्मणे तूच्चनीचौ द्वौ स्वरौ तद्विस्तरोऽन्यतः।

ब्राह्मणभागस्य बृहत्त्वं तदध्ययनस्थितिश्च

ब्राह्मणं माध्यन्दिनीयं शताध्यायात्मकं ततः॥ ११७॥

स्मृतं शतपथं तच्च स्यादर्थात्परिमाणतः।
इतरेभ्यो महत् तेन सर्वे न समधीयते॥ ११८॥

पूर्णशाखाध्ययनाक्षेपपरिहारः

ब्राह्मणाध्ययनाभावात् शाखा वाजसनेयिभिः।
पूर्णा नाधीयते दोष—माक्षिपन्ति परे, परम्॥ ११९॥

---

११४. मन्त्रोऽयमुपनयने गुरुणा उपदिश्यते। उपदेशश्च शास्त्रविधया प्रथमतः कर्णकुहरेण श्रावणम्। उपदेशधर्मेण प्राप्तत्वात् विशेषाराधनीयत्वात्, द्विजत्वोपबृंहकत्वाद्, महिम्नो गुरुत्वात्, देश-काला-धिकारिशौचादौ प्रमादसंभवात्, सम्प्रदायस्य तादृशत्वात् गायत्रीमन्त्रस्य गुणिनी-संस्थाविधया नाभ्यासः क्रियते। ये चाधुनिकाः सर्वस्य मङ्गलमुद्घोषयन्तो मन्त्रस्यास्य सार्वजनीनत्वं स्पष्टोच्चारणं च विदधते तदसाम्प्रदायिकम्।

११५. पारायणादिविधिनिरपेक्षे न तु सर्वथा विधिनिरपेक्षे वेदपाठे एतस्य मन्त्रस्य उच्चारणं न क्रियते। वैधे पारायणे ब्रह्मयज्ञे तु यथार्हं सस्वरं, होमादौ हस्त-स्वरविरहितं च गायत्रीमन्त्राध्ययनमुपांशुविधया क्रियते।

११६. 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (प्र० प० १।२)। तत्र मन्त्रात्मकतया वैदिकप्रसिद्धो भागः 'संहिता' संज्ञया सर्वशाखासु व्यवह्रियते। संहितायामत्र त्रैस्वर्येण सहस्तप्रदर्शनमध्ययनम्।

११७. वाजसनेयिनां ब्राह्मणे तदन्तर्गतयोरारण्यकोपनिषदोरपि सहस्तप्रदर्शन-मुदात्तानुदात्तेतिस्वरद्वयज्ञापनपरमध्ययनम्। तदेतत्स्वरद्वयं 'भाषिकम्' इति कथ्यते। यथा—'ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ' (प्र० प० १।८)। प्रकरणान्तरादेतत् ब्राह्मणस्वरसंबन्धिविवेचनमत्र नोक्तम्।

सम्प्रदायविदस्तत्र कथयन्ति वचो यथा—।
'विधिर्विधेयस्तर्कश्च वेदः' कल्पे समीरितम् ॥ १२० ॥

'विधिः' स्याद् ब्राह्मणं, मन्त्रः 'विधेय' इति कीर्तितम् ।
प्रयोगपाटवं 'तर्कः' सम्प्रदायात् त्रयं स्थितम् ॥ १२१ ॥

पृथक् पृथक् त्रयं त्वेतद् वेदः सूत्रेण बोध्यते ।
तस्मात् पूर्णतया मन्त्राध्ययने वेदपूर्णता ॥ १२२ ॥

भवत्येवं ब्राह्मणस्य पूर्णाधीतौ च पूर्णता ।
श्रौतस्मार्तप्रयोगस्य ज्ञानेऽपि वेदकृत्स्नता ॥ १२३ ॥

अथैतदप्यनुध्येय—मन्यवेदेषु यावता ।
कालेनाभ्यसनं मन्त्र-ब्राह्मणानां तु तावता ॥ १२४ ॥

माध्यन्दिनीयशाखाया एको भागो भवेद् ध्रुवम् ।
यतो हस्तस्वराभ्यासः कृच्छ्रेण स्वात्मसादिति ॥ १२५ ॥

१२०-१२३. शुक्लयाजुषाणां स्वीये पारस्करगृह्यसूत्रे समावर्तनप्रकरणे—'वेदं समाप्य स्नायात्' (पा० गृ० २।५।१) इति प्रक्रम्य उक्तम्—'विधिर्विधेयस्तर्कश्च वेदः । षडङ्गमेके । न कल्पमात्रे । कामं तु याज्ञिकस्य ।' इति । एतानि सूत्राणि सम्प्रदाय-रहस्यविद एवं व्याचक्षते ।—"विधिः = ब्राह्मणभागः । विधेयः = मन्त्रभागः, विधीयते विनियुज्यते ब्राह्मणवाक्येन कर्माङ्गत्वेनेति व्युत्पत्तेः । तर्कः = प्रयोगः । तर्क दीप्तौ (श० क०) तर्क्यते प्रकाश्यते वेदत्वं येन । प्रयोग एव इष्टप्राप्त्यनिष्टपरिहारद्वारा वेदस्य वेदत्वं प्रकाशयति । एतत् त्रितयं पृथक् पृथक् पूर्णो वेदो माध्यन्दिनीयेषु परि भाष्यते अध्ययनाय । अत एव 'शतषष्टेः' षिकन् पथः इति कात्यायनीयं (पा० ४।२।६०) वार्तिकं ब्राह्मणबृहत्त्वात् शतपथिकः, षष्टिपथिकः, इति शुक्लयाजुषाणामध्येतॄणां संज्ञाविशेषं व्यावहारिकतया समर्थयद् वेदान्तराध्यायिभिर्वैलक्षण्यं निर्दिशति ।

एतेष त्रिषु वेदशब्दवाच्येषु एकं भागं पूर्णमधीत्य स्नायात् । एके आचार्याः षडङ्गसहितं त्रितयेष्वेकं वेदभागमधीत्य स्नायादित्याहुः । एके इत्युक्तेरनावश्यकत्व-द्योतनाद् वाजसनेयिषु ऋग्वेदिनामिव न नियततया मूलमात्रं षडङ्गाध्ययनम् ।

अन्याङ्गाध्ययनरहिते 'तर्क' शब्दनिर्दिष्टे प्रयोगज्ञानमात्रे अधीते सति वेदाध्ययनं नास्तीति एके आचार्याः मन्यन्ते । तत्र सूत्रकृत् सिद्धान्तयति—याज्ञिकस्य पौरोहित्य-वृत्तेर्ब्राह्मणस्य तु कामं प्रयोगज्ञाने सम्पादितेऽपि वेदाध्ययनं सिद्ध्यत्येव । याज्ञिकस्येत्युक्तेः क्षत्रियवैश्ययोः प्रयोगज्ञानमात्रसम्पादने न पूर्णं वेदाध्ययनमिति । अत एव वाजसनेयिषु वेदपाठी, ब्राह्मणपाठी, श्रौती (कर्मकाण्डी) चेति ख्यातास्त्रयोऽपि वैदिकाः परिगण्यन्ते ।" इति ।

१२४-१२५. एवं वाजसनेयिषु मन्त्रभागस्य स्वराभ्यासनैयत्येन गुरुत्वात् ब्राह्मण-भागस्य चार्थतः परिमाणतश्च हस्तस्वरपूर्वकमभ्यासेन बृहत्त्वात्, आध्वर्यववेदे च प्रयोग-

पदपाठस्वरूपम्

पदपाठे संहितायाः पदानि समधीयते।
विच्छिद्य सन्धिं, तस्मात्तु स्वर-वर्णविपर्ययः॥ १२६॥

दृश्यते तस्य विज्ञानं कार्यं स्यात् पार्षदादिभिः।
न तत्र सम्प्रदायाद्धि विशेष इति नोच्यते॥ १२७॥

पदपाठे गलत्पदानि

येषां पदानां नोक्तिः स्यात्पदपाठे तु तानि वै।
'गलत्पदानि' प्रोक्तानि प्रातिशाख्येऽस्ति निर्णयः॥ १२८॥

पदपाठे गलदृचः

एवं गलदृचस्ताः स्युर्यासां पाठो न विद्यते।
पदपाठे,ऽसकृत् पाठो संहितायां च दृश्यते॥ १२९॥

क्रमपाठस्वरूपम्

पदपाठे पठितयोर्द्वयोः सामान्यतः क्रमात्।
ससन्धि पदयोः पाठः क्रमपाठस्तु कथ्यते॥ १३०॥

क्वचित् तत्रापि त्रयाणां चतुर्णां वा ससन्धिकः।
पाठो विधीयते सोऽपि प्रातिशाख्यानुसारतः॥ १३१॥

पाटवस्यावश्यकत्वात्, तत्राभ्यासस्य च समपेक्षितत्वात् एकैको भाग एव स्वशाखीय-वेदत्वेन मन्तव्यः। त्रयाणामध्ययनासामर्थ्यस्य प्रत्यक्षसिद्धत्वात् सम्प्रदायस्य च एकैक-भागाध्ययने एव वेदकात्स्न्योपादनात्। तत्र सम्प्रति ब्राह्मणभागस्य संभवन्ति केचिद् विरला एव स्वतन्त्राध्येतारः। मूले (१२४) ब्राह्मणानामिति बहुवचनमारण्यकोप-निषदावनुलक्ष्य।

१२६-१२७. पदपाठे सन्धिविच्छेदेन संहितायाः स्वराः वर्णाश्च विपर्यस्ता इव दृश्यन्ते। तेषां परिज्ञानं ततः सुस्पष्टं भवतीति सम्प्रदाये न तत्र विशेषः। पार्षदम् = प्रातिशाख्यम्। आदिना व्याकरणशास्त्रसङ्ग्रहः।

१२८—यथा—वाजः। च। मे प्रसवः। प्रयतिः (सं० १८।१ पद १८।१)। अत्र प्रसवादिपदैः साकं—च। मे—इति पदे नाधीयेते, ते गलत्पदे। एवमन्यत्रोह्यम्। एतदर्थं शुक्लयजुः प्रातिशाख्यस्य चतुर्थाध्यायः (सू० १६६-१८०) द्रष्टव्यः।

१२९—या ऋचः संहितायामसकृत् पाठितास्तासां पदपाठे प्रथमस्थले एव पाठः, अन्यत्र तासामनिर्देश इति ता 'गलदृचः' कथ्यन्ते।

१३०-१३१—प्रातिशाख्ये क्रमपाठप्रकरणं चतुर्थाध्याये (सू० १८१-१६९) द्रष्टव्यम्।

क्रमपाठे सङ्क्रमसन्धिः

गलत्पदान्यनुच्चार्यं तदाद्यन्ते पदद्वये ।
या सन्धिः क्रमपाठेऽस्ति 'सङ्क्रमः' प्रोच्यते तु सा ॥ १३२ ॥

विकृतिपाठाः

जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
पाठा इमे विकृत्याख्या अष्टौ स्युर्वेदरक्षकाः ॥ १३३ ॥

केचिदन्ये सन्ति पाठाः सम्प्रदाये समादृताः ।
तेषामेषां स्वरूपं च लक्षणं वर्णयिष्यते ।
ग्रन्थेऽन्यस्मिन्नात्र तेषां लेखः प्रकरणान्तरात् ॥ १३४ ॥

पाठानां साम्प्रदायिकाभ्यसनग्रन्थः

सम्प्रदाये क्रमादीनां पाठानां नास्ति पुस्तकम् ।
पदपाठस्यैव लेखे घनान्तं पाठ्यते मुदा ॥ १३५ ॥

गुरुपरम्पराया आश्रयः

उच्चारणे वस्तुतस्तु सद्गुरुः शरणं मतम् ।
तस्मात्पूर्वैर्भारतीयै-राचार्यैः स्पष्टमुच्यते ॥ १३६ ॥

'वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्याद् अधुनाध्ययनं यथा' ॥ १३७ ॥

'कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ १३८ ॥

सुतीर्थादागतं व्यक्तं स्वाम्नायं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते' ॥ १३९ ॥

१३२—सन्धौ 'सङ्क्रम' शब्दव्यवहारः प्रातिशाख्ये (४।१६६, १९६, ८१; ३।१४९)। तत्स्वरूपं चोवटभाष्ये यथा—गलत्पदमति-क्रम्यागलता (पदेन) सह सन्धानं सङ्क्रमः (शु० प्रा० ४।८१)।

१३३—वेदरक्षकत्वं स्वरवर्णविपर्याससम्भावनाविरहेण। एषामेव पाठानां महिमायं यद् वेदो मात्रया स्वरेणापि च न शङ्कास्पदतामेति।

१३४—अन्ये-पञ्चसन्धियुक्तघनपाठः, पञ्चसन्धिमालायुक्तो घनपाठः, सांकली-पाठः, एवमादयः।

१३७—मीमांसान्यायप्रकाशे।

१३८-१३९. द्र० पा० शि० ५०।५१ ।

एतच्छिक्षान्यूनतापरिहारः

एवं लेखाश्रयो यश्च विशेषः साम्प्रदायिकः ।
आवश्यकः स हि प्रोक्तो नात्र शास्त्रीयविस्तरः ॥ १४० ॥

द्वित्व–सर्ग–यम–स्थाना–नुस्वारा–गम–सन्धयः ।
परिभाषादि सर्वत्वं शास्त्रस्यान्यत्र दृश्यताम् ॥ १४१ ॥

विनयः

यथामति यथास्फूर्ति सम्प्रदायप्रबोधिनी ।
शिक्षैषा ग्रथिता तत्र दोषश्चेत्क्षम्यतां बुधैः ॥ १४२ ॥

प्रसादनम्

अत्र शास्त्रं सम्प्रदायः शास्त्र-सद्गुर्वनुग्रहात् ।
नवोनसज्जामाधत्तो न नरं क्लेशयन्ति च ॥ १४३ ॥

लोकानां सुखबोधाय सम्प्रदायप्रबोधिनी ।
मिश्र-गोपालचन्द्रेण कृता शिक्षा मनोरमा ॥ १४४ ॥

तुष्येयुस्तेन विद्वांसः श्रम-शक्तिहितैषिणः ।
आशीर्वदेयुर्येन स्यां वेद-वैदिक-सेवकः ॥ १४५ ॥

इति विद्यातपोयोनिरयोनिर्विष्णुरोडितः ।
गोपालचन्द्रमिश्रस्य वाङ्मात्राभिः प्रसीदताम् ॥ १४६ ॥

—:०:—

इति काशोनिवासि—वेद-धर्मशास्त्र-मीमांसादर्शनाचार्य-
एम्० ए०-महायाज्ञिक-विद्वत्तिलक—

श्रीगोपालचन्द्रमिश्रस्य कृतौ

शुक्लयजुर्वेद-माध्यन्दिनशाखीयसम्प्रदायरक्षणशिक्षापरा

सम्प्रदायप्रबोधिनी

नाम शिक्षा समाप्ता

---

१४१. शिक्षाशास्त्रस्य सर्वत्वमनयैव शिक्षया न ज्ञेयम् । इह तु पूर्वशिक्षासु स्पष्टमनुक्तानां साम्प्रदायिकानां वा मन्त्रसम्बन्धिविषयाणामेव बोधनं लक्ष्यः ।

१४६. सम्प्रदायप्रबोधिन्याष्टुप्टीकेयं सुबोधिनो ।
पूर्णतामगमत्तेन वेदात्मा सम्प्रसीदताम् ॥

इति श्रीगोपालचन्द्रमिश्रकृता सम्प्रदायप्रबोधिनीशिक्षायाः
टुप्टीकात्मिका सुबोधिनी व्याख्या
समाप्ता ॥